[प्रतापी, धार्मिकः, शास्त्रचक्षुः, भक्तसुहृत्तमः, वदान्यः, तेजसा युक्तः, कृतज्ञः, कीर्तिसंश्रयः।।]

१२. वरीयान् बलवान् प्रेमवश्य इत्यादिभिर्गुणैः।
युतश्चतुर्विधेष्वेष दासेष्वालम्बनो हरिः॥ (१५)

[वरीयान्, बलवान्, प्रेमवश्यः, इत्यादिभिः गुणैः युतः एषः हरिः चतुर्विधेषु दासेषु आलम्बनः॥]

अथ दासाः—

१३. दासास्तु प्रश्रितास्तस्य निदेशवशवर्तिनः।
विश्वस्ताः प्रभुता-ज्ञान-विनम्रितधियश्च ते[२]॥ (१६)

[ते दासाः तु प्रश्रिताः तस्य निदेशवशवर्त्तिनः, विश्वस्ताः, प्रभुताज्ञान-विनम्रितधियः च॥]

यथा—

४. प्रभुरयमखिलैर्गुणैर्गरीयान्
इह तुलनामपरः प्रयाति नास्य।
इति परिणतनिर्णयेन नम्रान्
हितचरितान् हरिसेवकान् भजध्वम्॥ (१७)

[अयं प्रभुः इह अखिलैः गुणैः गरीयान्, अपरः अस्य तुलनां न प्रयाति, इति परिणतनिर्णयेन नम्रान् हितचरितान् हरिसेवकान् भजध्वम्॥]

८. कोटि (करोड़ों) ब्रह्माण्ड की ज्योति उनके एक-एक रोम-कूप में भरी है; कृपा के समुद्र-रूप उनमें अचिन्त्य महाशक्ति है, सब सिद्धियाँ उनकी सेवा करती हैं। ।११।

९. वे अवतारों के बीज हैं। उनके गुण ऐसे हैं कि आत्माराम मुनियों को भी आकर्षित कर लेते हैं। वे ईश्वर, परम आराध्य, सर्वज्ञ, सुदृढ़ व्रत-वाले हैं। ।१२।

१०. वे समृद्धिमान्, क्षमाशील, शरणागत-पालक, दक्षिण अर्थात् उदार, सत्यवचन, दक्ष, सब का शुभ करनेवाले हैं। ।१३।

११. वे प्रतापी, धार्मिक, शास्त्ररूपी चक्षुवाले, भक्तों के परम सुहृद्, वदान्य (उदार), तेजस्वी, कृतज्ञ, कीर्त्ति के आश्रय हैं। ।१४।

१२. वरीयान् (अधिक वरण करने योग्य), बलवान्, प्रेम के वशीभूत-इत्यादि गुणों से युक्त ये हरि चतुर्विध दासों के आलम्बन हैं। ।१५।

दास—

१३. वे दास उनके आश्रित हैं, उनकी आज्ञा के वशवर्ती हैं, विश्वस्त हैं और प्रभुता के ज्ञान से उनकी बुद्धि विनम्र बनी हुई है। ।१६।

यथा—

४. *''यहाँ ये प्रभु अखिल गुणों से गरिमावान् हैं, इनकी तुलना में दूसरा नहीं ठहर सकता।''- ऐसे परिणत निर्णय से जो नम्र बने हुए हैं, जिनके चरित हितकारी हैं, ऐसे हरि-सेवकों का तुम सब भजन करो।* ।१७।

१४. चतुर्धामी अधिकृताश्रितपारिषदानुगाः॥ (१८)

[अमी अधिकृत-आश्रित-पारिषद-अनुगाः (इति) चतुर्धा॥]

तत्र अधिकृताः—

१५. ब्रह्म-शङ्कर-शक्राद्याः प्रोक्ता अधिकृता बुधैः।
रूपं प्रसिद्धमेवैषां[3] तेन भक्तिरुदीर्यते॥ (१९)

[ब्रह्म-शङ्कर-शक्राद्याः बुधैः अधिकृताः प्रोक्ताः। एषां रूपं प्रसिद्धम् एव, तेन भक्तिः उदीर्यते॥]

यथा—

५. का पर्येत्यम्बिकेयं हरिमवकलयन् कम्पते कः शिवोऽसौ
तं कः स्तौत्येष धाता प्रणमति विलुठन् कःक्षितौ वासवोऽयम्।
कः स्तब्धो हस्यतेऽद्धा दनुजभिदनुजैः पूर्वजोऽयं ममेत्थं
कालिन्दी जाम्बवत्यां त्रिदशपरिचयं जालरन्ध्राद् व्यतानीत्॥ (२०)

[का पर्येति? इयम् अम्बिका। हरिम् अवकलयन् कः कम्पते? असौ शिवः। कः तं स्तौति? एष धाता। क्षितौ विलुठन् कः प्रणमति? अयं वासवः, कः स्तब्धः दनुजभिदः अनुजैः हस्यते? अयम् अद्धा मम पूर्वजः-इत्थं कालिन्दी जाम्बवत्यां त्रिदशपरिचयं व्यतानीत्॥]

अथ आश्रिताः—

१६. ते शरण्या ज्ञानिचराः सेवानिष्ठास्त्रिधाश्रिताः; (२१)

[ते आश्रिताः-शरण्याः, ज्ञानिचराः, सेवानिष्ठाः- (इति) त्रिधा॥]

यथा—

६. केचिद्भीताः शरणमभितः संश्रयन्ते भवन्तं
विज्ञातार्थास्त्वदनुभवतः प्रास्य केचिन्मुमुक्षाम्।
श्रावं श्रावं तव नवनवां माधुरीं साधुवृन्दाद्-
वृन्दारण्योत्सव! किल वयं देव! सेवेमहि त्वाम्॥ (२२)

[केचित् भीताः भवन्तम् अभितः शरणं संश्रयन्ते त्वदनुभवतः विज्ञातार्थाः केचित् मुमुक्षां प्रास्य (भवन्तं संश्रयन्ते) देव! वृन्दारण्योत्सव! वयं किल साधुवृन्दात् तव नवनवां माधुरीं श्रावं श्रावं त्वां सेवेमहि॥]

१४. ये दास चार प्रकार के हैं—अधिकृत, आश्रित, पार्षद और अनुग। ।१८।

इनमें से अधिकृत—

१५. ब्रह्मा, शङ्कर, इन्द्र आदि को प्रबुद्ध-जनों ने 'अधिकृत' कहा है। इनका रूप प्रसिद्ध ही है, इसलिए इन की भक्ति की बात यहाँ कही जा सकती है। ।१९।

५. *"कौन चारों ओर घूम रही है?"-"ये अम्बिका हैं।" "श्रीहरि को पहचान कर कौन काँप रहा है?"-"ये शिव हैं।" "कौन श्रीहरि की स्तुति कर रहा है?" "ये ब्रह्मा हैं।" "धरती पर लोटते हुए यह कौन प्रणाम कर रहा है?"—"ये इन्द्र हैं।" "यह कौन स्तब्ध है? जिस पर दनुजों के शत्रु श्रीकृष्ण के अनुज हँस रहे हैं।"-"यह वास्तव में मेरा पूर्वज (बड़ा भाई) यम है"-इस प्रकार कालिन्दी ने जाल के छिद्रों में से जाम्बवती को (द्वारिका-सभा-प्रासाद में आये हुए) देवों का परिचय दिया।।२०।*

आश्रित—

१६. वे आश्रित तीन प्रकार के हैं—शरण्य, ज्ञानिचर और सेवानिष्ठ। ।२१।

यथा—

६. *हे वृन्दावन के उत्सवस्वरूप देव ! कोई लोग भीत होकर सब ओर से आपकी शरण का आश्रय लेते हैं, आपके अनुभव से जिन्होंने तत्त्व जान लिया है, ऐसे कोई-कोई हम-जैसे मोक्ष को काटकर, साधुओं के समूह से तुम्हारी नई-नई माधुरी को सुन-सुन कर आप की सेवा करते हैं। ।२२।*

तत्र शरण्याः—

१७. शरण्याः कालिय-जरासन्धबद्ध-नृपादयः ॥ (२३)

[कालिय-जरासन्धबद्धनृपादयः शरण्याः ॥]

यथा—

७. अपि गहनागसि नागे प्रभुवर! मय्यद्भुताद्य ते करुणा।
भक्तैरपि दुर्लभया यदहं पदमुद्रयोज्ज्वलितः ॥ (२४)

[प्रभुवर! गहनागसि मयि नागे अपि अद्य ते करुणा अद्भुता, यत् अहं भक्तैः अपि दुर्लभया (तव) पदमुद्रया उज्ज्वलितः ॥]

यथा वा अपराधभञ्जने—

८. कामादीनां कति न कतिधा पालिता दुर्निदेशा
जाता तेषां मयि न करुणा न त्रपा नोपशान्तिः।
उत्सृज्यैतानथ यदुपते! साम्प्रतं लब्धबुद्धिस्
त्वामायातः शरणमभयं मां नियुङ्क्ष्वात्मदास्ये ॥ (२५)

[कामादीनां कति न कतिधाः दुर्निदेशाः पालिताः, (किन्तु) तेषां मयि करुणा न जाता, न त्रपा न (च) उपशान्तिः। अथ तान् उत्सृज्य साम्प्रतं लब्धबुद्धिः यदुपते! त्वां शरणम् आयातः, माम् आत्मदास्ये अभयं नियुङ्क्ष्व ॥]

अथ ज्ञानिचराः—

१८. ये मुमुक्षां परित्यज्य हरिमेव समाश्रिताः।
[४]शौनकप्रमुखास्ते तु प्रोक्ता ज्ञानिचरा बुधैः ॥ (२६)

[ये मुमुक्षां परित्यज्य हरिम् एव समाश्रिताः ते शौनकप्रमुखाः तु बुधैः ज्ञानिचराः प्रोक्ताः ॥]

यथा हरिभक्तिसुधोदये—

९. अहो महात्मन्! बहुदोषदुष्टोऽप्येकेन भात्येष भवो गुणेन।
सत्सङ्गमाख्येन सुखावहेन कृताद्य नो येन कृशा मुमुक्षा ॥ (२७)

[अहो महात्मन्! बहुदोषदुष्टः अपि एषः भवः सुखावहेन सत्सङ्गमाख्येन एकेन गुणेन भाति, येन अद्य नः मुमुक्षा कृशा कृता ॥]

उनमें से शरण्य—

१७. कालिय नाग, जरासन्ध के बन्धन में पड़े हुए नृप आदि शरण्य (शरण में लेने योग्य) हैं। ।२३।

यथा—

७. हे प्रभुवर! गहरे पापी मुझ नाग पर भी आज आपकी अद्भुत करुणा है, जोकि मैं भक्तों को भी दुर्लभ (आपके) पदचिह्न से उज्ज्वल बना हूँ। ।२४।

अथवा यथा अपराध-भञ्जन में—

८. काम आदि के कितने ही दुष्ट निर्देशों का मैंने कितने प्रकार से पालन नहीं किया? उनकी तो मुझ पर कृपा नहीं हुई, न (उससे मुझे) लज्जा ही हुई, और न ही उपशान्ति हुई। हे यदुपते! अब इनको छोड़कर मुझे बुद्धि प्राप्त हुई है, आपकी शरण में आ गया हूँ; आप मुझे अभय बना कर अपने दास्य में नियुक्त करें। ।२५।

ज्ञानिचर—

१८. जो मुमुक्षा को छोड़कर हरि का ही आश्रय लेते हैं, वे शौनक आदि बुधजनों (समझ-युक्त व्यक्तियों) द्वारा ज्ञानिचर कहे गये हैं। ।२६।

यथा हरिभक्तिसुधोदय में—

९. अहो महात्मन्! बहुत दोषों से दुष्ट होने पर भी यह संसार एक गुण से सुशोभित है—जिस सत्सङ्ग-नामक सुखदायक गुण ने आज हमारी मुमुक्षा को क्षीण बना दिया है। ।२७।

यथा वा पद्यावल्याम्—

१०. ध्यानातीतं किमपि परमं ये तु जानन्ति तत्त्वं
तेषामास्तां हृदयकुहरे शुद्धचिन्मात्र आत्मा[५]।
अस्माकन्तु प्रकृतिमधुरः स्मेरवक्त्रारविन्दो
मेघश्यामः कनकपरिधिः पङ्कजाक्षोऽयमात्मा॥ (२८)

[ये तु ध्यानातीतं परमं किम् अपि तत्त्वं जानन्ति, तेषां हृदयकुहरे शुद्धचिन्मात्रः आत्मा आस्ताम्, अस्माकं तु अयं प्रकृतिमधुरः स्मेरवक्त्रारविन्दः मेघश्यामः कनकपरिधिः पङ्कजाक्षः (एव) आत्मा॥]

अथ सेवानिष्ठाः—

१९. मूलतो भजनासक्ताः सेवानिष्ठा इतीरिताः।
चन्द्रध्वजो हरिहयो[६] बहुलाश्वस्तथा नृपः॥
इक्ष्वाकुः श्रुतदेवश्च पुण्डरीकादयश्च ते॥ (२९)

[चन्द्रध्वजः, हरिहयः, तथा बहुलाश्वः नृपः, इक्ष्वाकुः, श्रुतदेवः च, ते पुण्डरीकादयः च मूलतः भजनासक्ताः सेवानिष्ठाः इति ईरिताः॥]

यथा—

११. आत्मारामानपि गमयति त्वद्गुणो गानगोष्ठीं
शून्योद्याने नयति विहगानप्यलं भिक्षुचर्याम्।
इत्युत्कर्षं कमपि सचमत्कारमाकर्ण्य चित्रं
सेवायां ते स्फुटमघहर! श्रद्धया गर्धितोऽस्मि॥ (३०)

[अघहर! त्वद्गुणः आत्मारामान् अपि गानगोष्ठीं गमयति, शून्योद्याने विहगान् अपि अलं भिक्षुचर्यां नयति, इति सचमत्कारं कम् अपि चित्रम् उत्कर्षम् आकर्ण्य ते सेवायां श्रद्धया स्फुटं गर्धितः अस्मि॥]

अथ पारिषदाः—

२०. उद्धवो दारुको जैत्रः श्रुतदेवश्च शत्रुजित्।
नन्दोपनन्द-भद्राद्याः पार्षदा यदुपत्तने॥ (३१)

[उद्धवः, दारुकः, जैत्रः, श्रुतदेवः, शत्रुजित् च, नन्द-उपनन्द-भद्राद्याः यदुपत्तने पार्षदाः॥]

अथवा यथा पद्यावली में—

१०. जो लोग ध्यान के अतीत किसी परम तत्त्व को जानते हैं, उनके हृदय-कुहर में शुद्ध चिन्मात्र आत्मा रहा करे, हमारा आत्मा तो यह स्वभाव-मधुर, मुस्कुराते हुए मुखारविन्द-वाला, मेघश्याम, सुनहरे परिधान-वाला कमलनयन (श्रीकृष्ण) है। ।२८।

सेवानिष्ठ—

१९. जो मूलतः भजन में आसक्त हैं, वे सेवानिष्ठ कहे गये हैं। वे हैं चन्द्रध्वज, हरिहय, राजा बहुलाश्व, इक्ष्वाकु तथा श्रुतदेव एवं पुण्डरीक आदि। ।२९।

यथा—

११. हे अघहर! तुम्हारा गुण आत्माराम जनों को भी गान-गोष्ठी में पहुँचा देता है; सूने उद्यान में पक्षियों को भी भिक्षुओं जैसे आचरण में ले जाता है;— इस प्रकार चमत्कारमय किसी अद्भुत उत्कर्ष को सुनकर मैं आपकी सेवा के प्रति स्फुट रूप से, श्रद्धा से लुब्ध हूँ। ।३०।

पारिषद—

२०. उद्धव, दारुक, जैत्र, श्रुतदेव, शत्रुजित्, नन्द, उपनन्द, भद्र आदि यदुपुर में पार्षद हैं॥ ।३१।

२१. नियुक्ताः सन्त्यमी मन्त्र-सारथ्यादिषु कर्मसु।
तथापि क्वाप्यवसरे परिचर्याञ्च कुर्वते।
कौरवेषु तथा भीष्म-परीक्षिद्विदुरादयः॥ (३२)

[अमी मन्त्रसारथ्यादिषु कर्मसु नियुक्ताः सन्ति, तथा अपि क्व अपि अवसरे परिचर्यां च कुर्वते, तथा कौरवेषु भीष्म-परीक्षित्-विदुरादयः॥]

तेषां रूपं, यथा—

१२. सरसाः सरसीरुहाक्षवेषा-
स्त्रिदिवेशावलिजैत्रकान्तिलेशाः।
यदुवीरसभासदः सदामी
प्रचुरालङ्करणोज्ज्वला जयन्ति॥ (३३)

[सरसाः सरसीरुहाक्षवेषाः त्रिदिवेशावलिजैत्रकान्तिलेशाः, अमी यदुवीरसभासदः सदा प्रचुरालङ्करणोज्ज्वलाः जयन्ति॥]

भक्तिः, यथा—

१३. शंसन् धूर्जटि-निर्जयादि-विरुदं बाष्पावरुद्धाक्षरं
शङ्का-पङ्कलवं मदादगणयन् कालाग्निरुद्रादपि।
त्वय्येवार्पितबुद्धिरुद्धवमुखस्त्वत्पार्षदानां गणो
द्वारि द्वारवतीपुरस्य पुरतः सेवोत्सुकस्तिष्ठति॥ (३४)

[धूर्जटिनिर्जयादिविरुदं बाष्पावरुद्धाक्षरं शंसन्, कालाग्निरुद्रात् अपि शङ्कापङ्कलवं मदात् अगणयन्, त्वयि एव अर्पितबुद्धिः उद्धवमुखः तवत्पार्षदानां गणः द्वारवतीपुरस्य द्वारि सेवोत्सुकः पुरतः तिष्ठति॥]

२२. एतेषां प्रवरः श्रीमानुद्धवः प्रेमविक्लवः॥ (३५)

[प्रेमविक्लवः श्रीमान् उद्धवः एतेषां प्रवरः॥]

तस्य रूपं, यथा—

१४. कालिन्दीमधुरत्विषं मधुपतेर्माल्येन निर्माल्यतां
लब्धेनाञ्चितमम्बुरेण च लसद्गोरोचना-रोचिषा।
द्वन्द्वेनार्गलसुन्दरेण भुजयोर्भ्राजिष्णुमब्जेक्षणं
मुख्यं पारिषदेषु भक्तिलहरीरुद्धं भजाम्युद्धवम्॥ (३६)

[कालिन्दीमधुरत्विषम्, मधुपतेः माल्येन निर्माल्यतां लब्धेन लसद्गोरोचनारोचिषा अम्बरेण अञ्चितम्, अर्गलसुन्दरेण भुजयोः द्वन्द्वेन भ्राजिष्णुम् भक्तिलहरीरुद्धम्, पारिषदेषु मुख्यम् उद्धवं भजामि॥]

२१. ये मन्त्रणा, सारथि-कर्म आदि में नियुक्त रहते हैं। कभी अवसर आने पर परिचर्या भी करते हैं। उसी प्रकार कौरवों में भीष्म, विदुर, परीक्षित् आदि हैं। ।३२।

उनका रूप, यथा—

१२. *यदुवीर के ये सभासद सरस हैं, कमललोचन श्रीकृष्ण के सदृश वेश पहने हैं, इनकी कान्ति स्वर्गपति देवराजों की कान्ति को भी जीतने वाली है। सदा प्रचुर अलङ्कारों से उज्ज्वल ये जययुक्त हैं। ।३३।*

उनकी भक्ति, यथा—

१३. *शिव पर श्रीकृष्ण की विजय आदि के विरुद को (आनन्दजनित) अश्रुओं से रुँधे (गद्गद) अक्षरों से कहते हुए, (भगवान् के पार्षद होने के) गर्व या मद के कारण कालाग्नि-रूप रुद्र से भी शङ्का (भय)-रूपी पङ्क को लवमात्र भी न गिनते हुए, आप ही में सम्पूर्ण बुद्धि अर्पित किये हुए-उद्धव आदि आपके पार्षदों का समूह द्वारिकापुरी के द्वार के सामने सेवा के लिए उत्सुक बैठा है। ।३४।*

२२. प्रेम से व्याकुल (परवश) श्रीमान् उद्धव इन (पार्षदों) में से श्रेष्ठ हैं। ।३५।

उनका रूप, यथा—

१४. *जिनकी कान्ति कालिन्दी जैसी (श्याम) मधुर है, जो मधुपति का निर्माल्य बने हुए (प्रसादी) माल्य से सुशोभित हैं, चमकते हुए गोरोचन की कान्ति वाले (पीले) वस्त्रों से सुसज्जित हैं, अर्गला जैसी सुन्दर सुदृढ़ दो भुजाओं से उज्ज्वल हैं, भक्ति की लहरों से जो रुँधे (वशीकृत) हैं, पार्षदों में मुख्य उन उद्धव को मैं भजता हूँ। ।३६।*

भक्तिः, यथा—

१५. मूर्धन्याहुकशासनं प्रणयते ब्रह्माण्डकोटीश्वरः।
सिन्धुं प्रार्थयते भुवं तनुतरां ब्रह्माण्डकोटीश्वरः।
मन्त्रं पृच्छति मामपेशलधियं विज्ञानवारांनिधिर्
विक्रीडत्यसकृद्विचित्रचरितः सोऽयं प्रभुर्मादृशाम्॥ (३७)

[ब्रह्मेशयोः शासिता मूर्धनि आहुकशासनं प्रणयते, ब्रह्माण्डकोटीश्वरः सिन्धुं तनुतरां भुवं प्रार्थयते, विज्ञानवारांनिधिः माम् अपेशलधियं मन्त्रं पृच्छति, विचित्रचरितः सः अयं मादृशां प्रभुः असकृत् विक्रीडति॥]

अथ अनुगाः—

२३. सर्वदा परिचर्यासु प्रभोरासक्तचेतसः।
पुरस्थाश्च व्रजस्थाश्चेत्युच्यन्ते[७] अनुगा द्विधा॥ (३८)

[प्रभोः परिचर्यासु सर्वदा आसक्तचेतसः अनुगाः पुरस्थाः च व्रजस्थाः च इति द्विधा उच्यन्ते॥]

तत्र पुरस्थाः—

२४. सुचन्द्रो मण्डनः स्तम्बः सुतन्वाद्याः पुरानुगाः।
एषां पार्षदवत् प्रायो रूपालङ्करणादयः॥ (३९)

[सुचन्द्रः, मण्डनः, स्तम्बः, सुतन्व-आद्याः, पुरानुगाः। एषां रूपालङ्करणादयः प्रायः पार्षदवत्॥]

सेवा, यथा—

१६. उपरि कनकदण्डं मण्डनो विस्तृणीते
धुवति किल सुचन्द्रश्चामरं चन्द्रचारुम्।
उपहरति सुतन्वः सुष्ठु ताम्बूलवीटीं
विदधति परिचर्यां साधवो माधवस्य॥ (४०)

[मण्डनः उपरि कनकदण्डं विस्तृणीते, सुचन्द्रः किल चन्द्रचारुं चामरं धुन्वति, सुतन्वः सुष्ठु ताम्बूलवीटीम् उपहरति, साधवः माधवस्य परिचर्यां विदधति॥]

उनकी भक्ति, यथा-

१५. *ब्रह्मा और शिव पर शासन करनेवाले ये (श्रीकृष्ण) आहुक (उग्रसेन) की आज्ञा को मस्तक पर धारण करते हैं, कोटि-ब्रह्माण्डों के ईश्वर (शास्ता) हैं वे समुद्र से थोड़ी-सी भूमि (द्वारिका बसाने के लिये) माँगते हैं, जो विज्ञान के सागर हैं, वे मुझ मन्दबुद्धि से मन्त्रणा लेते एवं पूछते हैं—ऐसे विचित्र चरित्र वाले ये मुझ जैसों के प्रभु वारम्वार क्रीडा कर रहे हैं। ।३७।*

अनुग—

२३. प्रभु की परिचर्या में जिनका चित्त सर्वदा आसक्त है, वे अनुग द्विविध हैं—पुर में स्थित और व्रज में स्थित। ।३८।

उनमें से पुर-स्थित—

२४. सुचन्द्र, मण्डन, स्तम्ब, सुतन्व, सुधन्वा आदि पुर में रहनेवाले अनुग हैं। इनके रूप और अलङ्करण आदि प्राय: पार्षदों जैसे ही होते हैं। ।३९।

इनके द्वारा सेवा, यथा—

१६. *मण्डन उन (श्रीकृष्ण) के ऊपर कनकदण्ड वाला छत्र फैला रहा है, सुचन्द्र चन्द्रमा जैसा सुन्दर शुभ्र चामर डुला रहा है, सुतन्व ताम्बूल का बीड़ा भली-भाँति सामने रख रहा है; इस प्रकार (ये) साधुजन माधव की परिचर्या कर रहे हैं। ।४०।*

अथ व्रजस्थाः—

२५. रक्तकः पत्रकः पत्री मधुकण्ठो मधुव्रतः।
रसालः सुविलासश्च प्रेमकन्दो मरन्दकः॥ (४१)

[रक्तकः, पत्रकः, पत्री, मधुकण्ठः, मधुव्रतः, रसालः सुविलासः च, प्रेमकन्दः, मरन्दकः॥]

२६. आनन्दश्चन्द्रहासश्च पयोदो बकुलस्तथा।
रसदः शारदाद्याश्च व्रजस्था अनुगा मताः॥ (४२)

[आनन्दः, चन्द्रहासः च, पयोदः, बकुलः तथा रसदः, शारदाद्याः च, व्रजस्थाः अनुगाः मता॥]

एषां रूपं, यथा—

१७. मणिमयवरमण्डनोज्ज्वलाङ्गान्
पुरट-जवा-मधुलिट्-पटीर-भासः।
निजवपुरनुरूप-दिव्य-वस्त्रान्
व्रजपतिनन्दन-किङ्करान्नमामि॥ (४३)

[मणिमयवरमण्डनोज्ज्वलाङ्गान्, पुरट-जवा-मधुलिट्-पटीरभासः, निजवपुरनुरूप-दिव्यवस्त्रान्, व्रजपतिनन्दनकिङ्करान् नमामि॥]

सेवा, यथा—

१८. द्रुतं कुरु परिष्कृतं बकुल! पीतपट्टांशुकं
वरैरगुरुभिर्जलं रचय वासितं वारिद!
रसाल! परिकल्पयोरगलतादलैर्वीटिकाः
परागपटली गवां दिशमरुन्ध पौरन्दरीम्॥ (४४)

[बकुल! पीतपट्टांशुकं द्रुतं परिष्कृतं कुरु। वारिद! वरैः अगुरुभिः वासितं जलं रचय! रसाल! उरगलतादलैः वीटिकाः कल्पय, गवां परागपटली पौरन्दरीं दिशंम् अरुन्ध॥]

२७. व्रजानुगेषु सर्वेषु वरीयान् रक्तको मतः। (४५)

[सर्वेषु व्रजानुगेषु रक्तकः वरीयान् मतः॥]

व्रजस्थ अनुग—

२५-२६. रक्तक, पत्रक, पत्री, मधुकण्ठ, मधुव्रत, रसाल और सुविलास, प्रेमकन्द, मरन्दक,आनन्द और चन्द्रहास, पयोद, बकुल, रसद, शारद आदि व्रजस्थ अनुग माने गये हैं। ।४१-४२।

इनका रूप, यथा—

१७. *मणिमय, श्रेष्ठ आभूषणों से जिन के अङ्ग उज्ज्वल हैं, सुवर्ण, जवा, भ्रमर, चन्दन जैसी जिनकी आभा है, जिनके दिव्य वस्त्र अपने-अपने शरीर के अनुरूप हैं, ऐसे व्रजेश (नन्द) के नन्दन (पुत्र)के किङ्करों को मैं नमस्कार करता हूँ। ।४३।*

सेवा, यथा—

१८. *हे बकुल! पीले रेशमी वस्त्र को शीघ्र परिष्कृत करो; वारिद! श्रेष्ठ अगर से सुवासित जल बनाओ; रसाल! नागवल्ली (ताम्बूललता) के पत्तों के बीड़े बनाओ! (देखो!) गायों की पराग-पटली (गोधूलि की श्रेणी) ने इन्द्र की दिशा (पूर्व) को ढक दिया है। (साँझ हो रही है, कन्हैया वन से लौट रहा होगा।) ।४४।*

२७. सभी व्रजस्थ अनुगों में से रक्तक को श्रेष्ठ माना गया है। ।४५।

अस्य रूपं, यथा—

१९. रम्यपिङ्गपटमङ्गरोचिषा
खर्वितोरुशतपर्विकारुचम्।
सुष्ठु गोष्ठयुवराजसेविनं
रक्तकण्ठमनुयामि रक्तकम्॥ (४६)

[रम्यपिङ्गपटम्, अङ्गरोचिषा खर्वितोरुशतपर्विका-रुचम्, सुष्ठु गोष्ठयुवराजसेविनम्, रक्तकण्ठम् रक्तकम् अनुयामि॥]

भक्तिः, यथा—

२०. गिरिवरभृति भर्तृदारकेऽस्मिन्
व्रजयुवराजतया गते प्रसिद्धिम्।
शृणु रसद! सदा पदाभिसेवा-
पटिमरता रतिरुत्तमा ममास्तु॥ (४७)

[शृणु रसद! अस्मिन् गिरिवरभृति भर्तृदारके व्रजयुवराजतया प्रसिद्धिं गते सदा पदाभिसेवापटिमरता मम उत्तमा रतिः अस्तु॥]

२८. धुर्यो धीरश्च वीरश्च त्रिधा परिषदादिकः; (४८)

[धुर्यः, धीरः च वीरः च (इति) पारिषदादिकः त्रिधा॥]

तत्र धुर्यः—

२९. कृष्णेऽस्य प्रेयसीवर्गे दासादौ च यथायथम्।
यः प्रीतिं तनुते भक्तः[८] स धुर्य इह[९] कीर्त्यते॥ (४९)

[कृष्णे, अस्य प्रेयसीवर्गे, दासादौ च यः यथायथं प्रीतिं तनुते, सः भक्तः इह धुर्यः कीर्त्यते॥]

यथा—

२१. देवः सेव्यतया यथा स्फुरति मे देव्यस्तथास्य प्रियाः
सर्वः प्राणसमानतां प्रचिनुते[१०] तद्भक्तिभाजां गणः।
स्मृत्वा साहसिकं बिभेमि तमहं भक्ताभिमानोन्नतं
प्रीतिं तत्प्रणते खरेऽप्यविदधद्यः स्वास्थ्यमालम्बते॥ (५०)

[यथा देवः मे सेव्यतया स्फुरति, तथा अस्य प्रियाः देव्यः, तद्भक्तिभाजां सर्वः गणः प्राणसमानतां वितनुते, तं साहसिकं भक्ताभिमानोन्नतं स्मृत्वा अहं बिभेमि, यः तत्प्रणते खरे अपि प्रीतिम् अविदधत् स्वास्थ्यम् आलम्बते॥]

उसका रूप, यथा—

१९. *सुन्दर सुनहले वस्त्र पहने, अङ्गकान्ति से उत्तम दूर्वा की कान्ति को तुच्छ बनाने वाले, गोष्ठ (व्रज) के युवराज (श्रीकृष्ण) की भली-भाँति सेवा करनेवाले, मनोहर कण्ठ वाले रक्तक का मैं अनुगमन करता हूँ। ।४६।*

उसकी भक्ति, यथा—

२०. *हे रसद! सुनो, गिरिवर को धारण करने वाले, व्रज के युवराज के रूप में प्रसिद्ध हुए, इस स्वामीपुत्र में सदा ही चरण-सेवा के कौशल में रत मेरी उत्तम रति बनी रहे। ।४७।*

२८. धुर्य, धीर और वीर—इस प्रकार पारिषद (पार्षद) आदि तीन प्रकार के हैं। ।४८।

उनमें से धुर्य—

२९. श्रीकृष्ण तथा उनके प्रेयसी-वर्ग में एवं दास आदि में जो यथोचित प्रीति का विस्तार करता है, वह भक्त यहाँ धुर्य कहलाता है। ।४९।

यथा—

२१. *जैसे मेरे देव सेव्य के रूप में स्फुरित होते हैं, उसी प्रकार उनकी प्रिया देवियाँ और उनके भक्तों का समूह प्राण के समान हो रहा है। मैं तो उस साहसिक और भक्त होने के अभिमान से ऊँचे उठे (उद्धत) जन का स्मरण करके भय पाता हूँ, जो उन प्रभु के प्रति प्रणत गधे पर भी प्रीति न करता हुआ स्वस्थ बना रहता है। (अर्थात् प्रभु के प्रति प्रणत जीवमात्र प्रणम्य एवं प्रीति-योग्य है।) ।५०।*

अथ धीरः—

३०. आश्रित्य प्रेयसीमस्य नातिसेवापरोऽपि यः।
तस्य प्रसादपात्रं स्यान्मुख्यं धीरः स उच्यते॥ (५१)

[अस्य प्रेयसीम् आश्रित्य नातिसेवापरः अपि यः तस्य मुख्यं प्रसादपात्रं स्यात्, सः धीरः उच्यते॥]

यथा—

२२. कमपि पृथगनुच्चैर्नाचरामि प्रयत्नं
यदुकुल-कमलार्क! त्वत्प्रसादश्रियेऽपि।
समजनि ननु देव्याः पारिजातार्चितायाः
परिजननिखिलान्तःपातिनी[११] मे यदाख्या॥ (५२)

[यदुकुल-कमलार्क! त्वत्प्रसादश्रिये अपि कम् अपि अनुच्चैः पृथक् यत्नं न आचरामि, यत् पारिजातार्चितायाः देव्याः परिजननिखिलान्तःपातिनी मे आख्या ननु समजनि॥]

अथ वीरः—

३१. कृपां तस्य समाश्रित्य प्रौढां नान्यमपेक्षते।
अतुलां यों वहन् कृष्णे प्रीतिं वीरः स उच्यते॥ (५३)

[तस्य प्रौढां कृपां समाश्रित्य कृष्णे अतुलां प्रीतिं वहन् यः अन्यं न अपेक्षते; सः वीरः उच्यते॥]

यथा—

२३. प्रलम्बरिपुरीश्वरो भवतु का कृतिस्तेन मे
कुमार-मकरध्वजादपि न किञ्चिदास्ते फलम्।
किमन्यदहमुद्धतः प्रभुकृपा-कटाक्षश्रिया
प्रिया-परिषदग्रिमां न गणयामि भामामपि॥ (५४)

[प्रलम्बरिपुः ईश्वरः भवतु, तेन मे का कृतिः? कुमारमकरध्वजात् अपि किञ्चित् फलं न आस्ते। प्रभुकृपाकटाक्षश्रिया अहं कियत् उद्धतः (यत्) प्रियापरिषदग्रिमां भामाम् अपि न गणयामि॥]

धीर—

३०. जो श्रीकृष्ण की प्रेयसी का आश्रय लेकर, उन (श्रीकृष्ण) का बहुत सेवापरायण न होते हुए भी, उनका मुख्य प्रसादपात्र बन जाता है, वह धीर कहलाता है। ।५१।

यथा—

२२. *हे यदुकुल-कमल के सूर्य! तुम्हारी प्रसादश्री के लिए मैं पृथक्-रूप से थोड़ा-सा भी प्रयत्न नहीं करता हूँ, क्योंकि पारिजात से अर्चित देवी के परिजन-समूह के बीच में मेरी गिनती हो गई है। ।५२।*

वीर—

३१. उनकी प्रौढ़ कृपा का आश्रय लेकर जो दूसरे की अपेक्षा नहीं करता, कृष्ण पर अतुल प्रीति रखने वाला वह वीर कहलाता है। ।५३।

यथा—

२३. *प्रलम्ब के शत्रु (बलराम) ईश्वर भले हों, उससे मुझे क्या करना है? कुमार मकरध्वज अर्थात् प्रद्युम्न से भी मुझे कुछ प्रयोजन नहीं, कुछ लेना नहीं; कहाँ तक कहें, प्रभु-कृपा-कटाक्ष की श्री से मैं इतना उद्धत हो गया हूँ कि प्रियाओं की परिषद् में जो सबसे आगे (प्रमुख) हैं उन सत्यभामा को भी मैं नहीं गिनता। ।५४।*

चतुर्थे च (भा०/४/२०/२८)—

२४. जगज्जनन्यां जगदीश! वैशसं
स्यादेव यत् कर्मणि नः समीहितम्।
करोषि फल्ग्वप्युरु दीनवत्सलः
स्व एव धिष्ण्येऽभिरतस्य किं तया? (५५)

[जगदीश! जगज्जनन्यां वैशसं स्यात् एव, यत् दीनवत्सलः (त्वम्) नः कर्मणि समीहितं फल्गु अपि उरु करोषि, स्वे एव धिष्ण्ये अभिरतस्य तया (श्रिया) किम्?]

३२. एतेषु तस्य दासेषु त्रिविधेष्वाश्रितादिषु।
नित्यसिद्धाश्च सिद्धाश्च साधकाः[१२] परिकीर्तिताः॥ (५६)

[तस्य आश्रितादिषु एतेषु त्रिविधेषु दासेषु नित्यसिद्धाः च सिद्धाः च साधकाः परिकीर्त्तिताः॥]

अथ उद्दीपनाः—

३३. अनुग्रहस्य सम्प्राप्तिस्तस्याङ्घ्रिरजसां तथा।
भुक्तावशिष्टभक्तादेरपि तद्भक्त-सङ्गतिः।
इत्यादयो विभावाः स्युरेष्वसाधारणा मताः॥ (५७)

[एषु अनुग्रहस्य सम्प्राप्तिः, तस्य अङ्घ्रिरजसां तथा भुक्तावशिष्टभक्तादेः अपि (सम्प्राप्तिः), तद्भक्तसङ्गतिः इत्यादयः असाधारणाः मताः विभावाः स्युः॥]

तत्र अनुग्रहसम्प्राप्तिः, यथा—

२५. कृष्णस्य पश्यत कृपां कृपाढ्याः! कृपणे मयि।
ध्येयोऽसौ निधने हन्त दृशोरध्वानमभ्यगात्॥ (५८)

[कृपाढ्याः! मयि कृपणे कृष्णस्य कृपां पश्यत! निधने ध्येयः असौ हन्त दृशोः अध्वानम् अभ्यगात्॥]

३४. मुरलीशृङ्गयोः स्वानः स्मितपूर्वावलोकनम्।
गुणोत्कर्षश्रुतिः पद्म-पदाङ्क-नवनीरदाः।
तदङ्गसौरभाद्यास्तु सर्वैः साधारणा मताः॥ (५९)

[मुरलीशृङ्गयोः स्वानः, स्मितपूर्व-अवलोकनम्, गुणोत्कर्षश्रुतिः, पद्मपदाङ्कनवनीरदाः, तदङ्गसौरभाद्याः तु सर्वैः साधारणाः मताः॥]

भागवत- चतुर्थ में भी (भा. ४/२०/२८)—

> २४. *हे जगदीश! जगज्जननी लक्ष्मी के प्रति मेरा अपराध हुआ करे, क्योंकि आपकी चरण-सेवारूपी उनका सेवाकर्म मुझे भी अभीष्ट हैं। आप दीनवत्सल हैं जो कि तुच्छ को भी श्रेष्ठ बनाते हैं। अपने ही स्थान अर्थात् आपके चरण में जो अभिरत है, उसे लक्ष्मी से क्या प्रयोजन? ।५५।*

३२. उनके आश्रित आदि तीनों प्रकार के दासों में नित्यसिद्ध और साधक-ऐसे तीन भेद कहे गये हैं। ।५६।

उद्दीपन—

३३. इन दासों में अनुग्रह, उन (स्वामी श्रीकृष्ण) की चरणधूलि तथा उनके भोजन से बची हुई जूठन की प्राप्ति, उनके भक्तों की सङ्गति आदि असाधारण माने गये विभाव (उद्दीपन) होते हैं। ।५७।

उनमें से अनुग्रह तथा सम्प्राप्ति, यथा—

> २५. *हे—कृपाचार्य आदि आर्यगण! मुझ कृपण पर श्रीकृष्ण की कृपा देखिये! योगियों के ध्यान के विषय ये आज मृत्यु के समय मेरी आँखों के मार्ग में आ गये हैं (मुझे इनका दर्शन प्राप्त हो रहा है।) ।५८।*

३४. मुरली और सींगे की ध्वनि, स्मित-पूर्वक अवलोकन, गुणोत्कर्ष का श्रवण, पद्म, चरणचिह्न, नवीन मेघ, उनके अङ्ग का सौरभ आदि-ये सभी के द्वारा मुख्य रसों के साथ साधारण उद्दीपन-विभाव माने गये हैं। ।५९।

तत्र मुरलीस्वनो, यथा विदग्धमाधवे—

२६. सोत्कण्ठं मुरलीकला-परिमलानाकर्ण्य घूर्णत्तनो-
रेतस्याक्षिसहस्रतः सुरपतेरश्रूणि सस्रुर्भुवि[१३]।
चित्रं वारिधरान् विनापि तरसा यैरद्य धारामयै-
र्दूरात् पश्यत देवमातृकमभूद् वृन्दाटवीमण्डलम्॥ (६०)

[दूरात् पश्यत! मुरलीकलापरिमलान् सोत्कण्ठम् आकर्ण्य घूर्णत्तनोः सुरपतेः अक्षिसहस्रतः अश्रूणि भुवि सस्रुः, यैः धारामयैः अद्य वारिधरान् विना अपि तरसा वृन्दाटवीमण्डलं देवमातृकम् अभूत्॥]

अथ अनुभावाः—

३५. सर्वतः स्वनियोगानामाधिक्येन परिग्रहः।[१४]
ईर्ष्या-लवेन चास्पृष्टा मैत्री तत्प्रणते जने।
तन्निष्ठताद्याः शीताः स्युरेष्वसाधारणाः क्रियाः॥ (६१)

[स्वनियोगानां सर्वतः आधिक्येन परिग्रहः, तत्प्रणते जने च ईर्ष्यालवेन अस्पृष्टा मैत्री, तन्निष्ठताद्याः शीताः एषु असाधारणाः क्रियाः स्युः॥]

तत्र स्वनियोगस्य सर्वत आधिक्यं, यथा—

२७. अङ्गस्तम्भारम्भमुत्तुङ्गयन्तं
प्रेमानन्दं दारुको नाभ्यनन्दत्।
कंसारातेर्वीजने येन साक्षा-
दक्षोदीयानन्तरायो व्यधायि॥ (६२)

[दारुकः अङ्गस्तम्भारम्भम् उत्तुङ्गयन्तं प्रेमानन्दं न अभ्यनन्दत् येन कंसारातेः वीजने साक्षात् अक्षोदीयान् अन्तरायः अभूत्॥]

३६. उद्भास्वराः पुरोक्ता ये तथास्य सुहृदादरः।[१५]
विरागाद्याश्च ये शीताः प्रोक्ताः साधारणास्तु ते॥ (६३)

[पुरा ये उद्भास्वराः उक्ताः तथा अस्य सुहृदादरः, विरागाद्याः च ये शीताः प्रोक्ताः, ते तु साधारणाः॥]

उनमें से मुरलीध्वनि, यथा विदग्धमाधव में—

२६. *उत्कण्ठा के साथ मुरली की कला के परिमलों को सुन कर सुरपति का शरीर चक्कर खाने लगा, और उनकी सहस्र आँखों से पृथ्वी पर अश्रु चूने लगे। जिनके धारामय रूप से-देखो तो कैसी विचित्र बात है कि,—मेघों के बिना भी तुरन्त वृन्दाटवी का मण्डल देव-मातृक हो गया, अर्थात् दूर से वृष्टि के जल से पालित दिखाई देने लगा। ।६०।*

अब, अनुभाव—

३५. अपने नियोगों का सब ओर से अधिकता से ग्रहण, उन (प्रभु) के प्रति प्रणत व्यक्ति के प्रति ईर्ष्या-लेश के स्पर्श से भी रहित मैत्री, उन (श्रीकृष्ण) में निष्ठा आदि शीत असाधारण क्रियायें इनमें होती हैं। ।६१।

उसमें, अपने नियोग का सबसे आधिक्य (समझना), यथा—

२७. *दारुक ने अपने भीतर उमड़ते प्रेमानन्द को अच्छा नहीं माना क्योंकि वह अङ्गों में स्तब्धता बढ़ा रहा था, जिससे कि कंस शत्रु (श्रीकृष्ण) को पंखा झलने में सीधा बहुत बड़ा अन्तराय (व्यवधान) पड़ रहा था। (ऐसा प्रेमानन्द भी भला नहीं जो मुझे मिले सेवा-कर्म में बाधा डाले।) ।६२।*

३६. पहले जो (नृत्य, लोट-पोट होना आदि) उद्भास्वर कहे गये हैं वे तथा प्रभु के सुहृदों का आदर एवं विराग आदि जो शीत कहे गये हैं—वे सब साधारण हैं। ।६३।

तत्र नृत्यं, यथा श्रीदशमे (१०/८६/३८)—

२८. श्रुतदेवोऽच्युतं प्राप्तं स्वगृहान् जनको यथा।
नत्वा मुनींश्च संहृष्टो धुन्वन् वासो ननर्त ह॥ (६४)

[श्रुतदेवः स्वगृहान् प्राप्तम् अच्युतं मुनीन् च नत्वा, यथा जनकः, संहृष्टः वासः धुन्वन् ननर्त ह॥]

यथा वा—

२९. त्वं कलासु विमुखोऽपि नर्तनं
प्रेमनाट्य-गुरुणासि पाठितः।
यद्विचित्र-गतिचर्ययाञ्चित-
श्चित्रयस्यहह चारणानपि॥ (६५)

[त्वं कलासु विमुखः अपि, प्रेमनाट्यगुरुणा नर्तनं पाठितः असि, यत् विचित्रगतिचर्यया अञ्चितः अहह! चारणान् अपि चित्रयसि॥]

अथ सात्त्विकाः—

३७. स्तम्भाद्याः सात्त्विकाः सर्वे प्रीतादित्रितये मताः। (६६)

[सर्वे स्तम्भाद्याः सात्त्विकाः प्रीतादित्रितये मताः॥]

यथा—

३०. गोकुलेन्द्र-गुणगान-रसेन
स्तम्भमद्भुतमसौ भजमानः।
पश्य भक्तिरसमण्डपमूल-
स्तम्भतां वहति वैष्णववर्यः॥ (६७)

[पश्य! गोकुलेन्द्रगुणगानरसेन अद्भुतस्तम्भं भजमानः असौ वैष्णववर्यः भक्तिरसमण्डपमूलस्तम्भतां वहति॥]

श्रीदशमे (१०/८५/३८)—

३१. स इन्द्रसेनो भगवत्पदाम्बुजं
बिभ्रन्मुहुः प्रेमविभिन्नया धिया।
उवाच हानन्दजलाकुलेक्षणः
प्रहृष्टरोमा नृप! गद्गदाक्षरम्॥ (६८)

[नृपः सः इन्द्रसेनः भगवत्पदाम्बुजं प्रेमविभिन्नया धिया मुहुः बिभ्रत् आनन्दजलाकुलेक्षणः, प्रहृष्टरोमा गद्गदाक्षरम् उवाच ह॥]

इनमें से नृत्य, यथा श्रीदशम में (भा. १०/८६/३८)—

२८. *श्री अच्युत को अपने घर आये हुए देखकर श्रुतदेव जनक की भाँति उन्हें तथा (उनके साथ आये) मुनिजनों को प्रणाम करके अतीव हर्ष-विभोर होकर (कम्प से) वस्त्रों को भी झटक डालता हुआ नाचने लगा।* ।६४।

और भी, यथा—

२९. *कलाओं से विमुख होते हुए भी तुम को प्रेमरूपी नाट्यगुरु के द्वारा नर्तनकला सिखा दी गयी है; जिससे कि विचित्र-गति-चर्याओं से खँचे (भरे) हुए तुम चारणों को भी आश्चर्य-चकित चित्रलिखे से बना दे रहे हो।* ।६५।

अब सात्त्विकभाव—

३७. प्रीत आदि तीन रसों में सभी स्तम्भ आदि सात्त्विक भाव माने गये हैं। ।६६।

यथा—

३०. *गोकुलेन्द्र श्रीकृष्ण के गुणगान के रस से मत्त होकर अद्‌भुत स्तम्भ-दशा में पहुँचा हुआ यह वैष्णवश्रेष्ठ देखो! मानो भक्तिरस रूपी मण्डप का मूल-स्तम्भ ही बना हुआ है।* ।६७।

श्रीदशम में भी (भा. १०/८५/३८)—

३१. *हे राजन्! वह इन्द्रसेन (बलि) भगवान् (वामन) के चरणकमल को मस्तक पर धारण किये हुए, प्रेम-आवेग से बिंधी हुई बुद्धि वाला एवं आनन्द-अश्रुओं से आकुल नयनों वाला होकर, सर्वाङ्ग में हर्ष रोमाञ्च से भरा गद्‌गद अक्षरों से बोलने लगा।* ।६८।

अथ व्यभिचारिणः—

३८. हर्षो गर्वो धृतिश्चात्र[१७] निर्वेदोऽथ विषण्णता।
दैन्यं चिन्ता स्मृतिः [१८]शङ्का मतिरौत्सुक्यचापले॥ (६९)

[अत्र हर्षः, गर्वः, धृतिः च, निर्वेदः अथ विषण्णता, दैन्यम्, चिन्ता, स्मृतिः, शङ्का, मतिः, औत्सुक्य-चापले॥]

३९. वितर्कावेग-ह्री-जाड्य[१९]-मोहोन्मादावहित्थिकाः।
बोधः स्वप्नः क्लमो व्याधिर्मृतिश्च व्यभिचारिणः॥ (७०)

[वितर्कावेग-ह्री-जाड्य-मोहोन्मादावहित्थिकाः, बोधः, स्वप्नः, क्लमः, व्याधिः, मृतिः च व्यभिचारिणः॥]

४०. इतरेषां मदादीनां नातिपोषकता भवेत्।
योगे त्रयः स्युर्धृत्यन्ता[२०] अयोगे तु क्लमादयः।
उभयत्र परे शेषा निर्वेदाद्याः सतां मताः॥ (७१)

[इतरेषां मदादीनाम् अति-पोषकता न भवेत्। योगे धृत्यन्ताः त्रयः स्युः, अयोगे तु क्लमादयः। उभयत्र निर्वेदाद्याः परे शेषाः सतां मता॥]

तत्र हर्षो, यथा प्रथमे (भा० १/११/५)—

३२. प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्ष-गद्गदया गिरा।
पितरं सर्वसुहृदमवितारमिवार्भकाः॥ (७२)

[प्रीत्युत्फुल्लमुखाः हर्षगद्गदया गिरा सर्वसुहृदं पितरम् अवितारम् अर्भकाः इव प्रोचुः॥]

यथा वा—

३३. हरिमवलोक्य पुरो भुवि
पतितो दण्डप्रणाम-शतकामः।
प्रमदविमुग्धो नृपतिः
पुनरुत्थानं विसस्मार॥ (७३)

[हरिं पुरः अवलोक्य दण्डप्रणामशतकामः प्रमदविमुग्धः भुवि पतितः नृपतिः पुनरुत्थानं विसस्मार॥]

अब व्यभिचारीभाव—

३८-३९. यहाँ-हर्ष, गर्व, धृति, निर्वेद, विषण्णता, दैन्य, चिन्ता, स्मृति, शङ्का, मति, औत्सुक्य, चपलता, वितर्क, आवेग, लज्जा, जडता, मोह (मूर्च्छा), उन्माद, अवहित्था, बोध, स्वप्न, क्लान्ति (थकान), व्याधि, मरण—ये व्यभिचारीभाव होते हैं। ।६९-७०।

४०. अन्य मद आदि में अतिपोषकता नहीं होती। वे हों तो हर्ष, गर्व, धृति ये तीन होते हैं, वे (मद आदि) न हों तो क्लम आदि होते हैं। दोनों ही स्थितियों में अन्य शेष निर्वेद आदि का होना सज्जनों ने माना है। ।७१।

इनमें से हर्ष, यथा प्रथम में (भा. १/११/५)—

३२. प्रीति (प्रसन्नता) से खिले-खिले मुखवाले वे सब हर्ष से गद्गद हुई वाणी से सब के रक्षक एवं मित्र (श्रीकृष्ण) से ऐसे बोले जैसे बालक पिता से बोलते हैं। ।७२।

अथवा यथा—

३३. सामने ही श्रीहरि को देखकर शत-शत दण्डवत् प्रणाम करने की इच्छा से राजा भूमि पर गिरा, अतिशय आनन्द के प्रचुर मद से विमुग्ध हुआ वह फिर उठना भूल ही गया। ।७३।

क्लमो, यथा स्कान्दे—

३४. अशोषयन्मनस्तस्य म्लापयन्मुखपङ्कजम्।
आधिस्त्वद्विरहे देव! ग्रीष्मे सर इवांशुमान्॥ (७४)

[देव! त्वद्विरहे आधिः ग्रीष्मे सरः इव अंशुमान् तस्य मनः अशोषयत्, मुखपङ्कजं म्लापयत् (च)॥]

निर्वेदो, यथा—

३५. धन्याः स्फुरन्ति तव सूर्य! कराः सहस्रं
ये सर्वदा यदुपतेः पदयोः पतन्ति।
वन्ध्या दृशां दशशती ध्रियते ममासौ[२१]
दूरे मुहूर्तमपि या न विलोकते तम्॥ (७५)

[सूर्य! तव सहस्रं कराः धन्याः स्फुरन्ति, ये सर्वदा यदुपतेः पदयोः पतन्ति। मम असौ दृशां दशशती वन्ध्या ध्रियते या तं दूरे मुहूर्तम् अपि न विलोकते॥]

अथ स्थायी—

४१. सम्भ्रमः प्रभुताज्ञानात् कम्पश्चेतसि सादरः।
अनेनैक्यं गता प्रीतिः सम्भ्रमप्रीतिरुच्यते।
एषा रसेऽत्र कथिता स्थायिभावतया बुधैः॥ (७६)

[प्रभुताज्ञानात् सम्भ्रमः, चेतसि सादरः कम्पः, अनेन ऐक्यं गता प्रीतिः सम्भ्रमप्रीतिः उच्यते। एषा अत्र रसे बुधैः स्थायिभावतया कथिता॥]

४२. आश्रितादेः पुरैवोक्तः प्रकारो रतिजन्मनि।
तत्र पारिषदादेस्तु हेतुः संस्कार एव हि।
संस्कारोद्बोधकास्तस्य दर्शनश्रवणादयः॥ (७७)

[आश्रितादेः रतिजन्मनि प्रकारः पुरा एव उक्तः, तत्र पारिषदादेः तु हेतुः संस्कारः एव हि। तस्य दर्शनश्रवणादयः संस्कारोद्बोधकाः॥]

४३. एषा[२२] तु सम्भ्रमप्रीतिः प्राप्नुवत्युत्तरोत्तराम्।
वृद्धिं प्रेमा ततः स्नेहस्ततो राग इति त्रिधा॥ (७८)

[एषा तु सम्भ्रमप्रीतिः ततः (सा) प्रेमा, ततः स्नेहः ततः रागः इति त्रिधा उत्तरोत्तरां वृद्धिं प्राप्नुवति।]

क्लम (क्लान्ति)यथा स्कन्दपुराण में—

३४. *हे देव! आपके विरह में उत्पन्न आधि (मनोरोग) ने उसके मुखकमल को म्लान करते हुए उसके मनको उसी प्रकार सोख लिया जिस प्रकार ग्रीष्म ऋतु में सूर्य सरोवर को सोख लेता है।* ।७४।

निर्वेद, यथा स्कन्दपुराण में—

३५. *हे सूर्य! तुम्हारे ये सहस्र हाथ (किरणें) धन्य स्फुरित होते हैं, जो सर्वदा यदुपति के चरणों पर गिरते हुए उन्हें प्रणाममय स्पर्श करते हैं। मैं तो ये सहस्र नयन व्यर्थ ही धारण किये हुए हूँ जो दूर से भी, मुहूर्त्त भर को भी उन्हें देख नहीं पाते।* ।७५।

अब स्थायिभाव—

४१. श्रीहरि की प्रभुता के बोध से संभ्रम (घबराहट भरा सम्मान-भाव), चित्त में आदरपूर्ण कम्प,—इनसे अभिन्न हुई प्रीति सम्भ्रमप्रीति कहलाती है। उसी को बुधजनों ने इस रस का स्थायीभाव कहा है। ।७६।

४२. आश्रित आदि के प्रकार पहले (भावसामान्य-प्रकरण में) ही कहे जा चुके हैं। पार्षद आदि की श्रीहरि में रति के जन्म में हेतु तो उनका संस्कार ही है। उस संस्कार के उद्बोधक होते हैं श्रीहरि का दर्शन (उनके नाम-गुण-लीला आदि का) श्रवण इत्यादि। ।७७।

४३. यह सम्भ्रमप्रीति उत्तरोत्तर वृद्धि पाती हुई क्रमशः प्रेम, स्नेह फिर राग—ऐसे तीन प्रकार की होती है। ।७८।

तत्र सम्भ्रमप्रीतिः, यथा श्रीदशमे (भा० १०/३८/६)—

३६. ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम्॥ (७९)

[अद्य मे अमङ्गलं नष्टम्, भवः च मे फलवान्, यतः भगवतः योगिध्येयाङ्घ्रिपङ्कजं नमस्ये॥]

यथा वा—

३७. कलिन्द-नन्दिनीकूल-कदम्बवनवल्लभम्।
कदा नमस्करिष्यामि गोपरूपं तमीश्वरम्॥ (८०)

[कलिन्दनन्दिनीकूलकदम्बवनवल्लभं तं गोपरूपम् ईश्वरं कदा नमस्यामि॥]

अथ प्रेमा—

४४. [23]ह्रासशङ्काच्युता बद्धमूला प्रेमेयमुच्यते।
अस्यानुभावाः कथितास्तत्र व्यसनितादयः। (८१)

[इयं ह्रासशङ्काच्युता बद्धमूला प्रेमा उच्यते। तत्र व्यसनितादयः अस्य अनुभावाः कथिताः॥]

यथा—

३८. अणिमादि-सौख्यवीची-
मवीचिदुःखप्रवाहं वा।
नय मां विकृतिर्नहि मे
त्वत्पदकमलावलम्बस्य॥ (८२)

[माम् अणिमादि-सौख्य-वीचीम् अवीचिदुःखप्रवाहं वा नय, त्वत्पदकमलावलम्बस्य मे विकृतिः न हि॥]

यथा वा—

३९. रुषा[24]ज्वलितबुद्धिना भृगुसुतेन शप्तोऽप्यलं
मया हृत-जगत्त्रयोऽप्यतनुकैतवं तन्वता।
विनिन्द्य कृतबन्धनोऽप्युरगराजपाशैर्बला-
दरज्यत स मय्यहो द्विगुणमेव वैरोचनिः॥ (८३)

[रुषा ज्वलितबुद्धिना भृगुसुतेन अलं शप्तः अपि सः वैरोचनिः हतजगत्त्रयः अतनुकैतवं तन्वता मया विनिन्द्य उरगराजपाशैः बलात् कृतबन्धनः अपि अहो! मयि द्विगुणम् एव अरज्यत॥]

इनमें, सम्भ्रमप्रीति, यथा श्रीदशम में (भा. १०/३८/६)—

३६. *आज मेरा अमङ्गल नष्ट हो गया, मेरा जन्म सफल हो गया, जो कि आज मैं योगियों के ध्येय भगवान् के चरणकमलों को प्रणाम करूँगा।* ।७९।

अथवा यथा—

३७. *अहो! कलिन्दतनया (यमुना) के तटवर्त्ती कदम्ब-वन के वल्लभ उन गोपालरूपी ईश्वर को मैं कब प्रणाम करूँगा?* ।८०।

प्रेम—

४४. प्रीति जब बद्धमूल होकर ह्रास की शङ्का से भी रहित होती है तब प्रेम कहलाती है। उन्हीं (श्रीहरि) का ही व्यसन (निरन्तर लौ लगना) आदि इसके अनुभाव कहे गये हैं। ।८१।

यथा—

३८. *हे प्रभो! मुझे चाहे अणिमा आदि सिद्धियों के सुख की तरङ्गों में झुलाइये, चाहे अवीचि जैसे नरकों के दुःख-प्रवाह में डुबोइये, पर आपके चरण-कमलों का अवलम्ब पाये हुए मेरे चित्त में कोई विकार नहीं हो सकता।* ।८२।

अथवा यथा—

३९. *क्रोध से धधकती बुद्धि वाले भार्गव शुक्राचार्य के द्वारा बहुत भर्त्सना किये जाने पर भी, मेरे द्वारा भारी छल से तीनों लोक छीन लिये जाने पर भी, बार-बार निन्दा करते हुए नागराजपाशों द्वारा बाँधा जाने पर भी, वह विरोचनसुत बलि मेरे प्रति दुगना अनुरक्त ही हुआ; मेरे प्रति उसका प्रेम ही बढ़ा।* ।८३।

अथ स्नेहः—

४५. सान्द्रश्चित्तद्रवं कुर्वन् प्रेमा स्नेह इतीर्यते।
क्षणिकस्यापि नेह स्याद्विश्लेषस्य सहिष्णुता॥ (८४)

[सान्द्रः प्रेमा चित्तद्रवं कुर्वन् स्नेहः इति ईर्यते। इह क्षणिकस्य अपि विश्लेषस्य सहिष्णुता न॥]

यथा—

४०. दम्भेन बाष्पाम्बुझरस्य केशवं
वीक्ष्य द्रवच्चित्तमसुस्नुवत्तव।[२५]
इत्युच्चकैर्धारयतो विचित्ततां
चित्रा न ते दारुक! दारुकल्पता॥ (८५)

[दारुक! केशवं वीक्ष्य बाष्पाम्बुझरस्य दम्भेन तव द्रवच्चित्तम् असुस्नुवत् इति विचित्तताम् उच्चैः धारयतः ते दारुकल्पता न चित्रा॥]

यथा वा—

४१. पत्नीं रत्ननिधेः परामुपहरन् पूरेण बाष्पाम्भसां
रज्यन्मञ्जुलकण्ठगर्भलुठितस्तोत्राक्षरोपक्रमः।
चुम्बन् फुल्लकदम्बडम्बरतुलामङ्गैः समीक्ष्याच्युतं
स्तब्धोऽप्यभ्यधिकां श्रियं प्रणमतां वृन्दाद्दधारोद्धवः॥ (८६)

[बाष्पाम्भसां पूरेण रत्ननिधेः परां पत्नीम् उपहरन् रज्यन्मञ्जुलकण्ठगर्भलुठितस्तोत्राक्षरोपक्रमः उद्धवः अच्युतं समीक्ष्य अङ्गैः फुल्लकदम्बडम्बरतुलां चुम्बन् स्तब्धः अपि प्रणमतां वृन्दात् अभ्यधिकं श्रियं दधार॥]

अथ रागः—

४६. स्नेहः स रागो येन स्यात् सुखं दुःखमपि स्फुटम्।
तत्सम्बन्धलवेऽप्यत्र प्रीतिः प्राणव्ययैरपि॥ (८७)

[सः स्नेहः रागः येन दुःखम् अपि स्फुटं सुखं स्यात्। प्राणव्ययैः अपि अत्र तत्सम्बन्धलवे अपि प्रीतिः॥]

स्नेह—

४५. चित्त को द्रवित करता हुआ सान्द्र (सघन) प्रेम स्नेह कहलाता है। इसमें क्षण-भर का भी वियोग सहन नहीं होता। ।८४।

यथा—

४०. *केशव को देखकर नयनवारि (अश्रु) के प्रवाह के बहाने तुम्हारा द्रवीभूत चित्त ही बह चला, इस कारण सर्वथा चित्तशून्य दशा में पहुँचे हुए हे दारुक! तुम्हारा दारु (लकड़ी) जैसा अचेतनवत् हो जाना युक्त ही है।* ।८५।

अथवा यथा—

४१. *प्रेमाश्रुओं के प्रवाह से श्रेष्ठ सागरपत्नी गङ्गा नदी को प्रकट करते हुए, स्तवगान के लिये स्नेहजनित विशेष माधुर्य से युक्त एवं स्वभाव से ही मञ्जुल कण्ठ के गर्भ (मध्यभाग) में ही इतस्ततः लुढ़कते स्तोत्राक्षरों के उपक्रम वाले (अर्थात् गला रुँध आने से स्वरभङ्ग से युक्त) (रोमाञ्च से भरा होने से) जिस का शरीर फूले हुए कदम्ब के अतिशय तुल्य हो रहा था, ऐसे उद्धव स्तब्ध खड़े हुए भी प्रणतों के समूह से भी अधिक सुशोभित हुए।* ।८६।

राग—

४६. वह स्नेह राग कहलाता है जिससे दुःख भी स्फुट सुख हो जाता है; प्राण त्यागने पर भी यदि श्रीहरि का सम्बन्ध-लेश मिलता हो तो उसे प्रसन्नता होती है। ।८७।

यथा—

४२. गुरुरपि भुजगाद्भीस्तक्षकात् प्राज्यराज्य-
च्युतिरतिशयिनी च प्रायचर्या च गुर्वी।
अतनुत मुदमुच्चैः कृष्णलीलासुधान्तर्-
विहरणसचिवत्वादौत्तरेयस्य राज्ञः॥ (८८)

[तक्षकात् भुजगात् गुरुः अपि भीः, अतिशयिनी च प्राज्यराज्यच्युतिः, गुर्वी च प्रायचर्या, कृष्णलीलासुधान्तर्विहरणसचिवत्वात् औत्तरेयस्य राज्ञः उच्चैः मुदम् अतनुत॥]

यथा वा—

४३. केशवस्य करुणालवोऽपि चेद्
बाडवोऽपि किल षाडवो मम।
अस्य यद्यदयता कुशस्थली
पूर्णसिद्धिरपि मे कुशस्थली॥ (८९)

[केशवस्य करुणालवः अपि चेत्, बाडवः अपि किल मम षाडवः, अस्य यदि अदयता, पूर्णसिद्धिः अपि कुशस्थली मे कुशस्थली॥]

४७. प्राय आद्यद्वये प्रेमा स्नेहः पारिषदेष्वसौ।
परीक्षिति भवेद् रागो दारुके च तथोद्धवे॥ (९०)

[प्रायः आद्यद्वये (अधिकृताश्रितयोः) प्रेमा, पारिषदेषु असौ स्नेहः, परीक्षिति दारुके तथा उद्धवे च रागः भवेत्॥]

४८. व्रजानुगेष्वनेकेषु रक्तकप्रमुखेषु च।
अस्मिन्नभ्युदिते भावः प्रायः स्यात् सख्यलेशभाक्॥ (९१)

[रक्तकप्रमुखेषु अनेकेषु व्रजानुगेषु च अस्मिन् अभ्युदिते प्रायः सख्यलेशभाक् भावः स्यात्॥]

यथा—

४४. शुद्धान्तान्मिलितं बाष्परुद्धवागुद्धवो हरिम्।
किञ्चित्कुञ्चितनेत्रान्तः स्वान्तेन परिषस्वजे॥ (९२)

[बाष्परुद्धवाक् उद्धवः किञ्चित्कुञ्चितनेत्रान्तः शुद्धान्तात् मिलितं हरिं स्वान्तेन परिषस्वजे॥]

यथा—

४२. भयङ्कर तक्षक नाग के दंश का घोर भय, प्रचुर-सुखद चक्रवर्त्ती-साम्राज्य सदा के लिये छूट जाना, प्राणान्त पर्यन्त का अनशन व्रत—सभी अतिशयित कष्टों-विपत्तियों ने उत्तरा (अभिमन्यु) के पुत्र राजा परीक्षित् को महान् आनन्द ही दिया क्योंकि इस सब के साथ मिल रहा था श्रीकृष्णलीला-श्रवणामृतसागर में अनवरत विहार। ।८८।

अथवा यथा—

४३. केशव की करुणा का लेश या कण भी मिले तो मेरे लिये वडवानल भी षड्रसभरा मीठा पेय है, और यदि उनकी दया न हो तो सम्पूर्ण सिद्धियों से समृद्ध द्वारिका नगरी भी मेरे लिये तीखी कुशायें बिछी हुई भूमि है। ।८९।

४७. प्रायः पहले दो (अधिकृत एवं आश्रित) में प्रेम होता है, पार्षदों में स्नेह होता है, परीक्षित्, दारुक तथा उद्धव में राग है। ।९०।

४८. व्रज में श्रीकृष्ण के अनुचरों में, जिनमें रक्तक प्रमुख है, यह राग उदित होने पर सख्य-लेश से युक्त भाव बन जाता है। ।९१।

यथा—

४४. अन्तःपुर से आते हुए श्रीहरि के मिलने पर उमड़े राग से रुँधी वाणी वाले उद्धव ने नेत्रकोण थोड़ा-सा सिकोड़ते हुए उन्हें (श्रीहरि को) हृदय से आलिङ्गन किया। ।९२।

४९. अयोगयोगावेतस्य प्रभेदौ कथितावुभौ। (९३)

[अयोगयोगौ उभौ एतस्य प्रभेदौ कथितौ॥]

तत्र अयोगः—

५०. सङ्गाभावो हरेर्धीरैरयोग इति कथ्यते।
अयोगे तन्मनस्कत्वं तद्गुणाद्यनुसन्धयः॥ (९४)

[हरेः सङ्गाभावः अयोगः इति धीरैः कथ्यते। अयोगे तन्मनस्कत्वं तद्गुणाद्यनुसन्धयः॥]

५१. तत्प्राप्त्युपायचिन्ताद्याः सर्वेषां कथिताः क्रियाः।
उत्कण्ठितं वियोगश्चेत्ययोगोऽपि द्विधोच्यते॥ (९५)

[तत्प्राप्त्युपायचिन्ताद्याः सर्वेषां क्रियाः कथिताः, उत्कण्ठितं वियोगः च इति अयोगः अपि द्विधा उच्यते॥]

तत्र उत्कण्ठितम्—

५२. अदृष्टपूर्वस्य हरेर्दिदृक्षोत्कण्ठितं मतम्। (९६)

[अदृष्टपूर्वस्य हरेः दिदृक्षा उत्कण्ठितं मतम्।]

यथा नारसिंहे—

४५. चकार मेघे तद्वर्णे बहुमानरतिं नृपः।
पक्षपातेन तन्नाम्नि मृगे पद्मे च तद्दृशि॥ (९७)

[नृपः तद्वर्णे पक्षपातेन मेघे, तन्नाम्नि (पक्षपातेन कृष्ण-) मृगे, तद्दृशि च (पक्षपातेन) पद्मे बहुमानरतिं चकार॥]

यथा वा श्रीदशमे (भा० १०/३८/१०)—

४६. अप्यद्य विष्णोर्मनुजत्वमीयुषो
भारावताराय भुवो निजेच्छया।
लावण्यधाम्नो भवितोपलम्भनं
मह्यं न न स्यात् फलमञ्जसा दृशः॥ (९८)

[भुवः भारावताराय निजेच्छया मनुजत्वम् ईयुषः लावण्यधाम्नः विष्णोः अपि अद्य उपलम्भनं भविता मह्यं दृशः फलम् अञ्जसा न न स्यात्॥]

४९. इस (भक्ति रस) के दो भेद कहे गये हैं—योग और अयोग। ।९३।

अयोग—

५०-५१. श्रीहरि के सङ्ग का अभाव धीर जनों द्वारा अयोग कहा जाता है। अयोग में उन्हीं में मन लगा रहना, उन के ही गुण आदि का अनुसन्धान, उन की प्राप्ति के उपायों का चिन्तन आदि सभी (भक्तों) की क्रियायें कही गई हैं।

यह अयोग फिर दो प्रकार का कहा गया है—उत्कण्ठा और वियोग। ।९४-९५।

उत्कण्ठा—

५२. पहले न देखे हुए श्रीहरि के दर्शन की इच्छा ही उत्कण्ठा मानी गई है। ।९६।

यथा नृसिंहपुराण में—

४५. *नृप (इक्ष्वाकु) मेघ के प्रति बहुत आदर और प्रीति रखते थे क्योंकि उस का वर्ण श्रीहरि जैसा है, पक्षपात-पूर्वक उनके नामवाले (कृष्णसार)हरिण (कस्तूरीमृग) पर तथा उनके नयनों जैसे दिखनेवाले पद्म पर अतिशय प्रीति रखते थे। ।९७।*

अथवा यथा श्रीदशम में (भा. १०/३८/१०)—

४६. *भूमि का भार उतारने के लिये अपनी इच्छा से ही मनुजतनु में प्रकाशमान लावण्य के धामस्वरूप स्वयं विष्णु (भगवान्) की आज मुझे प्राप्ति होगी, उनका दर्शन होगा; अब मेरे नयन किसी भी प्रकार फलहीन नहीं रहेंगे। (दृष्टि आज सफल होगी)। ।९८।*

५३. अत्रायोगप्रसक्तानां सर्वेषामपि सम्भवे।
औत्सुक्य-दैन्य-निर्वेद-चिन्तानां चापलस्य च।
जडतोन्मादमोहानामपि स्यादतिरिक्तता॥ (९९)

[अत्र अयोगप्रसक्तानां सर्वेषाम् सम्भवे अपि औत्सुक्य-दैन्य-निर्वेद-चिन्तानां चापलस्य च जडतोन्मादमोहानाम् अपि अतिरिक्तता स्यात्॥]

तत्र औत्सुक्यं, यथा कृष्णकर्णामृते—

४७. अमून्यधन्यानि दिनान्तराणि
हरे! त्वदालोकनमन्तरेण।
अनाथबन्धो! करुणैकसिन्धो
हा हन्त हा हन्त कथं नयामि? (१००)

[हरे! अनाथबन्धो! करुणैकसिन्धो! त्वदालोकनम् अन्तरेण हा हन्त! हा हन्त! अमूनि अधन्यानि दिनान्तराणि कथं नयामि॥

यथा वा—

४८. विलोचन-सुधाम्बुधेस्तव पदारविन्दद्वयी-
विलोचन-रसच्छटामनुपलभ्य विक्षुभ्यतः।
मनो मम मनागपि क्वचिदनाप्नुवन्निर्वृतिं
क्षणार्धमपि मन्यते व्रजमहेन्द्र! वर्षव्रजम्॥ (१०१)

[व्रजमहेन्द्र! विलोचनसुधाम्बुधेः तव पादारविन्दद्वयी-विलोचनरसच्छटाम् अनुपलभ्य विक्षुभ्यतः मम मनः क्वचित् मनाक् अपि निर्वृतिम् अनाप्नुवन् क्षणार्धम् अपि वर्षव्रजं मन्यते॥]

दैन्यं, यथा तत्रैव (कृष्णकर्णामृते)—

४९. निबद्ध-मूर्धाञ्जलिरेष याचे
नीरन्ध्र-दैन्योन्नतिमुक्तकण्ठम्।[२६]
दयाम्बुधे! देव! भवत्कटाक्ष-
दाक्षिण्यलेशेन सकृन्निषिञ्च॥ (१०२)

[एषः (अहं) निबद्धमूर्धाञ्जलिः दैन्योन्नतिमुक्तकण्ठं याचे "दयाम्बुधे! देव! भवत्कटाक्षदाक्षिण्यलेशेन सकृत् निषिञ्च।" (इति)॥]

५३. यहाँ अयोग में प्रसङ्गप्राप्त (हो सकने वाले) सभी व्यभिचारीभावों की सम्भावना होने पर भी, औत्सुक्य, दैन्य, निर्वेद, चिन्ता, चपलता, जड़ता, उन्माद और मोह इन का उद्रेक या प्रमुखता है। ।९९।

उत्सुकता, यथा श्रीकृष्णकर्णामृत में—

४७. *हे हरि! हे अनाथों के बन्धु! हे करुणा के एक मात्र सिन्धु! तुम्हारे दर्शन के बिना हाय! मैं ये अभागे दिन-रात कैसे बिताऊँ?* *।१००।*

अथवा यथा—

४८. *हे व्रज के महेन्द्र! नयनों के लिये आनन्दसुधासागरतुल्य आपके चरणकमलों के दर्शन-रस की छटा के बिना अतीव क्षुब्ध होता हुआ मेरा मन कहीं भी थोड़ी भी चैन नहीं पाता, ऐसी स्थिति के क्षण भर को भी अनेकों वर्षों जितना लम्बा एवं असह्य मान रहा है।* *।१०१।*

दैन्य, यथा श्रीकृष्णकर्णामृत में ही—

४९. *हे दयासागर! देव! मस्तक पर अञ्जलि बाँधे हुए यह मैं छिद्ररहित दैन्य की पराकाष्ठा से खुले कण्ठ (अतीव कातर स्वर) से माँग रहा हूँ कि एक बार आपका कटाक्ष-लेश मात्र देने की कृपा से मुझे सींच दीजिये।* *।१०२।*

यथा वा—

५०. असि शशिमुकुटाद्यैरप्यलभ्येक्षणस्त्वं
लघुरघहर! कीटादप्यहं कूटकर्मा।
इति विसदृशतापि प्रार्थने प्रार्थयामि
स्नपय कृपणबन्धो! मामपाङ्गच्छटाभिः॥ (१०३)

[अघहर! अहं कीटात् अपि लघुः कूटकर्मा, त्वं शशिमुकुटाद्यैः अपि अलभ्येक्षणः असि इति प्रार्थने अपि विसदृशता, प्रार्थयामि कृपणबन्धो! माम् अपाङ्गच्छटाभिः स्नपय॥]

निर्वेदो, यथा—

५१. स्फुटं श्रितवतोरपि श्रुतिनिषेवया श्लाघ्यतां
ममाभवनिरेतयोर्भवतु नेत्रयोर्मन्दयोः।
भवेन्न हि ययोः पदं मधुरिमश्रियामास्पदं
पदाम्बुजनखाङ्कुरादपि विसारि रोचिस्तव॥ (१०४)

[श्रुतिनिषेवया स्फुटं श्लाघ्यतां श्रितवतोः अपि मम एतयोः मन्दयोः नेत्रयोः अभवनिः भवतु, तव पदाम्बुजनखाङ्कुरात् विसारि मधुरिमश्रियाम् आस्पदं रोचिः अपि ययोः पदं न हि भवेत्॥

चिन्ता, यथा—

५२. हरिपदकमलावलोकतृष्णा
तरलमतेरपि योग्यतामवीक्ष्य।
अवनतवदनस्य चिन्तया मे
हरि हरि निःश्वसतो निशाः प्रयान्ति॥ (१०५)

[हरिपदकमलावलोकतृष्णातरलमतेः अपि योग्यताम् अवीक्ष्य अवनतवदनस्य मे चिन्तया निःश्वसतः हरि हरि निशाः प्रयान्ति॥]

चापलं, यथा कृष्णकर्णामृते—

५३. त्वच्छैशवं त्रिभुवनाद्भुतमित्यवेहि
मच्चापलञ्च तव वा मम वाधिगम्यम्।
तत् किं करोमि विरलं मुरलीविलासि
मुग्धं मुखाम्बुजमुदीक्षितुमीक्षणाभ्याम्? (१०६)

[त्वच्छैशवं त्रिभुवनाद्भुतम् इति अवेहि, मच्चापलं च तव वा मम वा अधिगम्यम्, मुरलीविलासि! (तव) विरलं मुग्धं मुखाम्बुजम् ईक्षणाभ्यां वीक्षितुं तत् किं करोमि॥]

अथवा यथा—

५०. *हे अघहर! (अघासुर या पाप समूह को समाप्त करने वाले हरि) अवश्य ही चन्द्रमौलि (शिव) आदि (देव-महादेवों) को भी आपका दर्शन अलभ्य है, और मैं तो बुरे कर्मों के ढेर से दबा अतीव छोटा-सा जीव हूँ। इसलिये प्रार्थना के भी योग्य नहीं, फिर भी माँगता हूँ कि हे कृपण (दीनों) के बन्धु! अपने कटाक्ष की छटाओं से मुझे नहला दीजिये।* ।१०३।

निर्वेद, यथा—

५१. *श्रुतियों के भली-भाँति सेवन (कानों तक पहुँचे हुए अर्थात् सुदीर्घ होने) से अतिशय प्रशंसनीय बने हुए भी मेरे इन मन्दभागी नेत्रों का न होना ही भला, या नाश हो इनका! आपके मधुरिमा भरी शोभा वाले चरण-कमलों के नखों के अङ्कुर (अग्रभाग) से प्रसृत होती (फैलती) हुई ज्योतिर्मय छबि जिन के गोचर न हो सकी।* ।१०४।

चिन्ता, यथा—

५२. *श्रीहरि के चरणकमलों के दर्शन की प्यास से मेरी मति तरल (आकुल, द्रवीभूत) हो रही है, फिर भी उसके लिये अपनी योग्यता न देखकर झुके हुए मुख-वाला हूँ। ऐसे मेरी रात्रियाँ हाय! चिन्ता से दीर्घ निःश्वास लेते हुए ही बीत रही हैं।* ।१०५।

चपलता, यथा श्रीकृष्णकर्णामृत में—

५३. *तुम्हारा बालपन (जिसमें कैशोर भी मिला हुआ है) त्रिभुवन में अद्भुत है, और मेरी चञ्चलता (तुम्हारे प्रति उत्सुकता) तुम्हारे या मेरे ही समझने की बात है। (ऐसी स्थिति में) हे मुरलीविलासी! तुम्हारा यह सर्वथा विरल मुखकमल इन नयनों से देखने के लिये मैं क्या करूँ? यह तुम ही बताओ!* ।१०६।

यथा वा—

५४. ह्रियमघहर! मुक्त्वा दृक्पतङ्गी ममासौ
भयमपि दमयित्वा भक्तवृन्दात्तृषार्ता[२७]।
निरवधिमविचार्य स्वस्य च क्षोदिमानं
तव चरण-सरोजं लेढुमन्विच्छतीश॥ (१०७)

[अघहर! ह्रियं मुक्त्वा मम असौ तृषार्ता दृक्पतङ्गी भक्तवृन्दात् भयम् अपि दमयित्वा, स्वस्य च निरवधिं क्षोदिमानम् अविचार्य, ईश! तव चरणसरोजं लेढुम् इच्छति॥]

जडता, यथा सप्तमे (भा०७/४/३७)—

५५. न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम्॥ (१०८)

[न्यस्तक्रीडनकः बालः कृष्णग्रहगृहीतात्मा तन्मनस्तया जडवत् ईदृशं जगत् न वेद॥]

यथा वा—

५६. निमेषोन्मुक्ताक्षः कथमिह परिस्पन्दविधुरां
तनुं बिभ्रद्भव्यः प्रतिकृतिरिवास्ते द्विजपतिः।
अये ज्ञातं वंशीरसिक-नवरागव्यसनिना
पुरः श्यामाम्भोदे बत विनिहिता दृष्टिरमुना॥ (१०९)

[भव्यः द्विजपतिः निमेषोन्मुक्ताक्षः परिस्पन्दविधुरां तनुं बिभ्रत् कथम् इह प्रतिकृतिः इव अस्ति? अये! ज्ञातम्, वंशीरसिकनवरागव्यसनिना अमुना पुरः श्यामाम्भोदे बत दृष्टिः विनिहिता॥]

उन्मादो, यथा सप्तमे (भा०७/४/४०)—

५७. नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित्।
क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह॥ (११०)

[क्वचित् उत्कण्ठः नदति, क्वचित् विलज्जः नृत्यति, क्वचित् तद्भावनायुक्तः तन्मयः अनुचकार ह॥]

अथवा यथा—

५४. *हे अघहर! मेरी आँख या दृष्टि रूपी मधुमक्खी (अपनी अयोग्यता की) लज्जा छोड़कर, भक्त (रूपी भ्रमर)-समूह का भय भी दबा कर, (बस तुम्हारे चरण-सेवन की) प्यास से आर्त्त होकर, अपनी असीम क्षुद्रता का भी विचार न करती हुई, हे सर्वसमर्थ ईश्वर! तुम्हारे चरण-कमल को चाटना (चखना-आस्वादन करना) चाहती है।* ।१०७।

जड़ता, यथा सप्तम में (भा. ७/४/३७)—

५५. *श्रीकृष्ण-रूपी ग्रह से ग्रसा हुआ वह बालक (प्रह्लाद) उन्हीं में मन लगा होने से खिलौने छोड़कर इस जगत् को ऐसा (नाना वैचित्र्ययुक्त) नहीं देखता था (सब कुछ श्रीहरिमय देखता था)।* ।१०८।

अथवा यथा—

५६. *अहो! यह सभी का श्लाघनीय ब्राह्मण श्रेष्ठ स्पन्दनशून्य शरीर लिये हुए, पलकें भी न झपकाते हुए प्रतिमा जैसे क्यों यहाँ खड़ा है? अरे! समझ में आया, इसे तो वंशीरसिक श्रीकृष्ण के प्रति नये-नये राग (प्रीति-विशेष) का व्यसन हो गया है, इसीलिये उनके जैसे वर्णवाले श्याम मेघ पर इसने अपलक दृष्टि लगा रखी है।* ।१०९।

उन्माद, यथा सप्तम में (भा. ७/४/४०)—

५७. *कभी उच्चस्वर से नाद करता, कभी लज्जारहित होकर नाचने लगता; उन्हीं (श्रीहरि) की भावना से युक्त हुआ वह (प्रह्लाद) तन्मयता से उनका अनुकरण करने लगता था।* ।११०।

यथा वा—

५८. क्वचिन्नटति निष्पटं क्वचिदसम्भवं स्तम्भते
क्वचिद्विहसति स्फुटं क्वचिदमन्दमाक्रन्दति।
लसत्यनलसं क्वचित् क्वचिदपार्थमार्तायते
हरेरभिनवोद्धुरप्रणयसीधुमत्तो मुनिः॥ (१११)

[हरेः अभिनवोद्धुरप्रणयसीधुमत्तो मुनिः क्वचित् निष्पटं नटति, क्वचित् असम्भवं स्तम्भते, क्वचित् स्फुटं विहसति, क्वचित् अमन्दम् आक्रन्दति, क्वचित् अनलसं लसति, क्वचित् अपार्थम् आर्तायते॥]

मोहो, यथा हरिभक्तिसुधोदये—

५९. अयोग्यमात्मानमितीशदर्शने
स मन्यमानस्तदनाप्तिकातरः।
उद्वेलदुःखार्णवमग्नमानसः
स्रुताश्रुधारो द्विज! मूर्च्छितोऽपतत्॥ (११२)

[हे द्विज! सः ईशदर्शने आत्मानम् अयोग्यम् इति मन्यमानः, तदनाप्तिकातरः, उद्वेलदुःखार्णवमग्नमानसः स्रुताश्रुधारः, मूर्च्छितः अपतत्॥]

यथा वा—

६०. हरिचरण-विलोकालब्धि-तापावलीभिर्
र्बत विधुतचिदम्भस्यत्र नस्तीर्थवर्ये।
श्रुतिपुटपरिवाहेनेशनामामृतानि
क्षिपत ननु सतीर्थ्याश्चेष्टतां प्राणहंसः॥ (११३)

[हरिचरण-विलोकालब्धि-तापावलीभिः बत नः तीर्थवर्ये अत्र विधुतचिदम्भसि ईशनामामृतानि श्रुतिपुटपरिवाहेन सतीर्थ्याः क्षिपत, ननु प्राणहंसः चेष्टताम्॥]

अथ वियोगः—

५४. वियोगो लब्धसङ्गेन विच्छेदो दनुजद्विषा। (११४)

[दनुजद्विषा लब्धसङ्गेन विच्छेदः वियोगः॥]

अथवा यथा—

५८. *श्रीहरि के प्रति नवीन उत्कट प्रणय-सुधामद से उन्मत्त होकर मुनि (नारद) कभी गिरते वस्त्र की भी सुध के बिना नाचते हैं, कभी असम्भव स्तब्धता से खम्भे जैसे खड़े रह जाते हैं, कभी खिलखिलाकर हँसते हैं, कभी जोर से रोने लगते हैं, कभी निरन्तर खेलते हैं, कभी अकारण ही आर्त्त (दुःखी) हो जाते हैं। ।१११।*

मोह, यथा हरिभक्तिसुधोदय में—

५९. *हे ब्राह्मणवर! ईश्वर के दर्शन के लिये अपने को अयोग्य मानते हुए, उनकी प्राप्ति के लिये कातर हुआ वह (बालक प्रह्लाद) सीमा लाँघते हुए दुःखसागर में निमग्न चित्तवाला होकर अश्रुधारायें बहाता हुआ मूर्च्छित होकर गिर पड़ा। ।११२।*

अथवा यथा—

६०. *हे सतीर्थ भाईयो! बन्धुओ! श्रीहरि के चरण-दर्शन न पाने के तापसमूह से जिसका चैतन्य-जल झड़ (सूख) गया है (अचेतन हो गये हैं) ऐसे हमारे कानों में, इस श्रेष्ठ तीर्थ में, ईश्वर के नाम रूपी अमृत-कणों का प्रवाह सींचिये, या उनके छींटे दीजिये, जिससे कि भीतर प्राण रूपी हंस स्पन्दित होता रहे। (शरीर अचेतन हो रहा है, प्राण चलते रहें इतनी कृपा कीजिये।) ।११३।*

अब वियोग—

५४. जिन का सङ्ग मिल चुका था उन दानवध्वंसी (श्रीहरि) से बिछुड़ना ही वियोग कहलाता है। ।११४।

यथा—

६१. बलिसुतभुजदण्ड[२८]-खण्डनाय
क्षतजपुरं पुरुषोत्तमे प्रयाते।
विधुत-विधुरबुद्धिरुद्धवोऽयं
विरहनिरुद्धमना निरुद्धवोऽभूत्॥ (११५)

[बलिसुत-भुजदण्ड-खण्डनाय पुरुषोत्तमे क्षतजपुरं प्रयाते, विधुतविधुरबुद्धिः अयम् उद्धवः विरहनिरुद्धमनाः निरुद्धवः अभूत्॥]

५५. अङ्गेषु तापः कृशता जागर्यालम्बशून्यता।
अधृतिर्जडता व्याधिरुन्मादो मूर्च्छितं मृतिः।
वियोगे सम्भ्रमप्रीतेर्दशावस्थाः प्रकीर्तिताः॥ (११६)

[अङ्गेषु तापः, कृशता, जागर्या, आलम्बशून्यता, अधृतिः, जडता, व्याधिः, उन्मादः, मूर्च्छितम्, मृतिः (इति) सम्भ्रमप्रीतेः वियोगे दश अवस्थाः प्रकीर्त्तिताः॥]

५६. अनवस्थितिराख्याता चित्तस्यालम्बशून्यता।
अरागिता तु सर्वस्मिन्नधृतिः कथिता बुधैः।
अन्येऽष्टौ प्रकटार्थत्वात्तापाद्या न हि लक्षिताः॥ (११७)

[चित्तस्य अनवस्थितिः आलम्बशून्यता आख्याता, सर्वस्मिन् अरागिता तु बुधैः अधृतिः कथिता अन्ये अष्टौ तापाद्याः प्रकटार्थत्वात् न हि लक्षिताः॥]

तत्र तापो, यथा—

६२. अस्मान् दुनोति[२९] कमलं तपनस्य मित्रं
रत्नाकरश्च बडवानलगूढमूर्तिः।
इन्दीवरं विधुसुहृत् कथमीश्वरं वा
तं[३०] स्मारयन्मुनिपते! दहतीह सभ्यान्॥ (११८)

[मुनिपते! अस्मान् तपनस्य मित्रं कमलं दुनोति, रत्नाकरः च बडवानलगूढमूर्तिः, विधुसुहृत् इन्दीवरं वा कथम् तम् ईश्वरं स्मारयन् इह सभ्यान् दहति॥]

यथा—

६१. बलि के पुत्र बाणासुर के भुजदण्ड काटने के लिये पुरुषोत्तम जब शोणितपुर चले गये तब क्षुब्ध और दुःखित बुद्धिवाला यह उद्धव विरह से मन निरुद्ध होने के कारण उत्सवरहित हो गया। ।११५।

५५. वियोग में सम्भ्रमप्रीति की दस दशायें होती हैं-अङ्गों में ताप, कृशता, जागरण, आलम्ब रहित हो जाना, अधीरता, जड़ता, व्याधि, उन्माद, मूर्च्छा और मरण। ।११६।

५६. चित्त की आलम्बशून्यता का अर्थ है अनवस्थिति (आलम्ब एकमात्र श्रीहरि हैं, वे प्रकट दृश्य नहीं, अतः अन्य कहीं ठहर न पाना), अन्यत्र कहीं भी राग न होना अधृति का अर्थ है। अन्य आठ का तात्पर्य स्पष्ट होने के कारण उनकी व्याख्या नहीं कही जा रही है। ।११७।

ताप, यथा—

६२. हे मुनीश्वर! तपन (सूर्य) का मित्र होने से कमल भी हमें ताप की पीड़ा दे रहा है, समुद्र जलधि है तो क्या, उसके शरीर में वडवानल छिपा है, इसलिये वह भी शीतल नहीं, जलाता ही है, इन्दीवर (कुमुद, नीलकमल) चन्द्रमा का मित्र है फिर भी उस ईश्वर (शिव) का स्मरण कराता है जिनके ललाट में वह्नि है—ये सभी उन (कमल-लोचन नीलवर्ण श्रीकृष्णचन्द्र) का स्मरण दिलाते हुए क्यों यहाँ सभी सभ्यों को जला रहे हैं? ।११८।

कृशता, यथा—

६३. दधति तव तथाद्य सेवकानां
भुजपरिघाः कृशताञ्च पाण्डुताञ्च।
पतति बत यथा मृणालबुद्ध्या
स्फुटमिह पाण्डवमित्र! पाण्डुपक्षः॥ (११९)

[पाण्डवमित्र! सेवकानां भुजपरिघाः अद्य कृशतां च पाण्डुतां च तथा दधति, (यत्) पाण्डुपक्षः स्फुटम् इह बत मृणालबुद्ध्या पतति॥]

जागर्या, यथा—

६४. विरहान्मुरविद्विषश्चिरं
विधुराङ्गे परिखिन्नचेतसि।
क्षणदाः क्षणदायितोज्झिता
बहुलाश्वे बहुलास्तदाभवन्॥ (१२०)

[मुरविद्विषः चिरं विरहात् तदा विधुराङ्गे बहुलाश्वे परिखिन्नचेतसि क्षणदाः क्षणदायितोज्झिताः बहुलाः अभवन्॥]

आलम्बशून्यता, यथा—

६५. विजयरथ-कुटुम्बिना विनान्यन् —
न किल कुटुम्बमिहास्ति नस्त्रिलोक्याम्।
भ्रमदिदमनवेक्ष्य यत्पदाब्जं
क्वचिदपि न व्यवतिष्ठतेऽद्य चेतः॥ (१२१)

[विजयरथकुटुम्बिना विना किल नः अन्यत् कुटुम्बम् इह त्रिलोक्यां न अस्ति यत्पदाब्जम् अनवेक्ष्य भ्रमत् इदं चेतः अद्य क्वचित् अपि न व्यवतिष्ठते॥]

अधृतिः, यथा—

६६. प्रेक्ष्य पिञ्छकुलमक्षि पिधत्ते
नैचिकीनिचयमुज्झति दूरे।
वष्टि यष्टिमपि नाद्य मुरारे
रक्तकस्तव पदाम्बुजरक्तः[३१]॥ (१२२)

[मुरारे! तव पदाम्बुजरक्तः रक्तकः पिच्छकुलं प्रेक्ष्य अक्षि पिधत्ते, नैचिकीनिचयं दूरे उज्झति, यष्टिम् अपि अद्य न वष्टि॥]

कृशता, यथा—

६३. *हे पाण्डव मित्र! (पाण्डवों के सहाय के लिये आप द्वारिका से दूर चले गये हैं तब) आज तुम्हारे सेवकों के फौलादी सुदृढ़ भुजदण्ड ऐसे कृश और श्वेत पड़ गये हैं (दुर्बल, शक्तिहीन हो गये हैं) कि इन्हें स्पष्ट ही मृणाल (कमलनाल) समझकर हंस इन पर आ रहा है। ।११९।*

जागरण, यथा—

६४. *श्रीकृष्ण के विरह से खिन्न अङ्गों वाले अतिशय क्षीण चित्त वाले राजा बहुलाश्व के लिये विश्राम व उत्सव प्रदान करने वाली रात्रियाँ (दिन भी) क्षणिक ही ऊष्मा देनेवाली और बहुत लम्बी (शीघ्र न बीतनेवाली) हो गयीं। ।१२०।*

आलम्बनशून्यता, यथा—

६५. *अर्जुन के सारथि के बिना आज इन तीनों लोकों में कोई मेरा कुटुम्ब (अपना सगा-सम्बन्धी) नहीं है। उनके चरण-कमलों को न देख पाता हुआ मेरा चित्त चक्कर खाता हुआ घूम रहा है, कहीं भी टिक नहीं पा रहा है। ।१२१।*

अधृति, यथा—

६६. *हे मुरारि! तुम्हारे चरणकमलों में अनुरक्त रक्तक आज (तुम्हारे बिना) मयूरपिच्छों को देखकर आँख मूँद लेता या ढक लेता है, गायों के समूह को दूर ही छोड़ देता है, लकुटी (गाय चराते समय हाथ में रखने वाली लाठी) को छूना भी नहीं चाहता। ।१२२।*

जडता, यथा—

६७. यौधिष्ठिरं पुरमुपेयुषि पद्मनाभे
खेदानलव्यतिकरैरतिविक्लवस्य।
स्वेदाश्रुभिर्न हि परं जलतामवापु-
रङ्गानि निष्क्रियतया च किलोद्धवस्य॥ (१२३)

[पद्मनाभे यौधिष्ठिरं पुरम् उपेयुषि खेदानलव्यतिकरैः अतिविक्लवस्य उद्धवस्य किल स्वेदाश्रुभिः निष्क्रियतया च अङ्गानि परं जलतां न हि (जडताम्) अवापुः॥]

व्याधिः, यथा—

६८. चिरयति मणिमन्वेष्टुं
चलिते मुरभिदि कुशस्थलीपुरतः।
समजनि धृतनव-व्याधिः
पवनव्याधिर्यथार्थाख्यः॥ (१२४)

[कुशस्थलीपुरतः मुरभिदि मणिम् अन्वेष्टुं चलिते चिरयति धृतनवव्याधिः पवनव्याधिः यथार्थाख्यः समजनि॥]

उन्मादो, यथा—

६९. प्रोषिते बत निजाधिदैवते
रैवते नवमवेक्ष्य नीरदम्।
भ्रान्तधीरयमधीरमुद्धवः
पश्य रौति[३२] रमते नमस्यति॥ (१२५)

[निजाधिदैवते रैवते प्रोषिते बत नवं नीरदम् अवेक्ष्य अयम् भ्रान्तधीः उद्धवः पश्य अधीरं रौति, रमते, नमस्यति॥]

मूर्च्छितं, यथा—

७०. समजनि दशा विश्लेषात्ते पदाम्बुजसेविनां
व्रजभुवि तथा नासीन्निद्रा-लवोऽपि यथा पुरा।
यदुवर! दरश्वासेनामी वितर्कितजीविताः
सततमधुना निश्चेष्टाङ्गास्तटान्यधिशेरते॥ (१२६)

[यदुवर! ते पदाम्बुजसेविनां विश्लेषात् व्रजभुवि तथा दशा समजनि, यथा पुरा निद्रालवः अपि न आसीत्, अधुना दरश्वासेन वितर्कितजीविताः निश्चेष्टाङ्गाः अमी सततं तटानि अधिशेरते॥]

जड़ता, यथा—

६७. *पद्मनाभ (विष्णु के सम्पूर्ण अवतार श्रीकृष्ण) युधिष्ठिर के नगर (इन्द्रप्रस्थ या हस्तिनापुर) जाने लगे तब खेद की वह्नि के विकार से अतिशय विंकल हुए उद्धव के अङ्ग ऐसे निष्क्रिय हो गये कि स्वेद या आँसुओं से भी भीगे नहीं (न पसीना चुआ, न आँसू बहे, बस सूखी लकड़ी से हो रहे।)* ।१२३।

व्याधि, यथा—

६८. *स्यमन्तक मणि खोजने के लिये मुरारि जब कुशस्थली (द्वारिका) नगरी से चले और फिर उन्हें लौटने में विलम्ब होने लगा तब उद्धव को नयी व्याधि हो गयी, और पहले (बालपन से ही श्रीहरि का प्रेम उनमें जाग्रत् होने से उन्मत्त या अतिशान्त आचरण था जिसे देखकर लोगों द्वारा) पवन-व्याधि वाला समझा जाना अब यथार्थ-नाम हो गया।* ।१२४।

उन्माद, यथा—

६९. *अपने अधिदैवत (श्रीकृष्ण) के प्रवास (दूर यात्रा) में चले जाने पर, रैवतक पर्वत पर नवीन मेघ को देखकर भ्रमित बुद्धिवाले ये उद्धव देखो कैसे अधीर होकर कभी चिल्ला कर पुकारते हैं, कभी आनन्दित होते हुए खेलते हैं और कभी उस मेघ को नमस्कार करते हैं।* ।१२५।

मूर्च्छित होना, यथा—

७०. *हे यदुवर! तुम्हारे विछोह से व्रजभूमि में तुम्हारे चरण-कमलों के सेवकों की पहले ऐसी दशा हो गयी थी कि निद्रा का लेश भी नहीं था, अब तो बस श्वास के आने-जाने से ही उनके जीवित होने का अनुमान होता है, अन्यथा सतत ही वे निश्चेष्ट अङ्गों वाले होकर यमुनातट पर पड़े रहते हैं; शरीर में श्वास के सिवा कोई हलचल नहीं है।* ।१२६।

मृतिः, यथा—

७१. दनुजदमन! याते जीवने त्वय्यकस्मात्
प्रचुरविरहतापैर्ध्वस्तहृत्पङ्कजायाम्।
व्रजमभि परितस्ते[३३] दासकासारपङ्क्तौ
न किल वसतिमार्ताः कर्तुमिच्छन्ति हंसाः॥ (१२७)

[दनुजदमन! त्वयि जीवने अकस्मात् याते, प्रचुरविरहतापैः ध्वस्तहृत्पङ्कजायां दासकासारपङ्क्तौ, ते किल आर्त्ताः हंसाः व्रजम् अभि परितः वसतिं कर्तुं न इच्छन्ति॥]

५७. अशिवत्वान्न घटते भक्ते कुत्राप्यसौ मृतिः।
क्षोभकत्वाद्वियोगस्य जातप्रायेति कथ्यते॥ (१२८)

[असौ मृतिः अशिवत्वात् भक्ते कुत्र अपि न घटते। वियोगस्य क्षोभकत्वात् जातप्राया इति कथ्यते॥]

अथ योगः—

५८. कृष्णेन सङ्गमो यस्तु स योग इति कीर्त्यते।
योगोऽपि कथितः सिद्धिस्तुष्टिः स्थितिरिति त्रिधा॥ (१२९)

[यः तु कृष्णेन सङ्गमः, सः योगः इति कीर्त्यते। योगः अपि सिद्धिः तुष्टिः स्थितिः इति त्रिधा कथितः॥]

तत्र सिद्धिः—

५९. उत्कण्ठिते हरेः प्राप्तिः सिद्धिरित्यभिधीयते। (१३०)

[उत्कण्ठिते हरेः प्राप्तिः सिद्धिः इति अभिधीयते॥]

यथा कृष्णकर्णामृते—

७२. मौलिश्चन्द्रकभूषणो मरकतस्तम्भाभिरामं[३४] वपु-
र्वक्त्रं चित्रविमुग्धहासमधुरं बाले विलोले दृशौ।
वाचः शैशवशीतला मदगजश्लाघ्या विलासस्थिति-
र्मन्दं मन्दमये क एष मथुरा-वीथीं मिथो गाहते? (१३१)

[चन्द्रकभूषणः मौलिः, मरकतस्तम्भाभिरामं वपुः, चित्रविमुग्धहासमधुरं वक्त्रं, शैशवशीतलाः वाचः, मदगजश्लाघ्या विलासस्थितिः, अये! कः एषः मन्दं मन्दं मथुरा-वीथीं मिथः गाहते॥]

मृति (मरण), यथा—

७१. *हे दनुजदमन सबके जीवन (जल) स्वरूप आपके अकस्मात् चले जाने पर, व्रज में चारों ओर तुम्हारे दासरूपी सरोवरों की पङ्क्ति के हृदयरूपी पङ्कज प्रचुर विरह के ताप से सूखकर नष्ट हो गये हैं, आर्त्त हुए हंस (प्राण) भी अब इन सरोवरों पर वास करना नहीं चाहते। ।१२७।*

५७. अशिव (अशुभ) होने के कारण वास्तविक भक्त का मरण कभी भी नहीं होता, वियोग अतिशय क्षोभजनक होता है। इसलिये मृतप्राय दशा को ही मरण कहा जाता है। ।१२८।

अब योग—

५८. श्रीकृष्ण के साथ मिलन ही योग कहा जाता है। वह योग भी तीन प्रकार का कहा गया है— १. सिद्धि, २. तुष्टि और ३. स्थिति। ।१२९।

सिद्धि—

५९. उत्कण्ठित दशा में श्रीहरि की प्राप्ति को सिद्धि कहा जाता है। ।१३०।

यथा श्रीकृष्णकर्णामृत में—

७२. *अरे! जिसका मुकुट मयूरपिच्छ के चन्द्रकों से सुशोभित है, मरकत (पन्ने) के स्तम्भ जैसा सुन्दर जिसका शरीर है, मुख सुन्दर विमुग्ध हास से मधुर है, नयन सुकोमल एवं चञ्चल हैं, बाल्यावस्था जैसी शीतल वाणी है, मदयुक्त गज के तुल्य जिसकी चाल-ढाल है—ऐसा कौन यह एकान्त में मथुरा की गली में चला आ रहा है? ।१३१।*

यथा वा श्रीदशमे (भा०१०/३८/३४)—

७३. रथात्तूर्णमवप्लुत्य सोऽक्रूरः प्रेमविह्वलः।
पपात चरणोपान्ते दण्डवद् रामकृष्णयोः॥ (१३२)

[प्रेमविह्वलः सः अक्रूरः रथात् तूर्णम् अवप्लुत्य रामकृष्णयोः चरणोपान्ते दण्डवत् पपात॥]

तुष्टिः—

६०. जाते वियोगे कंसारेः सम्प्राप्तिस्तुष्टिरुच्यते॥ (१३३)

[कंसारेः वियोगे जाते (पुनः) सम्प्राप्तिः तुष्टिः उच्यते॥]

यथा प्रथमे (भा०१/११/१०)—

७४. कथं वयं नाथ! चिरोषिते त्वयि
[३५]प्रसन्नदृष्ट्याखिलतापशोषणम्।
जीवाम ते सुन्दरहासशोभित-
मपश्यमाना वदनं मनोहरम्? (१३४)

[नाथ! चिरोषिते त्वयि, प्रसन्नदृष्ट्या अखिलतापशोषणम् सुन्दरहासशोभितं मनोहरम् ते वदनम् अपश्यमाना वयं कथं जीवाम?॥]

यथा वा—

७५. समक्षमक्षमः प्रेक्ष्य हरिमञ्जलिबन्धने।
दारुको द्वारकाद्वारि तत्र चित्रदशां ययौ॥ (१३५)

[दारुकः द्वारकाद्वारि हरिम् समक्षम् प्रेक्ष्य अञ्जलिबन्धने अक्षमः तत्र चित्रदशां ययौ॥]

स्थितिः—

६१. सहवासो मुकुन्देन स्थितिर्निगदिता बुधैः। (१३६)

[मुकुन्देन सहवासः बुधैः स्थितिः निगदिता।]

अथवा यथा श्रीदशम में (भ. १०/३८/३४)—

७३. *रथ से शीघ्रता से उतर कर वे अक्रूर प्रेमविह्वल होकर बलराम और कृष्ण के चरणों के निकट दण्ड की भाँति गिर पड़े।* ।१३२।

तुष्टि—

६०. वियोग होने के पश्चात् कंसशत्रु (श्रीकृष्ण) की प्राप्ति तुष्टि कहलाती है। ।१३३।

यथा प्रथम में (भा. १/११/१०)—

७४. *हे नाथ! आप जब चिरकाल के लिये दूर चले जाते हैं, तब प्रसन्न दृष्टि से अखिल तापों को सुखा देने वाले आप के मनोहर एवं सुन्दर हास से सुशोभित मुख को देखे बिना हम कैसे जियें?* ।१३४।

अथवा यथा—

७५. *द्वारका के द्वार पर हरि को (अचानक) अपने सामने खड़े देखकर दारुक हाथ जोड़ने में भी अक्षम होकर चित्रलिखित जैसी दशा में पहुँच गया।* ।१३५।

स्थिति—

६१. मुकुन्द के साथ सहनिवास को बुधजनों ने स्थिति कहा है। ।१३६।

यथा हंसदूते—

७६. पुरस्तादाभीरीगणभयद-नामा स कठिनो
मणिस्तम्भालम्बी कुरुकुलकथाः सङ्कथयिता[३६]।
स जानुभ्यामष्टापदभुवमवष्टभ्य भविता
गुरोः शिष्यो नूनं पदकमलसंवाहनरतः॥ (१३७)

[सः आभीरीगणभयदनामा कठिनः मणिस्तम्भालम्बी पुरस्तात् कुरुकुलकथाः सङ्कथयिता, सः नूनं जानुभ्याम् अष्टापदभुवम् अवष्टभ्य पदकमलसंवाहनरतः गुरोः शिष्यः भविता॥]

६२. निजावसर-शुश्रूषा-विधाने सावधानता।
पुरस्तस्य निवेशाद्या योगेऽमीषां क्रिया मताः॥ (१३८)

[योगे, निजावसरशुश्रूषाविधाने सावधानता, तस्य पुरः निवेशाद्याः अमीषां क्रियाः मताः॥]

६३. केचिदस्या रतेः कृष्णभक्त्यास्वादबहिर्मुखाः।
भावत्वमेव निश्चित्य न रसावस्थतां जगुः॥ (१३९)

[केचित् कृष्णभक्त्यास्वादबहिर्मुखाः रतेः भावत्वम् एव निश्चित्य रसावस्थतां न जगुः॥]

६४. इति तावदसाधीयो यत् पुराणेषु केषुचित्।
श्रीमद्भागवते चैष प्रकटो दृश्यते रसः॥ (१४०)

[इति यत् केषुचित् पुराणेषु तावत् असाधीयः एषः रसः श्रीमद्भागवते च प्रकटः दृश्यते॥]

तथा हि एकादशे (भा०११/३/३२)—

७७. क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः॥ (१४१)

[अलौकिकाः अच्युतचिन्तया क्वचित् रुदन्ति, क्वचित् हसन्ति, क्वचित् नन्दन्ति, वदन्ति, नृत्यन्ति, गायन्ति, अजम् अनुशीलयन्ति, परम् एत्य निर्वृताः तूष्णीं भवन्ति॥]

जैसे कि हंसदूत में—

७६. *[गोपियाँ हंस को श्रीकृष्ण की पहचान बता रही हैं-] (उनके) सामने गोपियों को भयभीत करने वाले नाम वाला अक्रूर कुरु-कुल की कथायें कह रहा होगा; (दूसरी ओर) देवगुरु बृहस्पति का शिष्य उद्धव सुवर्णमयी भूमि पर घुटने टेके हुए (श्रीकृष्ण के) पदकमल सहला रहा होगा॥*

।१३७।

६२. अपनी अवसर प्राप्त शुश्रूषा (सेवा) को सम्भालने में सावधानता और सेव्य (श्रीकृष्ण) के सम्मुख प्रस्तुति आदि का योग (कुल मिलाकर) क्रियायें कहलाती हैं। ।१३८।

६३. जो लोग कृष्णभक्ति के आस्वाद के प्रति बहिर्मुख हैं, वे इस रति को भाव ही मान कर इसकी रसावस्था की बात नहीं करते। ।१३९।

६४. किन्हीं-किन्हीं पुराणों में यह रस असाध्य कहा गया है किन्तु श्रीमद्भागवत में तो यह स्पष्ट ही रस के रूप में दिखाई देता है। ।१४०।

यथा एकादश में (भा. ११/३/३२)—

७७. *परतत्त्व को पाकर आनन्दित हुए लोग अच्युत का चिन्तन करते हुए कभी रोते हैं, कभी हँसते हैं, कभी हर्षोत्फुल्ल होते हैं, अलौकिक बातें करते हैं, नाचते हैं, गाते हैं, अजन्मा का अनुशीलन करते हैं और कभी मौन हो जाते हैं। ।१४१।*

सप्तमे च (भा०७/७/३४)—

७८. निशम्य कर्माणि गुणानतुल्यान्
वीर्याणि लीला-तनुभिः कृतानि।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति॥ इति। (१४२)

[लीलातनुभिः कृतानि वीर्याणि कर्माणि, अतुल्यान् गुणान् निशम्य यदा अतिहर्षोत्पुलकाश्रु गद्गदं प्रोत्कण्ठः उद्गायति, रौति, नृत्यति॥]

६५. एषात्र भक्तभावानां प्रायिकी प्रक्रियोदिता।
किन्तु कालादिवैशिष्ट्यात् क्वचित् स्यात् सीमलङ्घनम्[37]॥
(१४३)

[भक्तभावानाम् एषा अत्र प्रायिकी प्रक्रिया उदिता। किन्तु कालादिवैशिष्ट्यात् क्वचित् सीमलङ्घनं स्यात्॥]

अथ गौरवप्रीतिः—

६६. लाल्याभिमानिनां कृष्णे स्यात् प्रीतिर्गौरवोत्तरा।
सा विभावादिभिः पुष्टा गौरवप्रीतिरुच्यते॥ (१४४)

[लाल्याभिमानिनां कृष्णे गौरवोत्तरा प्रीतिः स्यात्। विभावादिभिः पुष्टा सा गौरवप्रीतिः उच्यते॥]

तत्र आलम्बनाः—

६७. हरिश्च तस्य लाल्याश्च भवन्त्यालम्बना इह। (१४५)

[इह हरिः च तस्य लाल्याः च आलम्बनाः भवन्ति॥]

तत्र हरिः, यथा—

७९. अयमुपहितकर्णः प्रस्तुते वृष्णिवृद्धै[38]-
र्यदुपतिरितिहासे मन्दहासोज्ज्वलास्यः।
उपदिशति सुधर्मा-मध्यमध्यास्य दीव्यन्
हितमिह निजयाग्रे चेष्टयैवात्मजान्नः॥ (१४६)

[वृष्णिवृद्धैः इतिहासे प्रस्तुते अयं यदुपतिः उपहितकर्णः मन्दहासोज्ज्वलास्यः सुधर्मामध्यम् अध्यास्य दीव्यन् निजया चेष्टया नः आत्मजान् इह हितम् उपदिशति इव॥]

सप्तम में भी (भा. ७/७/३४)—

> ७८. *उन के अतुल्य गुणों को सुनकर और लीला के लिये धारणा किये हुए शरीरों द्वारा किये गये कर्मों तथा पराक्रमों को सुनकर जब भक्त अत्यन्त हर्ष से पुलकित अश्रुओं से गद्गद कण्ठ वाला होकर उत्कण्ठा-सहित उच्च स्वर से गाता है, चिल्लाता है, नाचने लगता है।* ।१४२।

६५. भक्त के भावों की यह प्राय: होने वाली प्रक्रिया कही गई, किन्तु काल आदि की विशिष्टता से कभी-कभी सीमा का लङ्घन भी हो जाता है। ।१४३।

गौरवप्रीति—

६६. जो स्वयं को कृष्ण द्वारा लालन का पात्र समझते हैं उन में ऐसी प्रीति होती है जिस का पर्यवसान गौरव में होता है। वह विभाव आदि के द्वारा पुष्ट होने पर गौरवप्रीति कहलाती है। ।१४४।

इसमें आलम्बन—

६७. यहाँ हरि और उनके लाल्य (लालन के पात्र) आलम्बन होते हैं। ।१४५।

उनमें से हरि, यथा—

> ७९. *सुधर्मा सभा के मध्य बैठकर पासे खेलते हुए यदुपति (श्रीकृष्ण) वृष्णिकुल के वृद्धों द्वारा इतिहास कहे जाने पर मन्दस्मित से उज्ज्वल मुख वाले होकर उधर कान लगा कर सुनने लगे हैं; इस प्रकार वे अपनी इस चेष्टा के द्वारा हम आत्मजों को हित का उपदेश दे रहे हैं (कि अपना खेल छोड़कर बड़ों की बातें ध्यान से सुननी चाहियें।)* ।१४६।

६८. महागुरुर्महाकीर्तिर्महाबुद्धिर्महाबलः।
रक्षी लालक इत्याद्यैर्गुणैरालम्बनो हरिः॥ (१४७)

[हरिः महागुरुः, महाकीर्तिः, महाबुद्धिः, महाबलः, रक्षी, लालकः इत्याद्यैः गुणैः आलम्बनः॥]

अथ लाल्याः—

६९. लाल्याः किल कनिष्ठत्व-पुत्रत्वाद्यभिमानिनः।
कनिष्ठाः सारण-गद-सुभद्रा-प्रमुखाः स्मृताः।
प्रद्युम्नचारुदेष्णाद्याः साम्बाद्याश्च कुमारकाः॥ (१४८)

[लाल्याः किल कनिष्ठत्व-पुत्रत्वादि-अभिमानिनः, कनिष्ठाः सारण-गद-सुभद्रा-प्रमुखाः स्मृताः। प्रद्युम्नचारुदेष्णाद्याः साम्बाद्याः च कुमारकाः॥]

एषां रूपं, यथा—

८०. अपि मुरान्तक-पार्षदमण्डला-
दधिकमण्डनवेशगुणश्रियः[39]।
असित-पीत-सित-द्युतिभिर्युता
यदुकुमारगणाः [40]पुरि रेमिरे॥ (१४९)

[अपि मुरान्तकपार्षदमण्डलात् अधिकमण्डनवेशगुणश्रियः असित-पीत-सित-द्युतिभिर्युताः यदुकुमारगणाः पुरि रेमिरे॥]

एषां भक्तिः—

८१. सग्धिं भजन्ति हरिणा मुखमुन्नमय्य
ताम्बूलचर्वितमदन्ति च दीयमानम्।
[41]घ्राताश्च मूर्ध्नि परिरभ्य भवन्त्युदस्राः
साम्बादयः कति पुरा विदधुस्तपांसि॥ (१५०)

[मुखम् उन्नमय्य हरिणा सग्धिं भजन्ति, दीयमानं च चर्वितं ताम्बूलम् अदन्ति, परिरभ्य मूर्ध्नि घ्राताः च उदस्राः भवन्ति, (अमी) साम्बादयः पुरा कति तपांसि विदधुः ?]

७०. रुक्मिणीनन्दनस्तेषु लाल्येषु प्रवरो मतः। (१५१)

[तेषु लाल्येषु रुक्मिणीनन्दनः प्रवरः मतः।]

६८. महागुरु, महाकीर्त्तिशाली, महाबुद्धिमान्, महाबली, रक्षक, लालक (लालन करने वाला)—ऐसे गुणों के द्वारा हरि आलम्बन बनते हैं। ।१४७।

लाल्य—

६९. अपने आपको कनिष्ठ (छोटा) पुत्र आदि समझने वाले लाल्य (लालन के पात्र) होते हैं। सुभद्रा, सारण, गद आदि कनिष्ठ माने गये हैं। प्रद्युम्न, चारुदेष्ण, साम्ब आदि कुमार (पुत्र) हैं। ।१४८।

इनका रूप यथा—

८०. मुरारि के पार्षद-मण्डल से भी अधिक आभूषण, वेष गुण एवं शोभा से युक्त, कृष्ण-पीत-श्वेत द्युतियों वाले, यदुकुमारगण द्वारिकापुरी में खेलते थे। ।१४९।

इनकी भक्ति यथा—

८१. साम्ब आदि (कुमारों) ने कितने तप किये होंगे (कि) वे हरि के साथ भोजन करते हैं, उनका चबाया हुआ ताम्बूल दिये जाने पर मुख उठाकर खाते हैं; गले लगाकर माथा सूँघा जाने पर मृदुल एवं विनीत हो रहते हैं। ।१५०।

७०. लाल्यों में रुक्मिणी का पुत्र (प्रद्युम्न) श्रेष्ठ माना गया है। ।१५१।

६८. महागुरुर्महाकीर्तिर्महाबुद्धिर्महाबलः ।
रक्षी लालक इत्याद्यैर्गुणैरालम्बनो हरिः ॥ (१४७)

[हरिः महागुरुः, महाकीर्तिः, महाबुद्धिः, महाबलः, रक्षी, लालकः इत्याद्यैः गुणैः आलम्बनः ॥]

अथ लाल्याः—

६९. लाल्याः किल कनिष्ठत्व-पुत्रत्वाद्यभिमानिनः ।
कनिष्ठाः सारण-गद-सुभद्रा-प्रमुखाः स्मृताः ।
प्रद्युम्नचारुदेष्णाद्याः साम्बाद्याश्च कुमारकाः ॥ (१४८)

[लाल्याः किल कनिष्ठत्व-पुत्रत्वादि-अभिमानिनः, कनिष्ठाः सारण-गद-सुभद्रा-प्रमुखाः स्मृताः । प्रद्युम्नचारुदेष्णाद्याः साम्बाद्याः च कुमारकाः ॥]

एषां रूपं, यथा—

८०. अपि मुरान्तक-पार्षदमण्डला-
दधिकमण्डनवेशगुणश्रियः[३९] ।
असित-पीत-सित-द्युतिभिर्युता
यदुकुमारगणाः [४०]पुरि रेमिरे ॥ (१४९)

[अपि मुरान्तकपार्षदमण्डलात् अधिकमण्डनवेशगुणश्रियः असित-पीत-सित-द्युतिभिर्युताः यदुकुमारगणाः पुरि रेमिरे ॥]

एषां भक्तिः—

८१. सग्धिं भजन्ति हरिणा मुखमुन्नमय्य
ताम्बूलचर्वितमदन्ति च दीयमानम् ।
[४१]घ्राताश्च मूर्ध्नि परिरभ्य भवन्त्युदस्राः
साम्बादयः कति पुरा विदधुस्तपांसि ॥ (१५०)

[मुखम् उन्नमय्य हरिणा सग्धिं भजन्ति, दीयमानं च चर्वितं ताम्बूलम् अदन्ति, परिरभ्य मूर्ध्नि घ्राताः च उदस्राः भवन्ति, (अमी) साम्बादयः पुरा कति तपांसि विदधुः ?]

७०. रुक्मिणीनन्दनस्तेषु लाल्येषु प्रवरो मतः । (१५१)

[तेषु लाल्येषु रुक्मिणीनन्दनः प्रवरः मतः ।]

६८. महागुरु, महाकीर्त्तिशाली, महाबुद्धिमान्, महाबली, रक्षक, लालक (लालन करने वाला)—ऐसे गुणों के द्वारा हरि आलम्बन बनते हैं। ।१४७।

लाल्य—

६९. अपने आपको कनिष्ठ (छोटा) पुत्र आदि समझने वाले लाल्य (लालन के पात्र) होते हैं। सुभद्रा, सारण, गद आदि कनिष्ठ माने गये हैं। प्रद्युम्न, चारुदेष्ण, साम्ब आदि कुमार (पुत्र) हैं। ।१४८।

इनका रूप यथा—

> ८०. *मुरारि के पार्षद-मण्डल से भी अधिक आभूषण, वेष गुण एवं शोभा से युक्त, कृष्ण-पीत-श्वेत द्युतियों वाले, यदुकुमारगण द्वारिकापुरी में खेलते थे। ।१४९।*

इनकी भक्ति यथा—

> ८१. *साम्ब आदि (कुमारों) ने कितने तप किये होंगे (कि) वे हरि के साथ भोजन करते हैं, उनका चबाया हुआ ताम्बूल दिये जाने पर मुख उठाकर खाते हैं; गले लगाकर माथा सूँघा जाने पर मृदुल एवं विनीत हो रहते हैं। ।१५०।*

७०. लाल्यों में रुक्मिणी का पुत्र (प्रद्युम्न) श्रेष्ठ माना गया है। ।१५१।

तस्य रूपम्—

८२. स जयति शम्बरदमनः सुकुमारो यदुकुमारकुलमौलिः।
जनयति जनेषु जनकभ्रान्तिं यः सुष्ठु रूपेण॥ (१५२)

[सः शम्बरदमनः सुकुमारः, यदुकुमारकुलमौलिः जयति, यः रूपेण जनेषु जनकभ्रान्तिं सुष्ठु जनयति॥]

अस्य भक्तिः—

८३. प्रभावति! समीक्ष्यतां दिवि कृपाम्बुधिर्मादृशां
स एष परमो गुरुर्गरुडगो यदूनां पतिः।
यतः किमपि लालनं वयमवाप्य दर्पोद्धुराः
पुरारिमपि सङ्गरे गुरुरुषं तिरस्कुर्महे॥ (१५३)

[प्रभावति! समीक्ष्यताम्, दिवि स एष मादृशां कृपाम्बुधिः परमः गुरुः गरुडगः यदूनां पतिः, यतः किम् अपि लालनम् अवाप्य दर्पोद्धुराः वयं सङ्गरे गुरुरुषं पुरारिम् अपि तिरस्कुर्महे॥]

७१. उभयेषां सदाराध्यधियैव भजतामपि।
सेवकानामिहैश्वर्यज्ञानस्यैव प्रधानता।
लाल्यानान्तु स्वसम्बन्ध[४२]-स्फूर्तेरेव समन्ततः॥ (१५४)

[सदा आराध्यधिया एव भजताम् उभयेषाम् अपि सेवकानाम् इह ऐश्वर्यज्ञानस्य एव प्रधानता; लाल्यानां तु स्वसम्बन्धस्फूर्तेः एव समन्ततः प्रधानता॥]

७२. व्रजस्थानां परैश्वर्यज्ञानशून्यधियामपि।
अस्त्येव बल्लवाधीशपुत्रत्वैश्वर्यवेदनम्॥ (१५५)

[परैश्वर्यज्ञानशून्यधियाम् अपि व्रजस्थानां बल्लवाधीशपुत्रत्वैश्वर्यवेदनम् अस्ति एव॥]

अथ उद्दीपनाः—

७३. उद्दीपनास्तु वात्सल्य-स्मितप्रेक्षादयो हरेः। (१५६)

[हरेः वात्सल्य-स्मितप्रेक्षादयः तु उद्दीपनाः॥]

उसका रूप, यथा—

८२. शम्बर असुर का दमन करनेवाला वह सुकुमार (प्रद्युम्न) यदुकुमारों के समूह का मुकुट है, वह अपने उत्तम रूप से लोगों में अपने पिता का भ्रम उत्पन्न करता है। ।१५२।

इनकी भक्ति यथा—

८३. हे प्रभावति देखो! वे जो आकाश में गरुड पर चढ़े हुए जा रहे हैं वे यदुपति हमारे परम गुरु हैं। जिनसे थोड़ा-सा लालन पा कर हम दर्प से ऐसे भर गये हैं कि युद्ध में यदि पुरारि (शिव) भी हमारे गुरु पर रोष करें तो हम उन (शिव) का भी तिरस्कार करते हैं। ।१५३।

७१. (सेवक और लाल्य) ये दोनों ही यद्यपि सदा आराध्यबुद्धि से (श्रीकृष्ण को) भजते हैं, फिर भी सेवकों में यहाँ (श्रीकृष्ण के प्रति) ऐश्वर्यज्ञान की ही प्रधानता है। लाल्यों में अपने सम्बन्ध की स्फूर्त्ति की ही सब ओर से प्रधानता है। ।१५४।

७२. व्रज में स्थित (सेवकों) में यद्यपि परम-ऐश्वर्य ज्ञान नहीं है, फिर भी गोपों के अधीश्वर (नन्दराय) के वे पुत्र हैं ऐसा ऐश्वर्य-ज्ञान तो है ही। ।१५५।

उद्दीपन—

७३. हरि का वात्सल्य, स्मित और प्रेक्षा (देखना) इत्यादि उद्दीपन है। ।१५६।

यथा—

८४. अग्रे सानुग्रहं पश्यन्नग्रजं व्यग्रमानसः।
गदः पदाविन्देऽस्य विदधे दण्डवन्नतिम्॥ (१५७)

[व्यग्रमानसः गदः अग्रे सानुग्रहम् अग्रजम् पश्यन् अस्य पदारविन्दे दण्डवत् नतिं विदधे॥]

अथ अनुभावाः—

७४. अनुभावास्तु तस्याग्रे नीचासननिवेशनम्।
गुरोर्वर्त्मानुसारित्वं धुरस्तस्य परिग्रहः।
स्वैराचार-विमोक्षाद्याः शीता[४३] लाल्येषु कीर्तिताः॥ (१५८)

[लाल्येषु शीताः अनुभावाः तु तस्य अग्रे नीचासननिवेशनम्, गुरोः वर्त्मानुसारित्वम्, तस्य धुरः परिग्रहः, स्वैराचार-विमोक्षाद्याः (इति) कीर्त्तिताः॥]

तत्र नीचासननिवेशनं, यथा—

८५. यदुसदसि सुरेन्द्रैर्द्रागुपव्रज्यमानः
सुखद-करकवार्भिर्ब्रह्मणाभ्युक्षिताङ्गः।
मधुरिपुमभिवन्द्य स्वर्णपीठानि मुञ्चन्
भुवमभि मकराङ्को राङ्कवं स्वीचकार॥ (१५९)

[सुरेन्द्रैः यदुसदसि द्राक् उपव्रज्यमानः सुखदकरकवार्भिः ब्रह्मणा अभ्युक्षिताङ्गः मकराङ्कः मधुरिपुम् अभिवन्द्य स्वर्णपीठानि मुञ्चन् भुवम् अभि राङ्कवं स्वीचकार॥]

७५. [४४]दासैः साधारणाश्चान्ये प्रोच्यन्तेऽमीषु केचन।
प्रणामो मौनबाहुल्यं सङ्कोचः प्रश्रयाढ्यता।
निजप्राणव्ययेनापि तदाज्ञा-परिपालनम्॥ (१६०)

[केचन दासैः साधारणाः च अन्ये (विभावाः) अमीषु प्रोच्यन्ते—प्रणामः, मौनबाहुल्यम्, सङ्कोचः, प्रश्रयाढ्यता, निजप्राणव्ययेन अपि तदाज्ञापरिपालनम्॥]

७६. अधोवदनता स्थैर्यं कास-हासादि वर्जनम्।
तदीयातिरहः-केलिवार्ताद्युपरमादयः[४५]॥ (१६१)

[अधोवदनता, स्थैर्यम्, कास-हासादि-वर्जनम्, तदीयातिरहःकेलिवार्तादि-उपरमादयः॥]

यथा—

८४. सामने अनुग्रहयुक्त बड़े भाई (श्रीकृष्ण) को देखकर (संभ्रम से) व्यग्र चित्तवाले गद ने उनके चरण-कमलों में दण्डवत् प्रणाम किया। ।१५७।

अनुभाव—

७४. उनके सामने नीचे आसन पर बैठना, गुरु के मार्ग का अनुसरण करना, उनके कार्यों का भार ले लेना, मनमाना आचरण छोड़ देना इत्यादि लाल्यों के शीतल अनुभाव कहे गये हैं। ।१५८।

इनमें से नीचे आसन पर बैठना, यथा—

८५. सुरेन्द्र अगुआनी करते है, जिसके अङ्गों पर ब्रह्मा अपने कमण्डल से सुखद जलकण छिड़कते हैं, उस मकराङ्क (कामदेव के अवतार प्रद्युम्न) ने यदुसभा में मधुरिपु (श्रीकृष्ण) को प्रणाम करके स्वर्णपीठ को छोड़कर मृगछाल का आसन स्वीकार किया। ।१५९।

७५-७६. जो अनुभाव दासों में भी पाये जाते हैं उनमें से कुछ अब कहे जा रहे हैं। वे हैं—प्रणाम, मौन की बहुलता, सङ्कोच, सम्मान एवं विनय से पूर्ण होना, अपने प्राण व्यय करके भी प्रभु की आज्ञा का परिपालन, नीचा मुख किये रहना, खाँसी-हँसी आदि का वर्जन, प्रभु की अति रहस्यमयी लीला आदि की वार्ता से उपरत रहना। ।१६०-१६१।

अथ सात्त्विकाः—

८६. कन्दर्प! विन्दति मुकुन्दपदारविन्द-
द्वन्द्वे दृशोः पदमसौ किल निष्प्रकम्पा।
प्रालेयबिन्दुनिचितं धृतकण्टका ते
स्विन्नाद्य कण्टकिफलं तनुरन्वकार्षीत्॥ (१६२)

[कन्दर्प! मुकुन्दपदारविन्दद्वन्द्वे दृशोः पदं विन्दति, निष्प्रकम्पा धृतकण्टका स्विन्ना असौ ते तनुः किल अद्य प्रालेयबिन्दुनिचितं कण्टकिफलम् अनु-अकार्षीत्॥]

अथ व्यभिचारिणः—

७७. अनन्तरोक्ताः सर्वेऽत्र भवन्ति व्यभिचारिणः॥ (१६३)

[अनन्तरोक्ताः सर्वे अत्र व्यभिचारिणः भवन्ति॥]

तत्र हर्षो, यथा—

८७. दूरे दरेन्द्रस्य नभस्युदीर्णे
ध्वनौ स्थितानां यदुराजधान्याम्।
तनूरुहैस्तत्र कुमारकाणां
नटैश्च हृष्यद्भिरकारि नृत्यम्॥ (१६४)

[यदुराजधान्यां दरेन्द्रस्य ध्वनौ नभसि उदीर्णे दूरे स्थितानां कुमारकाणां तनुरुहैः हृष्यद्भिः नटैः च तत्र नृत्यम् अकारि॥]

निर्वेदो, यथा—

८८. धन्यः साम्ब! भवान् सरिङ्गणमयन् पार्श्वे रजःकर्बुरो
यस्तातेन विकृष्य वत्सलतया स्वोत्सङ्गमारोपितः।
धिङ् मां दुर्भगमत्र शम्बरमयैर्दुर्दैव-विस्फूर्जितैः
प्राप्ता न क्षणिकापि लालनरतिः सा येन बाल्ये पितुः॥
(१६५)

[साम्ब! भवान् धन्यः, यः रजःकर्बुरः सरिङ्गणं पार्श्वे अयन् तातेन विकृष्य वत्सलतया स्वोत्सङ्गम् आरोपितः, मां दुर्भगम् अत्र धिक् येन शम्बरमयैः दुर्दैवविस्फूर्जितैः क्षणिका अपि सा पितुः लालनरतिः बाल्ये न प्राप्ता॥]

सात्त्विक भाव—

८६. *हे कन्दर्प! मुकुन्द के चरण-कमल-युगल पर जब तुम्हारी दृष्टि पड़ी तब तुम्हारा यह शरीर निश्चल हो गया, पसीने के कणों से भर गया, रोमाञ्चित होने से ओसकणों से भरे ककरौंदे के फल जैसा कँटीला दिखने लगा। ।१६२।*

व्यभिचारिभाव—

७७. अब यहाँ कहे जा रहे सब भाव व्यभिचारी हैं। ।१६३।

उनमें से हर्ष, यथा—

८७. *दूर से शङ्खराज (पाञ्चजन्य) की ध्वनि आकाश में गूँजने पर यदुराजधानी द्वारिका में स्थित कुमारों के रोम एवं हर्ष-भरे नट नृत्य कर उठे। ।१६४।*

निर्वेद, यथा—

८८. *हे साम्ब! तुम धन्य हो, जोकि धूल से चितकबरे होकर (घुटनों से) रेंगकर पास पहुँचते हुए तुम्हें पिता द्वारा वात्सल्य से खींचकर गोद में बैठा लिया गया। मुझ अभागे को धिक्कार है कि (शैशव में ही) शम्बर-रूपी दुर्दैव के फलस्वरूप मुझे बचपन में पिता की लालनरति क्षण भर भी प्राप्त न हुई। ।१६५।*

अथ स्थायी—

७८. देहसम्बन्धितामानाद्[४६]-गुरुधीरत्र गौरवम्।
तन्मयी लालके प्रीतिर्गौरवप्रीतिरुच्यते॥ (१६६)

[अत्र देहसम्बन्धितामानात् गुरुधीः गौरवम्, लालके तन्मयी प्रीतिः गौरवप्रीतिः उच्यते॥]

७९. स्थायिभावोऽत्र सा चैषामामूलात् स्वयमुच्छ्रिता[४७]।
कञ्चिद्विशेषमापन्ना प्रेमेति स्नेह इत्यपि।
राग इत्युच्यते चात्र गौरवप्रीतिरेव सा॥ (१६७)

[एषां स्थायिभावः च अत्र सा आमूलात् स्वयम् उच्छ्रिता, कञ्चित् विशेषम् आपन्ना प्रेमा इति स्नेहः इति रागः इति अपि उच्यते। अत्र सा गौरवप्रीतिः एव॥]

तत्र गौरवप्रीतिः, यथा—

८९. मुद्रां भिनत्ति न रदच्छदयोरमन्दां
वक्त्रञ्च नोन्नमयति स्रवदस्रकीर्णम्।
धीरः परं किमपि सङ्कुचतीं झषाङ्को
दृष्टिं क्षिपत्यघभिदश्चरणारविन्दे॥ (१६८)

[धीरः झषाङ्कः रदच्छदयोः अमन्दां मुद्रां न भिनत्ति, स्रवदस्रकीर्णं वक्त्रं च न उन्नमयति, परं किम् अपि सङ्कुचतीं दृष्टिम् अघभिदः चरणारविन्दे क्षिपति॥]

प्रेमा, यथा—

९०. द्विषद्भिः क्षोदिष्ठैर्जगदविहतेच्छस्य[४८] भवतः
करादाकृष्येव प्रसभमभिमन्यावपि हते।
सुभद्रायाः प्रीतिर्दनुजदमन! त्वद्विषयिका
प्रपेदे कल्याणी न हि मलिनिमानं लवमपि॥ (१६९)

[क्षोदिष्ठैः द्विषद्भिः जगदविहतेच्छस्य भवतः करात् आकृष्य इव अभिमन्यौ प्रसभं हते अपि, दनुजदमन! सुभद्रायाः त्वद्विषयिका कल्याणी प्रीतिः लवम् अपि मलिनिमानम् न प्रपेदे॥]

स्थायी भाव—

७८. देह के सम्बन्ध के अनुसार गुरुबुद्धि अर्थात् बड़ा मानना ही यहाँ गौरव कहा गया है। लालन करने वाले के प्रति ऐसे गौरव से युक्त प्रीति गौरवप्रीति कहलाती है। ।१६६।

७९. वही प्रीति यहाँ स्थायी भाव है। वह इन भक्तों के मूल से ही अर्थात् हृदय को व्याप्त किये हुए स्वयं ही प्रादुर्भूत होती है। वही कुछ विशेष अवस्था को प्राप्त होते हुए क्रमशः प्रेम, स्नेह और राग कहलाती है। वह गौरवप्रीति ही है। ।१६७।

गौरवप्रीति, यथा—

८९. मकरचिह्नित धीर कामदेव (प्रद्युम्न) होठों की सुन्दर मुद्रा को नहीं तोड़ते अर्थात् मौन हैं, बहते हुए आंसुओं से भीगे मुख को ऊपर नहीं उठाते, किन्तु कुछ-कुछ सङ्कोचभरी दृष्टि अघनाशक (श्रीकृष्ण) के चरण-कमल पर डाले हुए हैं। ।१६८।

प्रेम, यथा—

९०. हे दनुजदमन! जगत् में जिसकी इच्छा अप्रतिहत है ऐसे आपके हाथ से क्षुद्र शत्रुओं द्वारा मानों बलपूर्वक खींचकर अभिमन्यु के मारे जाने पर भी (उसकी माँ) सुभद्रा की आपके प्रति कल्याणी प्रीति लेशमात्र भी मलिनता को प्राप्त नहीं हुई। ।१६९।

स्नेहो, यथा—

९१. विमुञ्च पृथु-वेपथुं विसृज कण्ठकुण्ठायितं
विमृज्य मयि निक्षिप प्रसरदश्रुधारे दृशौ।
करञ्च मकरध्वज! प्रकट-कण्टकालङ्कृतं
निधेहि सविधे पितुः कथय वत्स! कः सम्भ्रमः? (१७०)

[मकरध्वज! पृथुवेपथुं विमुञ्च, कण्ठकुण्ठायितं विसृज, प्रसरदश्रुधारे विमृज्य दृशौ मयि निक्षिप, प्रकटकण्टकालङ्कृतं करं च (मयि) पितुः सविधे निधेहि। वत्स! कथय, कः सम्भ्रमः?]

रागो, यथा—

९२. विषमपि सहसा[४९] सुधामिवायं
निपिबति चेत् पितुरिङ्गितं झषाङ्कः।
विसृजति तदसम्मतिर्यदि स्याद्-
विषमिव तान्तु सुधां स एष सद्यः॥ (१७१)

[अयं झषाङ्कः, पितुः इङ्गितं चेत् विषम् अपि सहसा सुधाम् इव निपिबति, यदि तु तदसम्मतिः स्यात् तां सुधां सः एव विषम् इव सद्यः विसृजति॥]

८०. त्रिष्वेवायोगयोगाद्या भेदाः पूर्ववदीरिताः॥ (१७२)

[अयोगयोगाद्याः भेदाः त्रिषु एव पूर्ववत् ईरिताः॥]

तत्र उत्कण्ठितम्—

९३. शम्बरः सुमुखि! लब्ध-दुर्विपड्-
डम्बरः स रिपुरम्बरायितः[५०]।
अम्बुराजमहसं कदा गुरुं
कम्बुराजकरमीक्षितास्महे॥ (१७३)

[सुमुखि! लब्धदुर्विपड्डम्बरः सः शम्बरः रिपुः अम्बरायितः। कदा अम्बुराजमहसं कम्बुराजकरं गुरुम् ईक्षितास्महे॥]

अथ वियोगः—

९४. मनो ममेष्टामपि गेण्डुलीलां[५१]
न वष्टि योग्याञ्च तथास्त्रयोग्याम्।
गुरौ पुरं कौरवमभ्युपेते
कारामिव द्वारवतीमवैति॥ (१७४)

[मम मनः इष्टाम् अपि गेण्डुलीलां तथा योग्यां अस्त्रयोग्यां च न वष्टि, गुरौ कौरवं पुरम् अभ्युपेते काराम् इव द्वारवतीम् अवैति।]

स्नेह, यथा—

९१. *हे वत्स! मकरध्वज! (प्रद्युम्न) अत्यधिक काँपना छोड़ दो। गले का रुँधना भी त्याग दो, बहते अश्रुओं वाले नयन पोंछकर मेरी ओर देखो! स्फुट रोमाञ्च से भरा हाथ समीप ही स्थित मुझ पिता पर रखो, कहो तो! क्यों घबरा रहे हो?* ।१७०।

राग, यथा—

९२. *यह मकरचिह्न वाला (प्रद्युम्न) पिता का सङ्केत पाकर विष को भी अमृत की तरह पूरी तरह पी जाता है, और पिता की सम्मति न होने पर सुधा को भी विष की भाँति तत्काल त्याग देता है।* ।१७१।

८०. इन तीनों (प्रेम, स्नेह, राग) के ही अयोग, योग आदि भेद पहले की भाँति ही कहे गये हैं। ।१७२।

उनमें से उत्कण्ठित—

९३. *हे सुमुखि! भारी विपत्ति-ग्रस्त शम्बर को तो (मैंने) अम्बर (शून्य) बना (मिटा) दिया है, अब नीलकमल जैसी कान्ति-युक्त एवं शङ्खराज (पाञ्चजन्य) हाथ में लिये हुए (अपने पिता) गुरु को कब देखेंगे?* ।१७३।

वियोग—

९४. *गेंद खेलना मुझे प्रिय है पर मन उसे नहीं चाहता, अस्त्रों का अभ्यास उचित है, पर उसे भी मन नहीं चाहता, पिता (श्रीकृष्ण) कौरवपुर (हस्तिनापुर) चले जाते हैं तब मन द्वारवती (द्वारिका नगरी) को कारागार ही समझने लगता है।* ।१७४।

सिद्धिः—

९५. मिलितः शम्बरपुरतो
मदनः पुरतो विलोकयन् पितरम्।
कोऽहमिति एवं प्रमदा-
न्न धीरधीरप्यसौ वेद॥ (१७५)

[शम्बरपुरतः मिलितः मदनः पुरतः पितरं विलोकयन्, प्रमदात् कः अहम् इति असौ धीरधीः अपि स्वं न वेद॥]

तुष्टिः—

९६. मिलितमधिष्ठित-गरुडं
प्रेक्ष्य युधिष्ठिर-पुरान्मुरारातिम्।
अजनि मुदा यदुनगरे
सम्भ्रमभूमा कुमाराणाम्॥ (१७६)

[युधिष्ठिरपुरात् अधिष्ठितगरुडं मिलितं मुरारातिं प्रेक्ष्य यदुनगरे कुमाराणां सम्भ्रमभूमा मुदा अजनि॥]

स्थितिः—

९७. कुञ्चयन्नक्षिणी किञ्चिद्बाष्पनिस्यन्दि[५२]-पक्ष्मणी।
वन्दते[५३] पादयोर्द्वन्द्वं पितुः प्रतिदिनं स्मरः॥ (१७७)

[किञ्चिद् बाष्पनिस्यन्दिपक्ष्मणी अक्षिणी कुञ्चयन् स्मरः प्रतिदिनं पितुः पादयोः द्वन्द्वं वन्दते॥]

८१. उत्कण्ठितवियोगाद्ये[५४] यद्यद्विस्तारितं न हि।
सम्भ्रम-प्रीतवज्ज्ञेयं तत्तदेवाखिलं बुधैः॥ (१७८)

[उत्कण्ठितवियोगाद्ये यत् यत् न हि विस्तारितं तत् तत् अखिलम् एव बुधैः सम्भ्रमप्रीतवत् ज्ञेयम्॥]

॥ इति श्रीभक्तिरसामृतसिन्धौ पश्चिमविभागे
मुख्य-भक्तिरसपञ्चक-निरूपणे प्रीतभक्तिरस-लहरी द्वितीया॥

सिद्धि—

९५. *शम्बरपुर से (द्वारिका) आने पर पिता (श्रीकृष्ण) को सामने देखते हुए कामदेव (प्रद्युम्न) धीरबुद्धिवाले होने पर भी प्रकृष्ट मद (अतिशय आनन्द) के कारण "मैं कौन हूँ"- यह न जान सके। (दोनों का रूप समान होने के कारण आनन्दमय भ्रम में पड़कर मानों पहचान नहीं पा रहे थे कि मैं कौन हूँ और पिता कौन हैं?) ।१७५।*

तुष्टि—

९६. *युधिष्ठिर के नगर (इन्द्रप्रस्थ) से (द्वारिका) पहुँचे हुए, गरुड़ पर आरूढ़ मुरारि को देखकर यदुनगर (द्वारिका) में कुमारों को आनन्द से महान् संभ्रम हो गया। ।१७६।*

स्थिति—

९७. *कामदेव (प्रद्युम्न) प्रेमाश्रु बहाती पलकों वाले अपने नयन थोड़े सिकोड़ कर (अर्धनिमीलित नयनों से) प्रतिदिन पिता के चरणयुगल में वन्दन, प्रणाम करते हैं। ।१७७।*

८१. उत्कण्ठित वियोग में जिस-जिस विषय का विस्तार नहीं किया गया है, उसे बुद्धिशील जनों द्वारा सम्भ्रमप्रीति (में किये गये विस्तार) के समान ही समझ लेना चाहिये। ।१७८।

॥ श्रीभक्तिरसामृतसिन्धु के पश्चिम विभाग में मुख्य पाँच भक्तिरसों के निरूपण में दूसरी प्रीतभक्तिरस-लहरी समाप्त हुई॥

प्रेयोभक्तिरसाख्या तृतीयलहरी

१. स्थायी भावो विभावाद्यैः सख्यमात्मोचितैरिह।
नीतश्चित्ते सतां पुष्टिं रसः प्रेयानुदीर्यते॥ (१)

[इह सख्यम् स्थायी भावः आत्मोचितैः विभावाद्यैः सतां चित्ते पुष्टिं नीतः प्रेयान् रसः उदीर्यते॥]

तत्र आलम्बनाः—

२. [1]हरिश्च तद्वयस्याश्च तस्मिन्नालम्बना मताः। (२)

[हरिः च तद्वयस्याः च तस्मिन् आलम्बनाः मताः॥]

तत्र [2]हरिः—

३. द्विभुजत्वादि-भागत्र प्राग्वदालम्बनो हरिः ॥ (३)

[द्विभुजत्वादिभाक् हरिः अत्र प्राग्वत् आलम्बनः॥]

तत्र व्रजे, यथा—

१. महेन्द्रमणिमञ्जुलद्युतिरमन्दकुन्दस्मितः
स्फुरत्पुरटकेतकीकुसुमरम्यपट्टाम्बरः।
स्रगुल्लसदुरःस्थलः क्वणितवेणुरत्राव्रजन्
व्रजादघहरो हरत्यहह नः सखीनां मनः॥ (४)

[महेन्द्रमणिमञ्जुलद्युतिः, अमन्दकुन्दस्मितः, स्फुरत्पुरटकेतकीकुसुमरम्यपट्टाम्बरः, स्रगुल्लसदुरःस्थलः क्वणितवेणुः व्रजात् अत्र आव्रजन् अघहरः अहह! नः सखीनां मनः हरति॥]

अन्यत्र यथा—

२. चञ्चत्कौस्तुभकौमुदीसमुदयं कौमोदकीचक्रयोः
सख्येनोज्ज्वलितैस्तथा जलजयोराढ्यं चतुर्भिर्भुजैः।
दृष्ट्वा हारिहरिन्मणिद्युतिहरं शौरिं हिरण्याम्बरं
जग्मुः पाण्डुसुताः प्रमोदसुधया नैवात्मसम्भावनाम्॥ (५)

[कौमोदकीचक्रयोः तथा जलजयोः सख्येनोज्ज्वलितैः चतुर्भिर्भुजैः आढ्यं चञ्चत्कौस्तुभकौमुदीसमुदयं हारिहरिन्मणिद्युतिहरं हिरण्याम्बरं शौरिं दृष्ट्वा पाण्डुसुताः प्रमोदसुधया आत्मसम्भावनां न एव जग्मुः॥]

तृतीय लहरी—प्रेयोभक्तिरस

१. सख्य स्थायिभाव जब अपने उचित विभावादिकों के साथ चित्त में पुष्ट होता है, तब वह यहाँ प्रेयान् रस कहलाता है। ।१।

उसके आलम्बन—

२. हरि और उनके वयस्य (सखा) इसमें आलम्बन माने गये हैं। ।२।

उनमें से हरि—

३. यहाँ द्विभुजत्व आदि से युक्त हरि पहले की भाँति आलम्बन हैं। ।३।

यथा व्रज में—

१. *महेन्द्रमणि (नीलम) के समान जिनकी सुन्दर द्युति है, जिनका स्मित उज्ज्वल कुन्द के समान है; जिनके रेशमी वस्त्र चमकते हुए स्वर्ण एवं केतकी-पुष्प के सदृश हैं, जिनके वक्षःस्थल पर पुष्पमाला सुशोभित है, ऐसे अघहर वेणुनाद करते हुए व्रज से यहाँ आते हुए हम सखाओं का मन हर रहे हैं।* *।४।*

अन्यत्र यथा—

२. *जिनके कौस्तुभमणि की कान्ति का पुञ्ज इधर-उधर फैल रहा है। जिनकी चार भुजायें-कौमोदकी (गदा), चक्र (सुदर्शन) के साथ दो जलज (शङ्ख तथा कमल) के सख्य से सुशोभित हैं, जो (वर्ण से) मनोहर हरे मणि (पन्ने) की कान्ति का हरण करते हैं, स्वर्णिम पीताम्बर धारण किये हुए हैं ऐसे शौरि (वासुदेव) को देखकर सभी पाण्डव प्रमोद-सुधा (आनन्द-मद) के कारण अपनी सुध-बुध खो बैठे।* *।५।*

४. सुवेषः सर्वसल्लक्ष्मलक्षितो बलिनां वरः।
विविधाद्भुतभाषाविद्वावदूकः सुपण्डितः॥ (६)

[सुवेषः, सर्वलक्ष्मलक्षितः, बलिनां वरः, विविधाद्‌भुतभाषावित् वावदूकः, सुपण्डितः॥]

५. विपुलप्रतिभो दक्षः करुणो वीरशेखरः।
विदग्धो बुद्धिमान् क्षन्ता रक्तलोकः समृद्धिमान्।
सुखी वरीयानित्याद्या गुणास्तस्येह कीर्तिताः॥ (७)

[विपुलप्रतिभः, दक्षः, करुणः, वीरशेखरः, विदग्धः, बुद्धिमान्, क्षन्ता, रक्तलोकः, समृद्धिमान्, सुखी, वरीयान् इत्याद्याः तस्य गुणाः इह कीर्तिताः॥]

अथ तद्वयस्याः—

६. रूपवेषगुणाद्यैस्तु समाः सम्यगयन्त्रिताः।
विश्रम्भसम्भृतात्मानो वयस्यास्तस्य कीर्तिताः॥ (८)

[तस्य वयस्याः रूप-वेष-गुणाद्यैः तु समाः सम्यग् अयन्त्रिताः विश्रम्भसम्भृतात्मानः कीर्त्तिताः॥]

यथा—

३. साम्येन भीतिविधुरेण विधीयमान-
भक्तिंप्रपञ्चमनुदञ्चदनुग्रहेण[3]।
विश्रम्भसारनिकुरम्बकरम्बितेन
वन्देतरामघहरस्य वयस्यवृन्दम्[4]॥ (९)

[भीतिविधुरेण साम्येन, विश्रम्भसारनिकुरम्बकरम्बितेन अन्-उदञ्चदनुग्रहेण (च) विधीयमानभक्तिप्रपञ्चम् अघहरस्य वयस्यवृन्दं वन्देतराम्॥]

७. ते पुरव्रजसम्बन्धाद् द्विविधाः प्राय ईरिताः। (१०)

[ते प्रायः पुर-व्रज-सम्बन्धात् द्विविधाः ईरिताः॥]

तत्र पुरसम्बन्धिनः—

८. अर्जुनो भीमसेनश्च दुहिता द्रुपदस्य च।
श्रीदाम-भूसुराद्याश्च सखायः पुरसंश्रयाः॥ (११)

[अर्जुनः भीमसेनः च द्रुपदस्य दुहिता च, श्रीदाम-भूसुराद्याः च पुरसंश्रयाः सखायः॥]

४-५. सुन्दर वेशवाला, अच्छे लक्षणों से युक्त, बलवान् व्यक्तियों में श्रेष्ठ, विविध अद्भुत भाषाओं का ज्ञाता, वाक्चतुर, सुपण्डित, विपुल-प्रतिभाशाली, दक्ष (कुशल), करुण, वीरश्रेष्ठ, विदग्ध, बुद्धिमान्, क्षमाशील, लोक-रञ्जक, समृद्धिमान्, सुखी, श्रेष्ठ—इत्यादि उनके गुण यहाँ कहे गये हैं। ।६-७।

उनके वयस्य—

६. रूप वेश गुण आदि से (श्रीकृष्ण के) समान, भली-भाँति अयन्त्रित अर्थात् स्वतन्त्र, विश्रम्भ से सम्पन्न चित्त वाले, पुरवासी (मथुरा-द्वारकावासी) सखा होते हैं। ।८।

३. अघहर (श्रीकृष्ण) के ऐसे वयस्यवृन्द को मैं वंन्दन करता हूँ जो भयरहित समानता से विश्रम्भसार के पुञ्ज से मिश्रित एवं अनावृत अनुग्रह से भक्ति का विस्तार सम्पन्न करते रहते हैं। ।९।

७. वे (वयस्य) पुर और व्रज के सम्बन्ध से प्रायः द्विविध कहे गये हैं। ।१०।

उनमें से पुरसम्बन्धी—

८. अर्जुन, भीमसेन, और द्रौपदी, तथा श्रीदामा (सुदामा)-ब्राह्मण आदि पुर-संश्रित वयस्य हैं। ।११।

एषां सख्यं, यथा—

४. शिरसि नृपतिर्द्रागघ्रासीदघारिमधीरधी-
भुर्जपरिघयोः शिलष्टौ भीमार्जुनौ पुलकोज्ज्वलौ।
पदकमलयोः सास्रौ दस्रात्मजौ च निपेततु-
स्तमवशधियः प्रौढानन्दादरुन्धत पाण्डवाः॥ (१२)

[अधीरधीः नृपतिः अघारिं शिरसि द्राक् अघ्रासीत्, भीमार्जुनौ भुजपरिघयोः शिलष्टौ, पुलकोज्ज्वलौ सास्रौ दस्रात्मजौ च पदकमलयोः निपेततुः। अवशधियः पाण्डवाः तं प्रौढानन्दात् अरुन्धत॥]

९. श्रेष्ठः पुरवयस्येषु भगवान् वानरध्वजः॥ (१३)

[पुरवयस्येषु भगवान् वानरध्वजः श्रेष्ठः॥]

अस्य रूपं, यथा—

५. गाण्डीवपाणिः करिराजशुण्डा-
रम्योरुरिन्दीवरसुन्दराभः[५]।
रथाङ्गिना रत्नरथाधिरोही
स रोहिताक्षः[६] सुतरामराजीत्॥ (१४)

[सः गाण्डीवपाणिः करिराजशुण्डारम्भोरुः, इन्दीवरसुन्दराभः रोहिताक्षः, रत्नरथाधिरोही रथाङ्गिना सुतराम् अराजीत्॥]

सख्यं, यथा—

६. पर्यङ्के महति सुरारिहन्तुरङ्के
निःशङ्क-प्रणय-निसृष्ट-पूर्वकायः।
उन्मीलन्नव-नव-नर्म-कर्मठोऽयं
गाण्डीवी स्मितवदनाम्बुजो व्यराजीत्॥ (१५)

[महति पर्यङ्के सुरारिहन्तुः अङ्के निःशङ्कप्रणय-निसृष्टपूर्वकायः, स्मितवदनाम्बुजः, उन्मीलन्नव-नव-नर्म-कर्मठः अयं गाण्डीवी व्यराजीत्॥]

इनका सख्य, यथा—

४. *अधीर-बुद्धि वाले राजा (युधिष्ठिर) ने अघारि (श्रीकृष्ण) के मस्तक को झट सूँघा, पुलकावलि से सुशोभित भीम एवं अर्जुन उन की भुजाओं में भर गये (आलिङ्गन किया) अश्विनीकुमारों के पुत्र नकुल-सहदेव आनन्दाश्रुभरे नयनों से उनके चरणों में गिर पड़े। विवश-बुद्धि वाले पाण्डवों ने प्रौढ़ आनन्द से उन्हें थाम लिया। ।१२।*

९. पुर के वयस्यों में श्रेष्ठ है—कपिध्वज भगवान् अर्जुन। ।१३।

अर्जुन का रूप, यथा—

५. *हाथों में गाण्डीव लिये, श्रेष्ठ हाथी की सूँड जैसे सुन्दर ऊरुओं वाला, नीलकमल जैसी सुन्दर आभा वाला, रक्त-नेत्रों वाला, रत्नजटित रथ पर चढ़ा हुआ वह (अर्जुन) चक्रधारी (श्रीकृष्ण) के साथ भली-भाँति सुशोभित हुआ। ।१४।*

उसका सख्य, यथा—

६. *यह गाण्डीवधारी बड़े पलँग पर असुरसंहारक श्रीकृष्ण के अङ्क में निःशङ्क होकर, प्रेम से शरीर का ऊपरी भाग ढाले हुए, स्मितपूर्ण मुखकमल-वाला, नये-नये हासोपहासमय वचन कहता हुआ, सुशोभित था। ।१५।*

अथ व्रजसम्बन्धिनः—

१०. क्षणादर्शनतो दीनाः सदा सह-विहारिणः।
तदेकजीविताः प्रोक्ता वयस्या व्रजवासिनः।
अतः सर्ववयस्येषु प्रधानत्वं भजन्त्यमी॥ (१६)

[व्रजवासिनः वयस्याः क्षणात् अदर्शनतः दीनाः, सदा सहविहारिणः, तदेकजीविताः, प्रोक्ताः। अतः अमी सर्ववयस्येषु प्रधानत्वं भजन्ति॥]

एषां रूपं, यथा—

७. बलानुजसदृग्वयो-गण-विलास-वेष-श्रियः
प्रियङ्करण-"वल्लकीदल-विषाण"-वेण्वङ्किताः।
महेन्द्रमणिहाटकस्फटिकपद्मरागत्विषः
सदा प्रणयशालिनः सहचरा हरेः पान्तु वः॥ (१७)

[बलानुज-सदृग्-वयोगुण-विलास-वेष-श्रियः, प्रियङ्करण-वल्लकीदल-विषाण-वेण्वङ्किताः, महेन्द्रमणि-हाटक-स्फटिक-पद्मरागत्विषः, सदा प्रणयशालिनः हरेः सहचराः वः पान्तु॥]

सख्यं, यथा—

८. उन्निद्रस्य ययुस्तवात्र विरतिं सप्त क्षपास्तिष्ठतो
हन्त श्रान्त इवासि निक्षिप सखे! श्रीदामपाणौ गिरिम्।
आधिर्विध्यति नस्त्वमर्पय करे किंवा क्षणं दक्षिणे
दोष्णस्ते करवाम काममधुना सव्यस्य संवाहनम्॥ (१८)

[तव उन्निद्रस्य अत्र तिष्ठतः सप्त क्षपाः विरतिं ययुः, हन्त! श्रान्तः इव असि, सखे! श्रीदामपाणौ गिरिं निक्षिप, किं वा दक्षिणे करे क्षणम् अर्पय, आधिः नः विध्यति, ते सव्यस्य दोष्णः अधुना कामं संवाहनं करवाम॥]

यथा वा श्रीदशमे (भा०१०/१२/११)—

९. इत्थं सतां ब्रह्मसुखानुभूत्या
दास्यं गतानां परदैवतेन।
मायाश्रितानां नरदारकेण
सार्धं विजह्रुः कृतपुण्यपुञ्जाः॥ (१९)

[इत्थं सतां ब्रह्मसुखानुभूत्या, दास्यं गतानां परदैवतेन, मायाश्रितानां नरदारकेण सार्धं कृतपुण्यपुञ्जाः विजह्रुः॥]

अब व्रजसम्बन्धी वयस्य—

१०. क्षणभर भी (श्रीकृष्ण को) न देख पाने से जो दीन हो जाते हैं, जो सदा उनके साथ विहार करते हैं, जिनके प्राण उन्हीं में बसते हैं- ऐसे व्रजवासी वयस्य कहे गये हैं। इसलिये ये सभी वयस्यों में प्रधान हैं। ।१६।

उनका रूप, यथा—

७. हरि के (वे) सहचर आप लोगों की रक्षा करें, जो बलदेव के छोटे भाई (श्रीकृष्ण) के सदृश वयस्, गुण, विलास और वेश से सुशोभित है, जो प्रियकारी वल्लकीदल (पत्ते से बने सुषिर वाद्य) सींगे तथा वेणु लिये हुए हैं, जो महेन्द्रमणि (नीलम) सुवर्ण, स्फटिक तथा माणिक जैसी कान्तियों से युक्त हैं तथा जो सदा प्रेमशील हैं। ।१७।

उनका सख्य, यथा—

८. हे सखे! उनींदे रहते हुए तुम्हें सात रात्रियाँ बीत चुकी हैं, हाय! थके-से लग रहे हो, सखे! श्रीदामा के हाथ पर पर्वत रख दो, हमें चिन्ता हो रही है, अथवा क्षण-भर इसे दाहिने हाथ पर रख दो, ताकि हम तुम्हारे बाँये हाथ को जी भर कर सहला दें, या दबा दें। ।१८।

अथवा यथा श्रीदशम में (भा. १०/१२/११)—

९. इस प्रकार, सत्पुरुषों के लिये जो ब्रह्मसुखानुभव स्वरूप हैं, दास्यभाव-वालों के लिये जो परम दैवत हैं, मायाश्रित लोगों के लिये जो मनुष्य-बालक-मात्र हैं—ऐसे श्रीकृष्ण के साथ अनेक पुण्य किये हुए (ये सखा-गण) विहार करते थे। ।१९।

एषु श्रीकृष्णस्य सख्यं, यथा—

१०. सहचर-निकुरम्बं भ्रातरार्य! प्रविष्टं
द्रुतमघ़जठरान्तः कोटरे प्रेक्षमाणः।
स्खलदशिशिरबाष्पक्षालित-क्षामगण्डः
क्षणमहमवसीदन् शून्यचित्तस्तदासम्॥ (२०)

[भ्रातः आर्य! सहचरनिकुरम्बं द्रुतम् अघजठरान्तः कोटरे प्रविष्टं प्रेक्षमाणः अहं स्ख़लदशिशिरबाष्प-क्षालित-क्षामगण्डः क्षणम् अवसीदन् तदा शून्यचित्तः आसम्॥]

११. सुहृदश्च सखायश्च तथा प्रियसखाः परे।
प्रियनर्मवयस्याश्चेत्युक्ता गोष्ठे चतुर्विधाः॥ (२१)

[गोष्ठे सुहृदः च सखायः च तथा परे प्रियसखाः प्रियनर्मवयस्याः च इति चतुर्विधाः उक्ताः॥]

तत्र सुहृदः—

१२. वात्सल्यगन्धि-सख्यास्तु किञ्चित्ते वयसाधिकाः।
सायुधास्तस्य दुष्टेभ्यः सदा रक्षा-परायणाः॥ (२२)

[ते वात्सल्यगन्धिसख्याः तु वय़सा किञ्चित् अधिकाः, दुष्टेभ्यः तस्य रक्षा-परायणाः सदा सायुधाः॥]

१३. सुभद्र-मण्डलीभद्र-भद्रवर्धन-गोभटाः।
यक्षेन्द्रभट[१]-भद्राङ्ग-वीरभद्रा महागुणाः।
विजयो बलभद्राद्याः सुहृदस्तस्य कीर्तिताः॥ (२३)

[सुभद्र-मण्डलीभद्र-भद्रवर्धन-गोंभटाः, यक्षेन्द्रभट-भद्राङ्ग-वीरभद्राः विजयः, बलभद्राद्याः महागुणाः, तस्य सुहृदः कीर्तिताः॥]

एषां सख्यं, यथा—

११. धुन्वन् धावसि मण्डलाग्रममलं त्वं मण्डलीभद्र! किं
गुर्वीं नार्य! गदां गृहाण विजय! क्षोभं वृथा मा कृथाः।
शक्तिं न क्षिप भद्रवर्धन! पुरो गोवर्धनं गाहते
गर्जन्नेष़ घनो बली न तु बलीवर्दाकृतिर्दानवः॥ (२४)

[मण्डलीभद्र! त्वं किम् अमलं मण्डलाग्रं धुन्वन् धावसि! आर्य! गुर्वीं गदां न गृहाण। विजय! वृथा क्षोभं मा कृथाः! भद्रवर्धन! शक्तिं मा क्षिप। पुरः गर्जन् एषः बली घनः गोवर्धनं गाहते, न तु बलीवर्दाकृतिः दानवः॥]

इनके प्रति श्रीकृष्ण का सख्य, यथा—

१०. *हे बड़े भैया, मैंने जब सहचरों के समूह को अघासुर के जठर (पेट) के भीतरी कोटर में घुसे हुए देखा, तब बहते हुए उष्ण आँसुओं से मेरे कुम्हलाये हुए गाल धुलने लगे; उस समय मैं दुःखी होता हुआ शून्यचित्त-वाला हो गया।* *।२०।*

११. व्रज में चार प्रकार के (वयस्य) कहे गये हैं—सुहृद्, सखा, प्रिय सखा और प्रिय नर्मवयस्य। ।२१।

उनमें से सुहृद्—

१२. वयस् में किञ्चिद् अधिक, वात्सल्यगन्धि सखा (सुहृद्) हैं, जोकि आयुध-युक्त हैं और दुष्टों से उन श्रीकृष्ण की रक्षां में सदा तत्पर हैं। ।२२।

१३. सुभद्र, मण्डलीभद्र, गोभट, यक्षेन्द्रभट, भद्राङ्ग, और वीरभद्र विजय तथा बलभद्र आदि-ये महान्-गुणशाली उनके सुहृद् हैं। ।२३।

इनका सख्य यथा—

११. *हे मण्डलीभद्र! तुम निर्मल (स्वच्छ) खड्ग को घुमाते हुए क्यों दौड़ रहे हो? आर्य! भारी गदा को मत उठाइये! विजय! वृथा क्षोभ न करो! भद्रवर्धन 'शक्ति' (अस्त्र-विशेष) मत फेंको! सामने गरजता हुआ बादल ही गोवर्धन पर छा रहा है, यह बैल की आकृति वाला दानव (अरिष्टासुर) नहीं है।* *।२४।*

१४. सुहृत्सु मण्डलीभद्र-बलभद्रौ किलोत्तमौ॥ (२५)

[मण्डलीभद्र-बलभद्रौ किल सुहृत्सु उत्तमौ॥]

तत्र मण्डलीभद्रस्य रूपं, यथा—

१२. पाटलपटलसदङ्गो
लकुटकरः[10] शेखरी शिखण्डेन।
द्युतिमण्डलीमलिनिभां
भाति दधन्मण्डलीभद्रः॥ (२६)

[पाटलपटलसदङ्गः, लकुटकरः, शिखण्डेन शेखरी, अलिनिभां द्युतिमण्डलीं दधत् मण्डलीभद्रः भाति॥]

अस्य सख्यं, यथा—

१३. वनभ्रमणकेलिभिर्गुरुभिरह्नि खिन्नीकृतः
सुखं स्वपितु नः सुहृद् व्रज-निशान्तमध्ये निशि।
अहं शिरसि मर्दनं मृदु करोमि कर्णे कथां
त्वमस्य विसृजन्नलं सुबल! सक्थिनी लालय॥ (२७)

[गुरुभिः वनभ्रमणकेलिभिः अह्नि खिन्नीकृतः, नः सुहृद् निशि व्रजनिशान्तमध्ये सुखं स्वपितु। अहं शिरसि मृदु मर्दनं करोमि, सुबल! त्वम् अस्य कर्णे कथां विसृजन् अलं सक्थिनीं लालय॥]

बलदेवस्य रूपं, यथा—

१४. गण्डान्तः स्फुरदेककुण्डलमलिच्छन्नावतंसोत्पलं
कस्तूरीकृत-चित्रकं[11] पृथुहृदिभ्राजिष्णुगुञ्जास्रजम्।
तं वीरं शरदम्बुदद्युतिभरं[12] संवीतकालाम्बरं
गम्भीरस्वनितं, प्रलम्बभुजमालम्बे प्रलम्बद्विषम्॥ (२८)

[गण्डान्तः स्फुरदेक-कुण्डलम् अलिच्छन्नावतंसोत्पलम्, कस्तूरीकृतचित्रकम्, पृथुहृदिभ्राजिष्णुगुञ्जास्रजम्, शरदम्बुदद्युतिभरम्, संवीतकालाम्बरम् प्रलम्बद्विषम्, प्रलम्बभुजम्, गम्भीरस्वनितम्, तं वीरम् आलम्बे॥]

१४. सुहृदों में मण्डलीभद्र और बलभद्र उत्तम हैं। ।२५।

उनमें से मण्डलीभद्र का रूप, यथा—

१२. जिसका शरीर गुलाबी वस्त्रों से सुशोभित है, जो हाथ में लाठी लिये है, जो माथे पर मयूरपंख लगाये हैं, जो भ्रमर जैसी काली द्युतिमण्डली धारण किये है, ऐसा मण्डलीभद्र सुशोभित है। ।२६।

इनका सख्य, यथा—

१३. भारी वन-भ्रमण-क्रीड़ाओं से थका हुआ हमारा सुहृद् अब रात में व्रज के महल में सुख से सोये। मैं (उसके सिर) में हल्की मालिश करता हूँ। सुबल! तुम इसके कानों में बात करना छोड़कर इसकी पिण्डलियों (पैरों के ऊपर घुटने से नीचे के भाग) को भली-भाँति सहलाओ-मलते हुए दबाओ।

।२७।

बलदेव का रूप, यथा—

१४. जिनके गाल पर एक कुण्डल चमक रहा है (और दूसरे कान में) नीलकमल-रूप अवतंस पर भौरें छाये हुए हैं, कस्तूरी-तिलक लगाये हैं, पुष्ट वक्षःस्थल पर गुञ्जामाला है, शरद् ऋतु के बादल जैसी (शुभ्र) द्युति वाले एवं काला (नीला) वस्त्र पहने हुए, गम्भीर कण्ठस्वर वाले लम्बी भुजाओं वाले उन (बलदेव) का मैं आश्रय लेता हूँ जो प्रलम्बासुर के शत्रु हैं। ।२८।

अस्य सख्यं, यथा—

१५. जनितिथिरिति पुत्रप्रेमसंवीतयाहं
स्नपयितुमिह सद्मन्यम्बया स्तम्भितोऽस्मि।
इति सुबल! गिरा मे सन्दिश त्वं मुकुन्दं
फणिपतिह्रदकच्छे नाद्य गच्छेः कदापि॥ (२९)

[सुबल! जनितिथिः इति पुत्रप्रेमसंवीतया अम्बया अहं स्नपयितुम् इह सद्मनि स्तम्भितः अस्मि, त्वं मे गिरा मुकुन्दं सन्दिश यत् फणिपतिह्रदकच्छे अद्य कदापि न गच्छेः इति॥]

अथ सखायः—

१५. कनिष्ठकल्पाः सख्येन सम्बद्धाः प्रीतिगन्धिना।
[१३]विशाल-वृषभौजस्वि-देवप्रस्थ-वरूथपाः॥ (३०)

[प्रीतिगन्धिना सख्येन सम्बद्धाः; विशाल-वृषभौजस्वि-देवप्रस्थ-वरूथपाः कनिष्ठकल्पाः॥]

१६. मरन्द-कुसुमापीड-मणिबन्ध-करन्धमाः।
इत्यादयः सखायोऽस्य सेवा-सौख्यैकरागिणः॥ (३१)

[मरन्द-कुसुमापीड-मणिबन्ध-करन्धमाः इत्यादयः सखायः अस्य सेवा-सौख्यैकरागिणः॥]

एषां सख्यं, यथा—

१६. विशाल! बिसिनीदलैः कलय वीजनप्रक्रियां
वरूथप! विलम्बितालकवरूथमुत्सारय।
मृषा वृषभ! जल्पितं त्यज भजाङ्गसंवाहनं
यदुग्रभुजसङ्गरे गुरुमगात् क्लमं नः सखा॥ (३२)

[विशाल! बिसिनीदलैः वीजनप्रक्रियां कलय, वरूथप! विलम्बितालकवरूथम् उत्सारय। वृषभ! वृथा जल्पितं त्यज, अङ्गसंवाहनं भज, यत् उग्रभुजसङ्गरे नः सखा गुरुं क्लमम् अगात्॥]

१७. सर्वेषु सखिषु श्रेष्ठो देवप्रस्थोऽयमीरितः॥ (३३)

[अयं देवप्रस्थः सर्वेषु सखिषु श्रेष्ठः ईरितः॥]

इनका सख्य, यथा—

१५. *जन्मदिन के कारण पुत्र प्रेम से अभिभूत माता के द्वारा (विशेष) स्नान कराने के लिये मैं यहाँ घर में रोक लिया गया हूँ। हे सुबल! मेरी ओर से तुम मुकुन्द को सन्देश दे दो कि तुम आज कालियह्रद के तट पर बिल्कुल मत जाना।* *।२९।*

सखा-गण—

१५-१६. जो कनिष्ठों के समान हैं और दास्यगन्धि सख्य से युक्त सम्बन्ध रखते हैं, जिनके नाम हैं—विशाल, वृषभ, ओजस्वी, देवप्रस्थ, और वरूथप, वे मरन्दपुष्पों के मुकुट और कलाई के आभूषण पहने हैं—इत्यादि प्रकार के इनके सखा हैं, जोकि एकमात्र सेवा-सौख्य के अनुरागी हैं। ।३०-३१।

इनका सख्य, यथा—

१६. *हे विशाल! तुम कमलिनी के पत्तों से पंखा झलो; हे वरूथप! लटकते हुई लटों के समूह को ऊँचा करके समेटो; वृषभ! वृथा बकवास छोड़ दो, शरीर दबाओ! क्योंकि भुजाओं द्वारा उग्र-युद्ध करने (लड़ाई के खेल) में हमारे सखा को बहुत थकान हो गयी है।* *।३२।*

१७. सभी सखाओं में से यह देवप्रस्थ श्रेष्ठ माना गया है। ।३३।

तस्य रूपं, यथा—

१७. बिभ्रद् गेण्डुं[१४] पाण्डुरोद्भास-वासाः
पाशाबद्धोत्तुङ्ग-मौलिर्बलीयान्।
बन्धूकाभः सिन्धुरस्पर्धिनीलो
देवप्रस्थः कृष्णपार्श्वं प्रतस्थे॥ (३४)

[पाण्डुरोद्भासवासाः पाशाबद्धोत्तुङ्गमौलिः बलीयान् बन्धूकाभः सिन्धुरस्पर्धिलीलः देवप्रस्थः गेण्डुं बिभ्रद् कृष्णपार्श्वं प्रतस्थे॥]

अस्य सख्यं, यथा—

१८. श्रीदाम्नः पृथुलां भुजामभि शिरो विन्यस्य विश्रामिणं
दाम्नः सव्यकरेण[१५] रुद्धहृदयं शय्याविराजत्तनुम्।
मध्ये [१६]सुन्दरि! कन्दरस्य पदयोः संवाहनेन प्रियं
देवप्रस्थ इतः कृती सुखयति प्रेम्णा व्रजेन्द्रात्मजम्॥ (३५)

[सुन्दरि! कृती देवप्रस्थः इतः कन्दरस्य मध्ये, श्रीदाम्नः पृथुलां भुजाम् अभि शिरः विन्यस्य विश्रामिणम्, दाम्नः सव्यकरेण रुद्धहृदयं शय्याविराजत्तनुम्, प्रियं व्रजेन्द्रात्मजं प्रेम्णा पदयोः संवाहनेन सुखयति।]

अथ प्रियसखाः—

१८. वयस्तुल्याः प्रियसखाः सख्यं केवलमाश्रिताः।
श्रीदामा च सुदामा च दामा च वसुदामकः॥ (३६)

[वयस्तुल्याः प्रियसखाः केवलं सख्यम् आश्रिताः। श्रीदामा सुदामा च, दामा च, वसुदामकः च]

१९. किङ्किणिस्तोककृष्णाशु-भद्रसेन-विलासिनः।
पुण्डरीकविटङ्काक्ष-कलविङ्कादयोऽप्यमी॥ (३७)

[किङ्किणि-स्तोककृष्णांशु-भद्रसेन-विलासिनः, पुण्डरीक-विटङ्काक्ष-कलविङ्कादयः अपि अमी॥]

२०. रमयन्ति प्रियसखाः केलिभिर्विविधैः सदा।
नियुद्धं-दण्डयुद्धादि-कौतुकैरपि केशवम्॥ (३८)

[प्रियसखाः विविधैः केलिभिः नियुद्ध-दण्डयुद्धादि-कौतुकैः अपि सदा केशवं रमयन्ति॥]

उनका रूप, यथा—

१७. *उसके वस्त्र श्वेत-कान्ति वाले हैं, रस्सी से बालों का ऊँचा-सा जूड़ा बाँधा हुआ है। वह बलवान् है, उसकी आभा (वर्ण) रक्त है, उसकी चाल-ढाल हाथी को भी मात देती है। ऐसा देवप्रस्थ गेंद लिये हुए श्रीकृष्ण की ओर चला।* ।३४।

उसका सख्य, यथा—

१८. *हे सुन्दरी! देवप्रस्थ पुण्यशाली है, जो कि इधर कन्दरा के बीच, श्रीदामा की पुष्ट भुजा पर सिर रखकर विश्राम करते हुए, दामा का बाँया हाथ हृदय पर रखे हुए, शय्या पर शरीर टिकाये हुए प्रिय व्रजेन्द्रनन्दन (श्रीकृष्ण) को, प्रेम से पाँव दबाता हुआ सुखी कर रहा है।* ।३५।

प्रिय सखा—

१८-१९. **प्रिय सखा वयस् में समान हैं और केवल सख्य के आश्रय हैं, उनके नाम हैं—श्रीदामा, सुदामा, दामा और वसुदामा, किंकिणि, स्तोककृष्ण, अंशु, भद्रसेन, विलासी, पुण्डरीक, विटङ्काक्ष, कलविङ्क आदि।** ।३६-३७।

२०. **ये प्रियसखागण नाना प्रकार की क्रीड़ाओं द्वारा और मल्लयुद्ध, दण्डयुद्ध आदि कौतुकों द्वारा केशव को खेल-खिलाते हैं।** ।३८।

एषां सख्यं, यथा—

१९. सगद्गदपदैर्हरिं हसति कोऽपि वक्रोदितैः
प्रसार्य भुजयोर्युगं पुलकि कश्चिदाश्लिष्यति।
करेण चलता दृशौ निभृतमेत्य रुन्धे परः[१७]
कृशाङ्गि! सुखयन्त्यमी प्रियसखाः सखायं तव॥ (३९)

[कः अपि सगद्गदपदैः वक्रोदितैः हरिं हसति, कश्चित् पुलकि भुजयोः युगं प्रसार्य आश्लिष्यति, परः निभृतम् एत्य चलता करेण दृशौ रुन्धे। कृशाङ्गि! अमी प्रियसखाः तव सखायं सुखयन्ति॥]

२१. एषु प्रियवयस्येषु श्रीदामा प्रवरो मतः (४०)

[एषु प्रियवयस्येषु श्रीदामा प्रवरः मतः॥]

तस्य रूपम्—

२०. वासः पिङ्गं बिभ्रतं शृङ्गपाणिं
बद्धस्पर्धं सौहृदान्माधवेन।
ताम्रोष्णीषं श्यामधामाभिरामं
श्रीदामानं दामभाजं भजामि॥ (४१)

[पिङ्गं वासः बिभ्रतं शृङ्गपाणिम्, सौहृदात् माधवेन बद्धस्पर्धम्, ताम्रोष्णीषम्, श्यामधामाभिरामम् दामभाजं श्रीदामानं भजामि॥]

सख्यं, यथा—

२१. त्वं नः प्रोज्झ्य कठोर! यामुनतटे कस्मादकस्माद् गतो
दिष्ट्या दृष्टिमितोऽसि हन्त निबिडाश्लेषैः सखीन् प्रीणय।
ब्रूमः सत्यमदर्शने तव मनाक् का धेनवः के वयं
किं गोष्ठं किमभीष्टमित्यचिरतः सर्वं विपर्यस्यति॥ (४२)

[कठोर! त्वं नः प्रोज्झ्य कस्मात् अकस्मात् यामुनतटे गतः? दिष्ट्या दृष्टिम् इतः असि। हन्त! निबिडाश्लेषैः सखीन् प्रीणय। सत्यं ब्रूमः, तव मनाक् अदर्शने का धेनवः, के वयम्, किं गोष्ठम् किम् अभीष्टम् इति अचिरतः सर्वं विपर्यस्यति॥]

इनका सख्य यथा—

१९. *कोई वक्रोक्ति-भरे गद्‌गद् वाक्य बोलता हुआ हरि पर हँस रहा है, और कोई पुलक से भरी दोनों भुजायें पसार कर आलिङ्गन कर रहा है, और कोई एकान्त में चुपचाप आकर हाथ बढ़ाकर आँखे मूँद देता है; हे कृशाङ्गि! ये प्रियसखागण तुम्हारे सखा (श्रीकृष्ण) को सुखी कर रहे हैं।* ।३९।

२१. प्रिय वयस्यों में से यह श्रीदामा श्रेष्ठ माना गया है। ।४०।

उसका रूप, यथा—

२०. *पीला वस्त्र पहने हुए, हाथ में सींगा लिये हुए, सख्य के कारण माधव से स्पर्धा ठाने हुए, ताँबे के रंग की पगड़ी पहने हुए, श्याम-कान्ति से मनोरम, माला पहने हुए श्रीदामा का मैं स्मरण करता हूँ।* ।४१।

उसका सख्य, यथा—

२१. *हे कठोर! तुम हमें छोड़कर यमुना-तट पर क्यों अकस्मात् चले गये? हाय! बड़े भाग्य से तुम दृष्टिगोचर हो गये, अब घने आलिङ्गन से सखाओं को प्रसन्न करो। हम तो कहते हैं कि तुम्हारे तनिक भी अदर्शन (दिखाई न देने) से क्या गायें, क्या गोष्ठ, क्या हम लोग, क्या हमारी प्रिय वस्तुएँ सभी कुछ तुरन्त उलट-पुलट हो जाता है।* ।४२।

अथ प्रियनर्मवयस्याः—

२२. प्रियनर्मवयस्यास्तु पूर्वतोऽप्यभितो वराः।
आत्यन्तिकरहस्येषु युक्ता भावविशेषिणः।
सुबलार्जुन-गन्धर्वास्ते वसन्तोज्ज्वलादयः।। (४३)

[प्रियनर्मवयस्याः तु पूर्वतः अपि अभितः वराः, भावविशेषिणः आत्यन्तिकरहस्येषु युक्ताः। ते सुबलार्जुनगन्धर्वाः वसन्तोज्ज्वलादयः॥]

एषां सख्यं, यथा—

२२. राधासन्देशवृन्दं कथयति सुबलः पश्य कृष्णस्य कर्णे
श्यामाकन्दर्पलेखं निभृतमुपहरत्युज्ज्वलः[१८] पाणिपद्मे।
पालीताम्बूलमास्ये वितरति चतुरः कोकिलो मूर्ध्नि धत्ते
तारादामेति नर्मप्रणयि-सहचरास्तन्वि! तन्वन्ति सेवाम्॥
(४४)

[पश्य! कृष्णस्य कर्णे सुबलः राधासन्देशवृन्दं कथयन्ति, उज्ज्वलः निभृतं श्यामाकन्दर्पलेखं पाणिपद्मे उपहरति। चतुरः पाली-ताम्बूलम् आस्ये वितरति। कोकिलः तारा-दाम मूर्ध्नि धत्ते, इति तन्वि! नर्म-प्रणयिसहचराः सेवां तन्वन्ति॥]

२३. प्रियनर्मवयस्येषु प्रबलौ[१९] सुबलोज्ज्वलौ। (४५)

[सुबलोज्ज्वलौ प्रियनर्मवयस्येषु प्रबलौ॥]

तत्र सुबलस्य रूपं, यथा—

२३. तनुरुचिविजितहिरण्यं
हरिदयितं हारिणं हरिद्वसनम्।
सुबलं कुवलयनयनं
नयनन्दितबान्धवं वन्दे॥ (४६)

[तनुरुचिविजितहिरण्यम्, हरिदयितम्, हारिणम्, हरिद्वसनम्, कुवलयनयनम्, नय-नन्दित-बान्धवं सुबलं वन्दे॥]

प्रिय नर्मसखा—

२२. प्रिय नर्मसखा पूर्वोक्त सभी सखाओं से सब प्रकार से श्रेष्ठ हैं। भाव विशेष से युक्त वे लोग अत्यन्त रहस्य (की लीलाओं) में नियुक्त रहते हैं; वे हैं—सुबल, अर्जुन, गन्धर्व, वसन्त, उज्ज्वल आदि। ।४३।

इनका सख्य यथा—

२२. *देखो कृष्ण के कान में सुबल राधा के सन्देश कह रहा है। उज्ज्वल एकान्त में श्यामा का कन्दर्पलेख (प्रेमपत्र) करकमल पर रख रहा है। चतुर पाली का दिया हुआ ताम्बूल (श्रीकृष्ण के) मुख में डाल रहा है। कोकिल तारा की माला (उनके) सिर पर रख रहा है। हे तन्वि! (माधव के) प्रिय नर्मसखा सेवा का विस्तार कर रहे हैं। (अपनी-अपनी सेवा अर्पित कर रहे हैं।)* ।४४।

२३. प्रिय नर्म-सखाओं में से सुबल और उज्ज्वल प्रबल हैं। ।४५।

उनमें से सुबल का रूप, यथा—

२३. *शरीर की कान्ति से जिसने स्वर्ण को जीत लिया है, जो श्रीहरि का प्रिय है, जो हार पहने हैं, हरे वस्त्र धारण किये हुए है—ऐसे कमलनयन सुबल को मैं वन्दना करता हूँ जो नीति द्वारा अपने बान्धव श्रीकृष्ण को आनन्दित करता है।* ।४६।

अस्य सख्यं, यथा—

२४. वयस्य गोष्ठ्यामखिलेङ्गितेषु
विशारदायामपि माधवस्य।
अन्यैर्दुरूहा सुबलेन सार्धं
संज्ञामयी कापि बभूव वार्ता॥ (४७)

[अखिलेङ्गितेषु विशारदायाम् अपि वयस्यगोष्ठ्यां माधवस्य सुबलेंन सार्द्धम् अन्यैः दुरूहा का अपि संज्ञामयी वार्ता बभूव॥]

उज्ज्वलस्य रूपं, यथा—

२५. अरुणाम्बरमुच्चलेक्षणं
मधुपुष्पावलिभिः प्रसाधितम्।
हरिनील-रुचिं हरिप्रियं
मणिहारोज्ज्वलमुज्ज्वलं भजे॥ (४८)

[अरुणाम्बरम्, उच्चलेक्षणम्, मधुपुष्पावलिभिः प्रसाधितम्, हरिनीलरुचिम्, हरिप्रियम्, मणिहारोज्ज्वलम् उज्ज्वलं भजे॥]

अस्य सख्यं, यथा—

२६. शक्तास्मि मानमवितुं कथमुज्ज्वलोऽयं
दूतः समेति सखि! यत्र मिलत्यदूरे।
सापत्रपापि कुलजापि पतिव्रतापि
का वा वृषस्यति न गोपवृषं किशोरी[१०]? (४९)

[मानम् अवितुं कथम् शक्ता अस्मि। अयं दूतः उज्ज्वलः समेति। सखि! यत्र (सः) अदूरे मिलति, (तत्र) सापत्रपा अपि, कुलजा अपि, पतिव्रता अपि, का अपि वा किशोरी गोपवृषं न वृषस्यति?]

२४. उज्ज्वलोऽयं विशेषेण सदा नर्मोक्तिलालसः॥ (५०)

[अयम् उज्ज्वलः सदा विशेषेण नर्मोक्तिलालसः॥]

उसका सख्य, यथा—

२४. *सभी इङ्गितों (संकेतों) में निपुण सखाओं की गोष्ठी में भी माधव की सुबल के साथ कुछ ऐसी सङ्केतमयी वार्ता हुई जो अन्यों के लिये दुरूह रही।* *।४७।*

उज्ज्वल का रूप, यथा—

२५. *अरुण वस्त्र पहने हुए, अति चञ्चल दृष्टि वाले, मधुभरी पुष्पावलि से अलङ्कृत, श्रीहरि जैसी नीलकान्ति वाले, श्रीहरि के प्रिय, मणिहारों से उज्ज्वल सखा उज्ज्वल का मैं स्मरण करता हूँ।* *।४८।*

उसका सख्य, यथा—

२६. *हे सखि! मैं मान की रक्षा करने में कैसे समर्थ होऊँ? जबकि यह उज्ज्वल नाम का दूत सामने चला आ रहा है, वह समीप उपस्थित हो तो, लज्जा से युक्त होने पर भी, कुलीना होने पर भी, पतिव्रता होने पर भी कौन ऐसी किशोरी होगी जो गोपश्रेष्ठ (श्रीकृष्ण) को न चाहेगी।* *।४९।*

२४. यह उज्ज्वल विशेष रूप से सदा नर्म-वचन कहने की लालसा रखता है। ।५०।

यथा—

२७. स्फुरदतनुतरङ्गावर्धितानल्पवेलः
सुमधुररसरूपो दुर्गमावारपारः[21]।
जगति युवति-जातिर्निम्नगा त्वं समुद्र-
स्तदियमघहर! त्वामेति सर्वाध्वनैव॥ (५१)

[स्फुरदतनुतरङ्गावर्धितानल्पवेलः, सुमधुररसरूपः, दुर्गमावारपारः त्वं समुद्रः। जगति युवतिजातिः निम्नगा, तद् अघहर! इयं सर्वाध्वना एव त्वाम् एति॥]

२५. एतेषु केऽपि शास्त्रेषु, केऽपि लोकेषु विश्रुताः॥ (५२)

[एतेषु के अपि शास्त्रेषु, के अपि लोकेषु विश्रुताः]

२६. नित्यप्रियाः सुरचराः साधकाश्चेति ते त्रिधा।
केचिदेषु स्थिरा जात्या मन्त्रिवत्तमुपासते॥ (५३)

[नित्यप्रियाः, सुरचराः, साधकाः च, इति ते त्रिधा। एषु केचित् जात्या स्थिराः तं मन्त्रिवत् उपासते॥]

२७. तं हासयन्ति चपलाः केचिद्वैहासिकोपमाः।
केचिदार्जवसारेण सरलाः शीलयन्ति तम्[22]॥ (५४)

[केचित् वैहायसिकोपमाः चपलाः तं हासयन्ति, केचित् सरलाः आर्जवसारेण तं शीलयन्ति॥]

२८. वामा वक्रिमचक्रेण केचिद् विस्माययन्त्यमुम्।
केचित् प्रगल्भाः कुर्वन्ति वितण्डाममुना समम्।
सौम्याः सूनृतया वाचा धन्या धिन्वन्ति तं परे॥ (५५)

[केचित् वामाः वक्रिमचक्रेण अमुं विस्माययन्ति, केचित् प्रगल्भाः अमुना समं वितण्डां कुर्वन्ति। परे सौम्याः धन्या सूनृतया वाचा तं धिन्वन्ति॥]

२९. एवं विविधया सर्वे प्रकृत्या मधुरा अमी।
पवित्र-मैत्रीवैचित्री-चारुतामुपचिन्वते॥ (५६)

[एवम् अमी सर्वे मधुराः विविधया प्रकृत्या पवित्र-मैत्री-वैचित्री-चारुताम् उपचिन्वते॥]

यथा—

२७. हे अघहर! तुम ऐसे सुमधुर रसरूप समुद्र हो जिसकी विशाल तरङ्गों ने समस्त तटभूमि को छिन्नं कर दिया है, जिसका ओर-छोर पाना कठिन है। जगत् में युवती-जाति नदी के समान है जो सभी मार्गों से तुम्हारी ओर ही आती है। ।५१।

२५. इनमें से कोई तो शास्त्रों में प्रसिद्ध हैं, कोई लोक में प्रसिद्ध हैं। ।५२।

२६. वे (वयस्य) (अन्य रीति से) तीन प्रकार के हैं—नित्यप्रिय, सुरचर और साधक। इनमें से कुछ स्वभाव से ही स्थिर हैं और मन्त्री के समान उन (श्रीकृष्ण) की उपासना करते हैं। ।५३।

२७. कोई-कोई विदूषक की भाँति चपल हैं और उन्हें (श्रीकृष्ण को) हँसाते हैं। कोई स्वभाव से ही सीधे-सरल हैं और उनका सम्मान करते हैं। ।५४।

२८. कोई वाम अर्थात् टेढ़े हैं और वक्रता के चक्र से उनको अचरज या भुलावे में डाल देते हैं। कोई प्रगल्भ हैं और उनके साथ वाद-विवाद करते हैं। अन्य जो सौम्य हैं, ये सभी धन्य हैं वे सत्य-सुखद वाणी के द्वारा उन्हें प्रसन्न करते हैं। ।५५।

२९. इस प्रकार ये सब विविध प्रकृति वाले मधुर हैं जो पवित्र मैत्री के वैचित्र्य की चारुता को बढ़ाते हैं। ।५६।

अथ उद्दीपनाः—

३०. उद्दीपना वयोरूप-शृङ्ग-वेणु-दरा हरेः।
विनोद-नर्म-विक्रान्ति-गुणाः प्रेष्ठजनास्तथा।
राज-देवावतारादि-चेष्टानुकरणादयः॥ (५७)

[हरेः वयः-रूप-शृङ्ग-वेणु-दराः (शङ्खाः), विनोद-नर्म-विक्रान्तिगुणाः प्रेष्ठजनाः, तथा राजदेवावतारादि-चेष्टानुकरणादयः उद्दीपनाः॥]

तत्र वयः-

३१. वयः कौमार-पौगण्ड-कैशोरञ्चेह सम्मतम्।
गोष्ठे कौमार-पौगण्डे कैशोरं पुरगोष्ठयोः॥ (५८)

[वयः इह कौमार-पौगण्ड-कैशोरं च सम्मतम्। गोष्ठे कौमार-पौगण्डे, पुरगोष्ठयोः कैशोरम्॥]

तत्र कौमारं, यथा—

३२. कौमारं वत्सले वाच्यं ततः संक्षिप्य लिख्यते॥ (५९)

[वत्सले कौमारं वाच्यम्, ततः संक्षिप्य लिख्यते॥]

यथा श्रीदशमे (भा०१०/१३/११)—

२८. बिभ्रद्वेणुं जठरपटयोः शृङ्गवेत्रे च कक्षे
वामे पाणौ मसृणकवलं तत्फलान्यङ्गुलीषु।
तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः
स्वर्गे लोके मिषति बुभुजे यज्ञभुग् बालकेलिः॥ (६०)

[जठरपट्योः वेणुं कक्षे च शृङ्गवेत्रे, वामे पाणौ मसृणकवलम्, अङ्गुलीषु तत्फलानि बिभ्रत् मध्ये तिष्ठन् स्वैः नर्मभिः स्वपरिसुहृदः हासयन् स्वर्गे लोके मिषति बालकेलिः यज्ञभुक् बुभुजे॥]

अथ पौगण्डम्—

३३. आद्यं मध्यं तथा शेषं पौगण्डञ्च त्रिधा भवेत्॥ (६१)

[पौगण्डं च आद्यं मध्यं तथा शेषम् (इति) त्रिधा भवेत्॥]

उद्दीपन विभाव—

३०. हरि के वयस्, रूप, सींगा, वेणु, शङ्ख, विनोद, सरस-परिहास, विक्रम आदि गुण और उनके प्रियजन तथा राजा, देवता, अवतार आदि की चेष्टाओं का अनुकरण उद्दीपन हैं। ।५७।

उनमें से वयस्—

३१. कौमार, पौगण्ड और कैशोर-ये वयस् यहाँ सम्मत हैं। व्रज में कौमार तथा पौगण्ड, तथा पुर और व्रज दोनों में कैशोर अभिमत है। ।५८।

उनमें से कौमार, यथा—

३२. वत्सल में कौमार कहा जाता है, इसलिये संक्षेप में वह वर्णित है— ।५९।

यथा श्रीदशम में (भा. १०/१३/११)—

२८. पेट पर बँधे पीताम्बर और फेंटे में वेणु खोंसे हुए, सींगा और बेंत काँख (बगल) में दबाये हुए, बाँये हाथ में स्निग्ध (दही-भात का) कौर और उँगलियों में (उस कौर से चूते हुए) उसके रस को लिये हुए, अपने सखाओं के बीच में बैठे हुए, अपने विनोदपूर्ण वचनों से उन्हें हँसाते हुए, बाललीला करते हुए (वस्तुतः) यज्ञभोक्ता (श्रीकृष्ण) (वन में) भोजन कर रहे थे, जबकि आकाश में देव-गण उन्हें देख रहे थे। ।६०।

पौगण्ड—

३३. आदिम (पहला), मध्य तथा अन्तिम—इस प्रकार पौगण्ड तीन प्रकार का होता है। ।६१।

तत्र आद्यं पौगण्डम्—

३४. अधरादेः सुलौहित्यं जठरस्य च तानवम्।
कम्बुग्रीवोद्गमाद्यञ्च पौगण्डे प्रथमे सति॥ (६२)

[प्रथमे पौगण्डे सति अधरादेः सुलौहित्यम् जठरस्य च तानवम् कम्बुग्रीवोद्गमाद्यं च (दृश्यते)॥]

यथा—

२९. तुन्दं विन्दति ते मुकुन्द! शनकैरश्वत्थपत्रश्रियं!
[23]कण्ठः कम्बुवदम्बुजाक्ष! भजते रेखात्रयीमुज्ज्वलाम्।
आरुन्धे कुरुविन्द-कन्दलरुचिं भूचन्द्र! दन्तच्छदो
लक्ष्मीराधुनिकी धिनोति सुहृदामक्षीणि सा[24] काप्यसौ॥
(६३)

[मुकुन्द! ते तुन्दं शनकैः अश्वत्थपत्रश्रियं विन्दति। अम्बुजाक्ष! कण्ठः कम्बुवत् उज्ज्वलां रेखात्रयीं भजते। भूचन्द्र! दन्तच्छदः कुरुविन्दकन्दलरुचिम् आरुन्धे। सा का अपि आधुनिकी लक्ष्मीः सुहृदाम् अक्षीणि धिनोति॥]

३५. पुष्पमण्डन-वैचित्री चित्राणि गिरिधातुभिः।
पीतपट्टदुकूलाद्यमिह प्रोक्तं प्रसाधनम्॥ (६४)

[पुष्पमण्डन-वैचित्री, गिरिधातुभिः चित्राणि, पीतपट्ट-दुकूलाद्यम् इह प्रसाधनं प्रोक्तम्॥]

३६. सर्वाटवी-प्रचारेण नैचिकीचयचारणम्
नियुद्ध-केलि-नृत्यादि-शिक्षारम्भोऽत्र चेष्टितम्॥ (६५)

[अत्र चेष्टितम्-सर्वाटवीप्रचारेण नैचिकीचयचारणम्, नियुद्धकेलि-नृत्यादि-शिक्षारम्भः (इति)॥]

यथा—

३०. वृन्दारण्ये समन्तात् सुरभिणि सुरभीवृन्द-रक्षाविहारी
गुञ्जाहारी शिखण्ड-प्रकटितमुकुटः पीतपट्टाम्बर-श्रीः।
कर्णाभ्यां कर्णिकारे दधदलमुरसा फुल्लमल्लीकमाल्यं[25]
नृत्यान् दोर्युद्धरङ्गे नटवदिह सखीन्नन्दयत्येष कृष्णः॥ (६६)

[शिखण्डप्रकटितमुकुटः, पीतपट्टाम्बरश्रीः कर्णाभ्यां कर्णिकारे (दधत्), उरसा अलं फुल्लमल्लीकमाल्यं दधत्, दोर्युद्धरङ्गे नटवन् नृत्यत् एषः कृष्णः सखीन् नन्दयति॥]

उनमें से आदिम पौगण्ड—

३४. अधर आदि का भली-भाँति लाल होना और पेट की कृशता शङ्ख जैसी ग्रीवा निकल आना इत्यादि प्रथम पौगण्ड में होते हैं। ।६२।

यथा—

२९. *हे मुकुन्द! तुम्हारा पेट धीरे-धीरे पीपल के पत्ते की शोभा पा रहा है; हे कमलनयन! तुम्हारा कण्ठ (गर्दन) शङ्ख के समान उज्ज्वल रेखात्रयी से युक्त हो रहा है। हे धरती के चाँद! तुम्हारे ओंठ कुरुविन्द (लाल माणिक) और नई कोंपलों की कान्ति को भी फीका बना रहे हैं, इस समय की तुम्हारी यह जो कोई विलक्षण शोभा है वह (हम) मित्रों के नयनों को आनन्द दे रही है। ।६३।*

३५. यहाँ फूलों के आभूषणों का वैचित्र्य, पर्वत से निकले गेरु आदि धातुओं से विभिन्न अङ्गों पर बने चित्र, पीले रेंशमी वस्त्र आदि प्रसाधन कहे गये हैं। ।६४।

३६. सभी वनों में घूमते हुए उत्तम गायों के समूह को चराना, नियुद्ध (कुश्ती), खेल, नृत्य आदि की शिक्षा का आरम्भ—ये सब यहाँ चेष्टायें हैं। ।६५।

यथा—

३०. *सुगन्ध से भरे वृन्दावन में सब ओर गो-समूह की रक्षा के लिये विहार करने वाला, गुञ्जाओं का हार पहने हुए, मोरपंखों से बना मुकुट लगाये हुए, पीले रेशमी वस्त्र से सुशोभित, कानों में कनेर के फूल धारण किये हुए, वक्षःस्थल पर फूली हुई मल्लिका की माला पहने हुए, बाहु-युद्ध की रङ्गशाला में नट के समान नाचते हुए यह कृष्ण सखाओं को आनन्दित कर रहा है। ।६६।*

अथ मध्यपौगण्डम्-

३७. नासा सुशिखरा तुङ्गा कपोलौ मण्डलाकृती।
पार्श्वाद्यङ्गं सुवलितं पौगण्डे सति मध्यमे॥ (६७)

[मध्यमे पौगण्डे सति नासा सुशिखरा तुङ्गा, कपोलौ मण्डलाकृती, पार्श्वादि-अङ्गं सुवलितम्॥]

यथा—

३१. तिलकुसुमविहासि-नासिकाश्री-
नवमणि-दर्पण-दर्पनाशि गण्डः।
हरिरिह परिमृष्ट-पार्श्वसीमा
सुखयति सुष्ठु सखीन् स्वशोभयैव॥ (६८)

[तिलकुसुमविहासि-नासिकाश्रीः, नवमणिदर्पण-दर्पनाशि-गण्डः, परिमृष्ट-पार्श्वसीमा हरिः स्वशोभया एव सखीन् सुष्ठु सुखयति॥]

३८. उष्णीषं पट्टसूत्रोत्थ-पाशेनात्र तडित्त्विषा।
यष्टिः श्यामा त्रिहस्तोच्चा स्वर्णाग्रेत्यादिमण्डनम्।
भाण्डीरे क्रीडनं शैलोद्धारणाद्यञ्च चेष्टितम्॥ (६९)

[तडित्त्विषा पट्टसूत्रोत्थपाशेन अत्र उष्णीषम् श्यामा त्रिहस्तोच्चा स्वर्णाग्रा यष्टिः, भाण्डीरे क्रीडनम्, शैलोद्धारणाद्यं च चेष्टितम्॥]

यथा—

३२. यष्टिं हस्तत्रयपरिमितां प्रान्तयोः स्वर्णबद्धां
[26]बिभ्रन्नीलां चटुलचमरीचारु-चूडोज्ज्वलश्रीः।
[27]बद्धोष्णीषः पुरटरुचिना पट्टपाशेन पार्श्वे
पश्य क्रीडन् सुखयति सखे! मित्रवृन्दं मुकुन्दः॥ (७०)

[सखे! पश्य हस्तत्रयपरिमितां नीलां प्रान्तयोः स्वर्णबद्धां यष्टिं बिभ्रत्, चटुलचमरीचारु-चूडोज्ज्वलश्रीः, पुरटरुचिना पट्टपाशेन बद्धोष्णीषः मुकुन्दः पार्श्वे क्रीडन् मित्रवृन्दं सुखयति॥]

३९. पौगण्ड-मध्य एवायं हरिर्दीव्यन् विराजते।
माधुर्याद्भुतरूपत्वात् कैशोराग्रांशभागिव॥ (७१)

[पौगण्डमध्ये एव अयं हरिः माधुर्याद्भुतरूपत्वात् कैशोराग्रांशभाक् इव दीव्यन् विराजते॥]

मध्य पौगण्ड—

३७. तीखी और ऊँची नासिका, गोल कपोल, पार्श्व आदि अङ्गों में सुन्दर मोड़—यह सब मध्य पौगण्ड में होता है। ।६७।

यथा—

३१. जिनकी नासिका की शोभा तिल के पुष्प का परिहास करती है, कपोल नवीन मणि-निर्मित दर्पण के दर्प को नष्ट करते हैं, सुन्दर भराव से जिनके पार्श्व की सीमा सुघड़ मोड़ों से युक्त हैं—ऐसे हरि यहाँ अपनी शोभा से ही सखाओं को भली-भाँति सुखी बना रहे हैं। ।६८।

३८. विद्युत् जैसी चमक वाली रेशमी डोर की लपेटों से पगड़ी बनी है, तीन हाथ ऊँची, सोने की मूठ वाली काली लाठी-इत्यादि आभूषण हैं; भाण्डीर वन में खेलना और पर्वत (गोवर्धन) को उठाना आदि (उनके) मण्डन (आभूषण) हैं। ।६९।

यथा—

३२. देखो सखे! दोनों छोरों पर सोने से मढ़ी हुई, तीन हाथ लम्बी लाठी धारण किये हुए, चञ्चल मञ्जरियों से सुन्दर ऊँचे जूड़े से उज्ज्वल शोभा वाला, सुनहले रेशम के पेंचों की पगड़ी बाँधे हुए, खेलते हुए मुकुन्द मित्र-मण्डली को सुखी कर रहा है। ।७०।

३९. पौगण्ड के मध्य में ही ये खेलते हुए हरि माधुर्य से भरे अद्भुत रूप के कारण ऐसे विराज रहे हैं मानो कैशोर के प्रारम्भ में पहुँच गये हों। ।७१।

अथ शेषपौगण्डम्—

४०. वेणी नितम्ब-लम्बाग्रा लीलालक-लता-द्युतिः ।
अंसयोस्तुङ्गतेत्यादि पौगण्डे चरमे सति॥ (७२)

[चरमे पौगण्डे सति नितम्बलम्बाग्रा वेणी, लीलालकलताद्युतिः, अंसयोस्तुङ्गता इत्यादि (लक्ष्यते)॥]

यथा—

३३. अग्रे लीलालकलतिकयालङ्कृतं बिभ्रदास्यं
चञ्चद्वेणीशिखरशिखया चुम्बितश्रोणिबिम्बः ।
उत्तुङ्गांसच्छविरघहरो रङ्गमङ्गश्रियैव
न्यस्यन्नेष प्रियसवयसां गोकुलान्निर्जिहीते॥ (७३)

[अग्रे लीलालकलतिकया अलङ्कृतम् आस्यं बिभ्रत्, चञ्चद्वेणीशिखरशिखया चुम्बितश्रोणिबिम्बः, उत्तुङ्गांसच्छबिः, एषः अघहरः अङ्गश्रिया एव प्रियसवयसां रङ्गं न्यस्यन् गोकुलात् निर्जिहीते॥]

४१. उष्णीषे वक्रिमा लीला-सरसीरुहपाणिता।
काश्मीरेणोर्ध्वपुण्ड्राद्यमिह मण्डनमीरितम्॥ (७४)

[उष्णीषे वक्रिमा, लीलासरसीरुहपाणिता, काश्मीरेण ऊर्ध्वपुण्ड्राद्यम् इह मण्डनम् ईरितम्॥]

यथा—

३४. उष्णीषे दरवक्रिमा करतले व्याजृम्भिलीलाम्बुजं
गौरश्रीरलिके किलोर्ध्वतिलकः कस्तूरिकाबिन्दुमान्।
वेषः केशव! पेशलः सुबलमप्याघूर्णयत्यद्य ते
विक्रान्तं किमुत स्वभावमृदुलां गोष्ठाबलानां ततिम्॥ (७५)

[उष्णीषे दरवक्रिमा, करतले व्यांजृम्भिलीलाम्बुजम्, अलिके गौरश्रीः, कस्तूरिकाबिन्दुमान् किल ऊर्ध्वतिलकः केशव! ते पेशलः वेषः अद्य विक्रान्तं सुबलम् अपि आघूर्णयति, किम् उत स्वभावमृदुलां गोष्ठाबलानां ततिम्?॥]

४२. अत्र भङ्गी गिरां नर्मसखैः कर्णकथारसः।
एषु गोकुलबालानां श्रीश्लाघेत्यादि-चेष्टितम्[२८]॥ (७६)

[अत्र गिरां भङ्गी, नर्मसखैः कर्णकथारसः, एषु गोकुलबालानां श्रीश्लाघा इत्यादि चेष्टितम्॥]

चरम पौगण्ड—

४०. वेणी का अग्रभाग नितम्ब-पर्यन्त लटका होना, सौन्दर्य के लिये लटकाई हुई लटों से सुशोभित होना, कन्धों में उच्चता आना-इत्यादि चरम पौगण्ड में होते हैं। ।७२।

यथा—

३३. जो मुख पर सामने सौन्दर्य के लिये लटकाई हुई लटों की लताओं से सुशोभित हैं, जिनके नितम्ब पर हिलती हुई वेणी के अग्रभाग का छोर झूल रहा है, जिनके कन्धे ऊँचे हैं, ऐसी छवि वाले अघहर (श्रीकृष्ण) अपनी अङ्गशोभा से सखाओं को आनन्द देते हुए गोकुल से बाहर निकल रहे हैं। ।७३।

४१. पगड़ी में बाँकापन, हाथ में लीलाकमल, केसर से बना हुआ ऊर्ध्वपुण्ड्र (ऊँचा तिलक) आदि यहाँ आभूषण कहे गये हैं। ।७४।

यथा—

३४. पगड़ी में थोड़ा-सा बाँकापन, हथेली में खिलता हुआ कमल, माथे पर केशरी वर्ण का ऊँचा तिलक, जिसमें कस्तूरी का बिन्दु लगा हुआ है—हे केशव! तुम्हारा यह सुन्दर वेश पराक्रमी सुबल को भी चक्कर खिला रहा है, तो फिर स्वभाव से ही मृदुल व्रज-सुन्दरियों की पंक्ति का तो कहना ही क्या? ।७५।

४२. यहाँ नर्मसखाओं के साथ गोलमोल बातें, कानों में फुस-फुसाकर बातें करने का रस, उन (सखाओं) के प्रति गोकुल-बालाओं की शोभा की प्रशंसा इत्यादि चेष्टायें हैं। ।७६।

यथा—

३५. धूर्तस्त्वं यदवैषि हृद्गतमतः कर्णे तव व्याहरे
केयं मोहनता समृद्धिरधुना गोधुक्कुमारीगणे।
अत्रापि द्युतिरत्नरोहणभुवो बालाः सखे! पञ्चषाः
पञ्चेषुर्जगतां जये निजधुरां यत्रार्पयन्माद्यति॥ (७७)

[त्वं धूर्तः यत् हृद्गतम् अवैषि, अतः तव कर्णे व्याहरे-गोधुक्कुमारीगणे अधुना का इयं मोहनता-समृद्धिः? सखे! अत्र अपि द्युतिरत्नरोहणभुवः पञ्चषाः बालाः, यत्र पञ्चेषुः जगतां जये निजधुराम् अर्पयन् माद्यति॥]

अथ कैशोरम्—

४३. कैशोरं पूर्वमेवोक्तं संक्षेपेणोच्यते ततः॥ (७८)

[कैशोरं पूर्वम् एव उक्तम् ततः संक्षेपेण उच्यते॥]

यथा—

३६. पश्योत्सिक्तवलीत्रयीवरलते वासस्तडिन्मञ्जुले
प्रोन्मीलद्वनमालिका-परिमलस्तोमे तमालत्विषि।
उक्षत्यम्बक-चातकान् स्मितरसैर्दामोदराम्भोधरे
श्रीदामा रमणीय-रोम-कलिकाकीर्णाङ्गशाखी बभौ॥ (७९)

[पश्य! उत्सिक्तवलीत्रयीवरलते वासस्तडिन्मञ्जुले, प्रोन्मीलद्वनमालिका-परिमलस्तोभे तमालत्विषि दामोदराम्भोधरे स्मितरसैः अम्बक-चातकान् उक्षति (सति) श्रीदामा रमणीय-रोमकलिकाकीर्णाङ्गशाखी बभौ॥]

४४. प्रायः किशोर एवायं सर्वभक्तेषु भासते।
तेन यौवनशोभास्य नेह काचित् प्रपञ्चिता॥ (८०)

[अयं प्रायः किशोरः एव सर्वभक्तेषु भासते। तेन अस्य काचित् यौवनशोभा इह न प्रपञ्चिता॥]

अथ रूपं, यथा—

३७. अलङ्कारमलङ्कृत्वा तवाङ्गं पङ्कजेक्षण!
सखीन् केवलमेवेदं धाम्ना धीमन्! धिनोति नः॥ (८१)

[पङ्कजेक्षण! धीमन्! तव इदम् अङ्गम् अलङ्कारम् अलङ्कृत्वा केवलं धाम्ना एव नः सखीन् धिनोति॥]

यथा—

३५. *तुम धूर्त हो, जो कि हृदय की बात जान लेते हो, तुम्हारे कान में कहता हूँ कि गोपकुमारियों में यह कौन-सी मोहनता की समृद्धि आ गई है? इनमें से पाँच-छ: तो कान्तिरूपी रत्न की खान जैसी बालायें हैं, जिनमें पञ्चबाण (कामदेव) जगत् को जीतने के लिये अपना भार सौंप कर मदमत्त हो रहा है; हर्ष से फूला हुआ है।* ।७७।

कैशोर—

४३. कैशोर पहले ही कहा जा चुका है, इसलिये यहाँ संक्षेप में कहा जा रहा है। ।७८।

यथा—

३६. देखो! *जिसके उदर पर त्रिवली (तीन रेखा) रूपी सुन्दर लता उभर रही है, जिस के सुन्दर वस्त्र बिजली जैसे वर्णवाले हैं। जिसमें खिलती हुई वनमाला के परिमल का समुच्चय है, जिसकी कान्ति तमाल जैसी श्यामल है—ऐसा दामोदर रूपी मेघ जब अपने स्मित रूपी रस से सभी के नेत्र रूपी चातकों को सींचने लगा, तब श्रीदामा रमणीय रोम रूपी कलिकाओं से भरे बाहु आदि अङ्गरूपी शाखाओं वाले वृक्ष जैसा सुशोभित हुआ।* ।७९।

४४. ये श्रीकृष्ण प्राय: सब भक्तों को किशोर ही भासित होते हैं, इसलिये यहाँ उनकी किसी यौवन-शोभा का वर्णन-विस्तार नहीं किया गया है। ।८०।

उनका (किशोर) रूप, यथा—

३७. *हे कमलनयन धीमान्! अलङ्कारों को व्यर्थ बनाकर तुम्हारा यह शरीर केवल अपनी ज्योति-मात्र से हम सखाओं को आनन्द दे रहा है।* ।८१।

अथ शृङ्गं, यथा—

३८. व्रजनिजवळभीवितर्दिकाया-
मुषसि विषाणवरे रुवत्युदग्रम्[२९]।
अहह सवयसां तदीयरोम्णा-
मपि निवहाः सममेव जाग्रति स्म॥ (८२)

[व्रजनिजवळ(ल)भी-वितर्दिकायाम् उषसि विषाणवरे उदग्रं ब्रुवति, अहह! सवयसां तदीयरोम्णाम् अपि निवहाः समम् एव जाग्रति स्म॥]

वेणुर्यथा—

३९. सुहृदो न हि यात कातरा
हरिमन्वेष्टुमितः सुतां रवेः।
कथयन्नमुमत्र वैणव-
ध्वनिदूतः शिखरे धिनोति नः॥ (८३)

[सुहृदः! कातराः! हरिम् अन्वेष्टुम् इतः रवेः सुतां (प्रति) हि न यात! वैणवध्वनिदूतः अमुम् अत्र शिखरे कथयन् नः धिनोति॥]

शङ्खो, यथा—

४०. पाञ्चालीपतयः श्रुत्वा पाञ्चजन्यस्य निःस्वनम्।
पञ्चास्य! पश्य मुदिताः पञ्चास्यप्रतिमां ययुः॥ (८४)

[पञ्चास्य! पश्य! पाञ्चालीपतयः पाञ्चजन्यस्य निःस्वनं श्रुत्वा मुदिताः पञ्चास्यप्रतिमां ययुः॥]

विनोदो, यथा—

४१. स्फुरदरुणदुकूलं जागुडैर्गौरगात्रं
कृतवर-कबरीकं रत्नताटङ्ककर्णम्।
मधुरिपुमिह राधा-वेषमुद्वीक्ष्य साक्षात्
प्रियसखि सुबलोऽभूद्विस्मितः सस्मितश्च॥ (८५)

[प्रियसखि! स्फुरदरुणदुकूलम्; जागुडैः गौरगात्रम्, कृतवरकबरीकम्, रत्नताटङ्ककर्णम्, राधावेषं मधुरिपुम् इह साक्षात् उद्वीक्ष्य सुबलः विस्मितः सस्मितः च अभूत्॥]

शृङ्ग (सींगा), यथा—

३८. *भोर में व्रज में अपनी अटारी के छज्जे में श्रेष्ठ सींगों के उच्च स्वर से बोलने पर, अहो, सखा-गण और उनके रोमसमूह भी साथ-साथ ही जाग जाते थे (अर्थात् जागते ही सखाओं को रोमाञ्च (हर्ष से) हो आता था।) ।८२।*

वेणु, यथा—

३९. *हे मित्रो! कातर होकर हरि को खोजने के लिये यहाँ से यमुना की ओर मत जाओ! वेणु-ध्वनि-रूपी दूत उसको यहीं शिखर पर बताता हुआ हमें आनन्द दे रहा है। ।८३।*

शङ्ख, यथा—

४०. *हे पञ्चमुख (शिव!) देखो! पाञ्चाली (द्रौपदी) के पाँचों पति (पाण्डव) पाञ्चजन्य (श्रीकृष्ण के शङ्ख) के घोष को सुनकर मुदित होकर पाँच मुखवाली प्रतिमा जैसे हो गये। ।८४।*

विनोद, यथा—

४१. *हे प्रियसखि! जिसके अरुण वस्त्र चमक रहे हैं, चन्दन-केशर-लेप से जिसका शरीर गौर वर्ण हो गया है, जिसने कानों में सुन्दर जूड़ा (केशपाश) बना रखा है, जिसने रत्नजटित कुण्डल पहन रखे हैं, ऐसे राधावेशधारी मधुरिपु (श्रीकृष्ण) को यहाँ साक्षात् देखकर सुबल विस्मित हो गया और मुस्कान से भर उठा। ।८५।*

अथानुभावाः—

४५. नियुद्ध-कन्दुकद्यूतवाह्यवाहादिकेलिभिः।
लगुडालगुडि-क्रीडा-सङ्गरैश्चास्य तोषणम्॥ (८६)

[नियुद्ध-कन्दुक-द्यूत-वाह्यवाह-आदिकेलिभिः लगुडा-लगुडि-क्रीडा-सङ्गरैः च अस्य तोषणम्॥]

४६. पल्यङ्कासनदोलासु सह-स्वापोपवेशनम्।
चारुचित्रपरीहासो विहारः[३०] सलिलाशये॥ (८७)

[पल्यङ्क-आसन-दोलासु सहस्वाप-उपवेशनम्, चारुचित्र-परीहासः, सलिलाशये विहारः॥]

४७. युग्मत्वे[३१] लास्यगानाद्याः सर्वसाधारणाः क्रियाः॥ (८८)

[युग्मत्वे लास्य-गान-आद्याः क्रियाः सर्वसाधारणाः॥]

तत्र नियुद्धेन तोषणं, यथा—

४२. अघहर! जितकाशी युद्धकण्डूलबाहु-
स्त्वमटसि सखि-गोष्ठ्यामात्मवीर्यं स्तुवानः।
कथय किमु ममोच्चैश्चण्डदोर्दण्डचेष्टा-
विरमितरणरङ्गो निःसहाङ्गः स्थितोऽसि॥ (८९)

[अघहर! जितकाशी युद्धकण्डूलबाहुः त्वं सखिगोष्ठ्याम् आत्मवीर्यं स्तुवानः अटसि। कथय! किम् उ मम उच्चैः चण्डदोर्दण्डचेष्टाविरमित-रणरङ्गः निःसहाङ्गः स्थितः असि?]

४८. युक्तायुक्तादिकथनं हितकृत्ये प्रवर्तनम्।
प्रायः पुरःसरत्वाद्याः सुहृदामीरिताः क्रियाः॥ (९०)

[युक्त-अयुक्त-आदि-कथनम्, हितकृत्ये प्रवर्त्तनम्, प्रायः पुरःसरत्वम्-इत्याद्याः सुहृदां क्रियाः ईरिताः॥]

४९. ताम्बूलाद्यर्पणं वक्त्रे तिलकस्थासकक्रिया।
पत्राङ्कुरविलेखादि सखीनां कर्म कीर्तितम्॥ (९१)

[वक्त्रे ताम्बूलाद्यर्पणम्, तिलक-स्थासकक्रिया, पत्राङ्कुरविलेखादि सखीनां कर्म कीर्तितम्॥]

अनुभाव—

४५-४७. मल्लयुद्ध, गेंद, जुआ, परस्पर सवारी बनना-बनाना, लाठी के खेल, अन्य खेल, लड़ाई आदि से श्रीकृष्ण को सन्तुष्ट करना, पलंग-आसन-झूले आदि पर उनके साथ सोना-बैठना, सुन्दर विविध प्रकार के परिहास, जलाशय में विहार, जोड़े बनाकर नृत्य-गान आदि—ये सर्वसाधारण (सब सखाओं की) क्रियायें हैं। ।८६-८८।

नियुद्ध से तोषण, यथा—

४२. *हे अघहर! अपनी विजय का अभिमान करते हुए युद्ध के लिये खुजलाती बाँहे लेकर, सखाओं की मण्डली में अपने पराक्रम की डींग हाँकते हुए घूमते हो! कहो तो! मेरे प्रचण्ड भुजदण्डों की चेष्टाओं से जिसका रणकौतुक शान्त हो गया है ऐसे तुम निःसह (शिथिल) शरीर वाले होकर कैसे बैठे हो?* *।८९।*

४८. उचित-अनुचित आदि कहना, हितकर्म में प्रवृत्त करना, प्रायः आगे-आगे चलना-इत्यादि सुहृदों की क्रियायें कही गयी हैं। ।९०।

४९. मुख में ताम्बूल आदि देना, तिलक एवं सुगन्धित लेप करना मुख आदि पर पत्र-अङ्कुर चित्रित करना—ये सखाओं के कर्म हैं। ।९१।

५०. निर्जितीकरणं युद्धे वस्त्रे धृत्वास्य कर्षणम्।
पुष्पाद्याच्छेदनं हस्तात्[32] कृष्णेन स्वप्रसाधनम्।
हस्ताहस्ति-प्रसङ्गाद्याः प्रोक्ताः प्रियसखक्रियाः[33]॥ (९२)

[युद्धे निर्जितीकरणम्, वस्त्रे धृत्वा अस्य कर्षणम्, हस्तात् पुष्पाद्याच्छेदनम्, कृष्णेन स्वप्रसाधनम् हस्ताहस्तिप्रसङ्गाद्याः प्रियसखिक्रियाः प्रोक्ताः॥]

५१. दूत्यं व्रजकिशोरीषु तासां प्रणयगामिता।
ताभिः केलिकलौ साक्षात् सख्युः पक्षपरिग्रहः॥ (९३)

[व्रजकिशोरीषु दूत्यम्, तासां प्रणयगामिता, ताभिः केलिकलौ साक्षात् सख्युः पक्षपरिग्रहः॥]

५२. असाक्षात् स्वस्वयूथेशापक्ष[34]-स्थापनचातुरी।
कर्णाकर्णिकथाद्याश्च प्रियनर्मसखक्रियाः॥ (९४)

[असाक्षात् स्वस्वयूथेशा-पक्ष-स्थापन-चातुरी, कर्णाकर्णिकथाद्याः च प्रियनर्मसखक्रियाः॥]

५३. वन्यरत्नाद्यलङ्कारैर्माधवस्य प्रसाधनम्।
पुरस्तौर्यत्रिकं तस्य गवां सम्भालनक्रियाः॥ (९५)

[वन्यरत्नाद्यलङ्कारैः माधवस्य प्रसाधनम्, तस्य पुरः तौर्यत्रिकम्, गवां सम्भालनक्रियाः॥]

५४. अङ्गसंवाहनं माल्यगुम्फनं वीजनादयः।
एताः साधारणा दासैर्वयस्यानां क्रिया मताः।
पूर्वोक्तेष्वपराश्चात्र ज्ञेया धीरैर्यथोचितम्॥ (९६)

[अङ्गसंवाहनं माल्यगुम्फनं वीजनादयः-एताः वयस्यानां दासैः सह साधारणाः क्रिया मताः पूर्वोक्तेषु (अनुभावेषु) अपराः च अत्र धीरैः यथोचितं ज्ञेयाः॥]

अथ सात्त्विकाः; तत्र स्तम्भो, यथा—

४३. निष्क्रामन्तं नागमुन्मथ्य कृष्णं
श्रीदामायं द्राक् परिष्वक्तुकामः।
लब्धस्तम्भौ सम्भ्रमारम्भशाली
बाहुस्तम्भौ पश्य नोत्क्षेप्तुमीष्टे॥ (९७)

[पश्य! नागम् उन्मथ्य निष्क्रामन्तं कृष्णं द्राक् परिष्वक्तुकामः अयं सम्भ्रमारम्भशाली श्रीदामा लब्धस्तम्भौ बाहुस्तम्भौ उत्क्षेप्तुं न ईष्टे॥]

५०. युद्ध में जीत लेना, कपड़ा पकड़ कर खींचना, हाथ से पुष्प आदि झटक लेना, श्रीकृष्ण से अपना प्रसाधन करवाना, उनसे हाथापाई करते हुए परस्पर खींच-तान—ये प्रिय सखाओं की क्रियायें कही गई हैं। ।९२।

५१-५२. व्रजकिशोरियों के प्रति दूतकर्म, उनके प्रणय का अनुमोदन, उनके साथ केलि-कलह में अपने साक्षात् सखा (श्रीकृष्ण) का पक्ष लेना पीछे से अपनी यूथेश्वरी का पक्ष स्थापित करने की चतुराई, कानों में बात करना—ये सब प्रिय नर्म-सखाओं की क्रियायें हैं। ।९३-९४।

५३-५४. वन में प्राप्त रत्न (गुंजा) आदि से बने अलङ्कारों से माधव का प्रसाधन, उनके सामने गीत-वाद्य-नृत्य आदि करना, गायों को संभालने की क्रियायें, शरीर दबाना, माला गूँथना, पंखा झलना आदि—ये वयस्यों की ऐसी क्रियायें हैं जो दासों में भी होती हैं। ये तथा अन्य भी, पूर्वोक्त अनुभावों में कही गई क्रियायें धीर जनों द्वारा यथोचित रूप से जान ली जायें। ।९५-९६।

सात्त्विक भाव—

उनमें से स्तम्भ, यथा—

४३. देखो! नाग को मथित (युद्ध में पराजित) कर निकलते हुए कृष्ण को तुरन्त आलिङ्गन करने की इच्छा वाले एवं अतिशय उत्साह से उतावले इस श्रीदामा के बाहुरूपी खम्भे स्तब्ध हो रहे, इसलिये वह उन्हें उठाने में असमर्थ है (आलिङ्गन के लिये बाँहे उठा ही नहीं पा रहा है।) ।९७।

स्वेदो, यथा—

४४. क्रीडोत्सवानन्दरसं मुकुन्दे
स्वात्यम्बुदे वर्षति रम्यघोषे।
श्रीदाममूर्तिर्वरशुक्तिरेषा
स्वेदाम्बुमुक्तापटलीं प्रसूते॥ (९८)

[रम्यघोषे स्वात्यम्बुदे मुकुन्दे क्रीडोत्सवानन्दरसं वर्षति (सति) एषा श्रीदाममूर्त्तिः वरशुक्तिः स्वेदाम्बुमुक्तापटलीं प्रसूते॥]

रोमाञ्चो, यथा दानकेलिकौमुद्याम्—

४५. अपि गुरुपुरस्त्वं दोःस्तम्भौ प्रसार्य निरर्गलं
विपुलपुलको धन्यः स्वैरी परिष्वजसे हरिम्।
प्रणयति तव स्कन्धे चासौ भुजं भुजगोपमं
क्व सुबल! पुरा सिद्धक्षेत्रे चकर्थ कियत्तपः? (९९)

[गुरुपुरः अपि त्वं दोःस्तम्भौ निरर्गलं प्रसार्य धन्यः विपुलपुलकः स्वैरी हरिं परिष्वजसे, असौ च तव स्कन्धे भुजगोपमं भुजं प्रणयति। सुबल! पुरा क्व सिद्धक्षेत्रे कियत् तपः चकर्थ?]

स्वरभेदादि-चतुष्कं, यथा—

४६. प्रविष्टवति माधवे भुजगराजभाजं ह्रदं
तदीयसुहृदस्तदा पृथुलवेपथुव्याकुलाः।
विवर्णवपुषः क्षणाद्विकट-घर्घरध्मायिनो
निपत्य निकटस्थलीभुवि सुषुप्तिमारेभिरे॥ (१००)

[भुजगराजभाजं ह्रदं प्रविष्टवति माधवे तदीयसुहृदः तदा वेपथुव्याकुलाः, विवर्णवपुषः क्षणात् विकटघर्घरध्मायिनः, निकटस्थलीभुवि निपत्य सुषुप्तिम् आरेभिरे॥]

अश्रु, यथा—

४७. दावं समीक्ष्य विचरन्तमिषीकतूलै-
स्तस्य क्षयार्थमिव बाष्पझरं किरन्ती।
स्वामप्युपेक्ष्य तनुमम्बुजमालभारि-
ण्याभीरवीथिरभितो हरिमावरिष्ट॥ (१०१)

[इषीकतूलैः विचरन्तं दावं समीक्ष्य, तस्य क्षयार्थम् इव बाष्पझरं किरन्ती अम्बुजमालभारिणी आभीरवीथिः स्वां तनुम् अपि उपेक्ष्य अभितः हरिम् आवरिष्ट॥]

स्वेद, यथा—

४४. *(सींगे का) सुन्दर घोष करते हुए मुकुन्दरूपी स्वाति-नक्षत्रकालीन मेघ जब क्रीड़ा-उत्सव का आनन्दरस बरसाने लगा तब श्रीदामा-रूपी यह श्रेष्ठ शुक्ति स्वेद-बिन्दुरूपी मोतियों की लड़ी उपजाने लगी।* ।९८।

रोमाञ्च, यथा दानकेलिकौमुदी में—

४५. *गुरुजनों के सामने भी तुम भुजारूपी खम्भे स्वच्छन्द रूप से फैलाये हुए, अतिशय पुलक से भरे, निरङ्कुश होकर श्रीहरि का आलिङ्गन कर रहे हो, और वे भी प्रेम से अपनी भुजग जैसी बाँह तुम्हारे स्कन्ध पर रख रहे हैं; हे सुबल तुम धन्य हो! पहले किस सिद्धक्षेत्र में तुमने कितना तप किया है?* ।९९।

स्वरभेद आदि चतुष्टय, यथा—

४६. *माधव ने जब नागराज से युक्त ह्रद (कालिय-दह) में प्रवेश किया तब उनके मित्र भारी कम्प से व्याकुल हो गये, उनके शरीर विवर्ण हो गये (फीके पड़ गये), क्षण-भर को उनकी घिघ्घी बँध गयी (गले से घर्घर ध्वनि होने लगी) समीप की भूमि पर गिरकर वे सुषुप्ति में जाने लगे, अर्थात् निश्चेष्ट, मूर्च्छित जैसे हो गये।* ।१००।

अश्रु, यथा—

४७. *सरकण्डों के गुच्छों के द्वारा आगे-बढ़ते फैलते दावाग्नि को देखकर, मानो उसे बुझाने के लिये आँसू (रूपी जल) छिड़कती हुई, कमलमालाओं से लदी, ग्वालों की मण्डली ने अपने शरीर की भी उपेक्षा करते हुए चारों ओर से हरि को ढक लिया।* ।१०१।

अथ व्यभिचारिणः—

५५. औग्र्यं त्रासं तथालस्यं वर्जयित्वाखिलाः परे।
रसे प्रेयसि भावज्ञैः कथिता व्यभिचारिणः॥ (१०२)

[औग्र्यं त्रासं तथा आलस्यं वर्जयित्वा अखिलाः परे व्यभिचारिणः प्रेयसि रसे भावज्ञैः कथिताः॥]

५६. तत्रायोगे मदं हर्षं गर्वं निद्रां धृतिं विना।
योगे मृतिं क्लमं व्याधिं विनापस्मृति-दीनते[३५]॥ (१०३)

[तत्र अयोगे-मदं हर्षं गर्वं निद्रां धृतिं विना, योगे (च) मृतिं क्लमं व्याधिम् अपस्मृति-दीनते विना॥]

तत्र हर्षो, यथा—

४८. निष्क्रमय्य किल कालियोरगं
वल्लभेश्वरसुते समीयुषि।
सम्मदेन सुहृदः स्खलत्पदा-
स्तद्गिरश्च विवशाङ्गतां दधुः[३६]॥ (१०४)

[कालियोरगं निष्क्रमय्य किल बल्लवेश्वरसुते समीयुषि सुहृदः सम्मदेन स्खलत्पदाः, तद्गिरः च विवशाङ्गतां दधुः॥]

अथ स्थायी—

५७. विमुक्तसम्भ्रमा या स्याद्विश्रम्भात्मा रतिर्द्वयोः।
प्रायः समानयोरत्र सा सख्यं स्थायिशब्दभाक्॥ (१०५)

[प्रायः समानयोः द्वयोः विमुक्तसम्भ्रमा या विश्रम्भात्मा रतिः, सा सख्यं स्थायिशब्दभाक्॥]

५८. विश्रम्भो गाढविश्वासविशेषो यन्त्रणोज्झितः।
एषा सख्यरतिर्वृद्धिं गच्छन्ती प्रणयः क्रमात्।
प्रेमा स्नेहस्तथा राग इति पञ्च-भिदोदिता॥ (१०६)

[विश्रम्भः यन्त्रणोज्झितः गाढविश्वासविशेषः, एषा सख्यरतिः वृद्धिं गच्छन्ती क्रमात् प्रणयः, प्रेमा, स्नेहः तथा रागः इति पञ्चभिदा उदिता॥]

व्यभिचारिभाव-

५५. उग्रता, त्रास और आलस्य को छोड़कर शेष सभी व्यभिचारीभाव प्रेयान् रस में भाव के ज्ञाताओं ने कहे हैं। ।१०२।

५६. उनमें से वियोग में मद हर्ष, गर्व, निद्रा, धृति को छोड़कर और संयोग में मृति, ग्लानि, व्याधि, अपस्मार को छोड़कर शेष सभी रहते हैं। ।१०३।

उनमें से हर्ष, यथा—

४८. कालियनाग को (कालिन्दी-ह्रद से) निकालकर जब गोपराज (नन्द) का पुत्र सब सुहृदों के निकट आ गया, तब अत्यन्त हर्ष से उनके पाँव लड़खड़ाने लगे, अथवा वाणी अस्फुट होने लगी और वाणी तथा शरीर विवश हो गये। ।१०४।

स्थायिभाव—

५७. सम्भ्रम (सम्मान जनित विक्षोभ) छोड़कर जो विश्रम्भमयी (अन्तरङ्ग घनिष्ठताभरी) रति दो प्रायः समान जनों के बीच होती है, वह सख्य स्थायी शब्द से कहा जाता है, अर्थात् वह रति ही सख्य नामक स्थायीभाव है।

।१०५।

५८. गाढ़-विश्वास-विशेष ही विश्रम्भ है जोकि नियन्त्रण या प्रतिबन्ध से रहित है। यह सख्य-रति जब वृद्धि को प्राप्त होती है (बढ़ती जाती है) तो क्रमशः प्रणय, प्रेम, स्नेह तथा राग—ऐसे पाँच प्रकार से कही जाती है। ।१०६।

तत्र सख्यरतिः, यथा—

४९. मुकुन्दो गान्दिनीपुत्र! त्वया सन्दिश्यतामिति।
गरुडाङ्क! गुडाकेशस्त्वां कदा परिरप्स्यते? (१०७)

[गान्दिनीपुत्र! मुकुन्दः त्वया सन्दिश्यताम्-गरुडाङ्क! त्वां गुडाकेशः कदा परिरप्स्यते इति॥]

प्रणयः—

५९. प्राप्तायां सम्भ्रमादीनां योग्यतायामपि स्फुटम्।
तद्गन्धेनाप्यसंस्पृष्टा रतिः प्रणय उच्यते॥ (१०८)

[सम्भ्रमादीनां योग्यतायां प्राप्तायाम् अपि स्फुटम् असंस्पृष्टा रतिः प्रणयः उच्यते॥]

यथा—

५०. सुरैस्त्रिपुरजिन्मुखैरपि विधीयमानस्तुते-
रपि प्रथयतः परामधिक-पारमेष्ठ्यश्रियम्।
दधत्पुलकिनं हरेरधिशिरोधि सव्यं भुजं
समस्कुरुत [३७]पांशुलान् शिरसि चन्द्रकानर्जुनः[३८]॥ (१०९)

[त्रिपुरजिन्मुखैः अपि सुरैः विधीयमांनस्तुतेः, पराम् अधिकपारमेष्ठ्यश्रियं प्रथयतः हरेः अधिशिरोधि पुलकिनं सव्यं भुजं दधत् अर्जुनः पांशुलान् चन्द्रकान् शिरसि समस्कुरुत॥]

प्रेम, यथा—

५१. भवत्युदयतीश्वरे सुहृदि हन्त राज्यच्युति-
र्मुकुन्द! वसतिर्वने परगृहे च दास्यक्रिया।
इयं स्फुटममङ्गला भवतु पाण्डवानां गतिः
परन्तु ववृधे त्वयि द्विगुणमेव सख्यामृतम्॥ (११०)

[मुकुन्द! भवति ईश्वरे सुहृदि उदयति हन्त! राज्यच्युतिः, वने वसतिः, परगृहे दास्यक्रिया च, इयं स्फुटम् अमङ्गला गतिः पाण्डवानां भवतु, परन्तु त्वयि सख्यामृतं द्विगुणम् एव ववृधे॥]

उनमें से सख्यरति, यथा—

४९. *हे अक्रूर! तुम मुकुन्द को यह सन्देश देना-"हे गरुडाङ्क! (जिनकी ध्वजा पर गरुड़ अङ्कित है) गुडाकेश (अर्जुन) कब तुम्हें आलिङ्गन करेगा?"* ।१०७।

प्रणय—

५९. सम्भ्रम आदि की सम्भावना उठने पर भी, उसकी गन्ध से भी जो रति अस्पृष्ट रहती है, वह प्रणय कहलाती है। ।१०८।

यथा—

५०. *त्रिपुरजयी (शिव) आदि द्वारा जिनकी स्तुति की जा रही थी, परमेष्ठि (ब्रह्मा) से भी बढ़कर जिनकी परम श्री (समृद्धिशोभा) प्रकाशित हो रही थी—ऐसे श्रीकृष्ण की ग्रीवा पर पुलकभरी बाँयी भुजा रखकर अर्जुन (व्रज में जो नर्मसखाओं में से एक है) ने सिर पर धारण किये धूलभरे मोरपंखों को सँवार दिया।* ।१०९।

प्रेम, यथा—

५१. *हे मुकुन्द! आप (स्वयं) ईश्वर सुहृद के रूप में उदित हुए, तब (भी) पाण्डवों का राज्य से च्युत होना, वन में वास करना, दूसरे के घर में दासता करना—यह सब अमङ्गल गति भले ही हुई, किन्तु आपके प्रति उनका सख्यामृत दुगना ही बढ़ता गया।* ।११०।

स्नेहो, यथा श्रीदशमे (भा०१०/१५/१८)—

५२. अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः।
गायन्ति स्म महाराज़! स्नेहक्लिन्नधियः शनैः॥ (१११)

[महाराज! स्नेहक्लिन्नधियः अन्ये महात्मनः तदनुरूपाणि मनोज्ञानि शनैः गायन्ति स्म॥]

यथा वा—

५३. आर्द्राङ्गस्खलदच्छधातुषु सुहृद्गोत्रेषु लीलारसं
वर्षत्युच्छ्वसितेषु कृष्णमुदिरे व्यक्तं बभूवाद्भुतम्।
या प्रागास्त सरस्वती द्रुतमसौ लीनोपकण्ठस्थले
या नासीदुदगाद्दृशोः पथि सदानीरोरुधारात्र सा॥ (११२)

[आर्द्राङ्गस्खलदच्छधातुषु उच्छ्वसितेषु सुहृद्गोत्रेषु कृष्णमुदिरे लीलारसं वर्षति अद्भुतं व्यक्तम् अभूत्। या सरस्वती प्राग् आस्त असौ द्रुतम् उपकण्ठस्थले लीना, या न आसीत् सा अत्र दृशोः पथि सदानीरा उरुधारा उदगात्॥]

रागो, यथा—

५४. अस्त्रेण दुष्परिहरा हरये व्यकारि
या पत्रिपङ्क्तिरकृपेण कृपीसुतेन।
उत्प्लुप्य गाण्डिवभृता हृदि गृह्यमाणा
जातास्य सा कुसुमवृष्टिरिवोत्सवाय॥ (११३)

[अकृपेण कृपीसुतेन अस्त्रेण दुष्परिहरा या पत्रिपंक्तिः हरये व्यकारि, गाण्डिवभृता उत्प्लुत्य हृदि गृह्यमाणा सा अस्य कुसुमवृष्टिः इव उत्सवाय जाता॥]

यथा वा—

५५. कुसुमान्यवचिन्वतः समन्ताद्-
वनमालारचनोचितान्यरण्ये।
वृषभस्य वृषार्कजा मरीचि-
र्दिवसार्धेऽपि बभूव कौमुदीव॥ (११४)

[अरण्ये वनमालारचनोचितानि कुसुमानि समन्तात् अवचिन्वतः वृषभस्य दिवसार्धे अपि वृषार्कजा मरीचिः कौमुदी इव बभूव॥]

स्नेह, यथा श्रीदशम में (भा. १०/१५/१८)—

५२. *हे महाराज! जिनकी बुद्धि स्नेह से भीगी है ऐसे अन्य लोग उन महात्मा के अनुरूप एवं मनोज्ञ यशोमयी लीलाओं का गान कर रहे थे।* ।१११।

और भी, यथा—

५३. *श्रीकृष्ण रूपी मेघ जब लीलारस बरसने लगा, तब जिनके भीगे शरीर से, गेरु आदि स्वच्छ धातुएँ (जिन्हें अङ्गराग बनाया गया था) बह रही थीं, ऐसे सखारूपी पर्वतों के उच्छ्वसित होने पर (सखाओं के पक्ष में उत्साह से ऊँचे श्वास, और पर्वत के पक्ष में वृक्ष आदि वनस्पति का बढ़ना) कुछ अद्‌भुत घटना हुई, कि-जो सरस्वती (वाणी या नदी) पहले कण्ठ में लीन थी (नदी के पक्ष में तल में छिपी थी) वह द्रुत गति से ऊपर उठ आयी (सखा हर्ष से बोलने लगे, नदी ऊपर बह चली) और जो दिखाई नहीं दे रही थी वह जल से भरी विशालधारा होकर आँखों के मार्ग में आँसू बन कर प्रकट हो गयी।* ।११२।

राग, यथा—

५४. *निष्करुण कृपीसुत अश्वत्थामा ने जो बाणों की पंक्ति श्रीहरि की ओर फेंकी, उसका परिहार अस्त्रों से नहीं हो सकता था, गाण्डीवधारी अर्जुन ने उसे अपनी छाती पर ले लिया, और उसके लिये वह पुष्पवृष्टि के समान आनन्दप्रद हो गयी।* ।११३।

अथवा, यथा—

५५. *वन में वनमाला बनाने के लिये उपयुक्त फूलों को चारों ओर से चुनते हुए वृषभ नामक सखा को ज्येष्ठ मास के मध्याह्न की सूर्यकिरणें चन्द्रिका जैसी (शीतल) लगीं।* ।११४।

अथ अयोगे उत्कण्ठितं, यथा-

५६. धनुर्वेदमधीयानो मध्यमस्त्वयि पाण्डवः।
बाष्पसंकीर्णया कृष्ण! गिराश्लेषं व्यजिज्ञपत्॥ (११५)

[कृष्ण! धनुर्वेदम् अधीयमानः मध्यमः पाण्डवः त्वयि बाष्पसङ्कीर्णया गिरा आश्लेषं व्यजिज्ञपत्॥]

अथ वियोगे, यथा—

५७. अघस्य जठरानलात् फणिह्रदस्य च क्ष्वेडतो,
दवस्य कवलादपि त्वमविताऽत्र येषामभूः।
इतस्त्रितयतोऽप्यतिप्रकटघोरधाटीधरात्
कथं न विरहज्वरादवसितान् सखीनद्य नः? (११६)

[अघस्य जठरानलात्, फणिह्रदस्य च क्ष्वेडतः, दवस्य कवलात् अपि त्वं येषाम् अविता अत्र अभूः, अतः इतः त्रितयतः अपि अतिघोरधाटीधरात् विरहज्वरात् तान् नः सखीन् अद्य कथं न अवसि?]

६०. अत्रापि पूर्ववत् प्रोक्तास्तापाद्यास्ता दशा दश॥ (११७)

[अत्र अपि पूर्ववत् तापाद्याः ताः दश दशाः प्रोक्ताः॥]

तत्र तापः-

५८. प्रपन्नो भाण्डीरेऽप्यधिकशिशिरे चण्डिमभरं
तुषारेऽपि प्रौढिं दिनकरसुतास्रोतसि गतः।
अपूर्वः कंसारे! सुबलमुखमित्रावलिमसौ
बलीयानुत्तापस्तव विरहजन्मा ज्वलयति॥ (११८)

[अधिकशिशिरे भाण्डीरे चण्डिमभरं प्रपन्नः, दिनकरसुतास्रोतसि तुषारे अपि प्रौढिं गतः तव विरहजन्मा अपूर्वः असौ बलीयान् उत्तापः, कंसारे! सुबलमुखमित्रावलिं ज्वलयति॥]

कृशता—

५९. त्वयि प्राप्ते कंसक्षितिपतिविमोक्षाय नगरीं
गभीरादाभीरावलितनुषु खेदादनुदिनम्।
चतुर्णां भूतानामजनि तनिमा दानवरिपो
समीरस्य घ्राणाध्वनि[३९] पृथुलता केवलमभूत्॥ (११९)

[दानवरिपो! कंसक्षितिपतिविमोक्षाय नगरीं प्राप्ते त्वयि गभीरात् खेदात् आभीरावलितनुषु चतुर्णां भूतानां तनिमा अजनि, केवलं घ्राणाध्वनि समीरस्य पृथुलता अभूत्॥]

अयोग में उत्कण्ठा, यथा—

५६. *हे श्रीकृष्ण! धनुर्वेद का अध्ययन करते हुए मध्यम पाण्डव (अर्जुन) ने अश्रुपूर्ण (गद्गद) वाणी से तुम्हारे प्रति आलिङ्गन निवेदित किया। ।११५।*

वियोग में, यथा—

५७. *अघासुर के जठरानल से, (कालिय) नाग के विषैले ह्रद से, दावाग्नि के ग्रास से तुम जिनके रक्षक बने थे, उन तीनों से भी अत्यन्त घोर आक्रामक भाव से भरे विरहज्वर से ग्रस्त हम सखाओं को आज क्यों नहीं बचा रहे हो? ।११६।*

६०. यहाँ भी पूर्ववत् ताप से आरम्भ होने वाली वे दस दशायें कही गई हैं। ।११७।

उनमें से ताप, यथा—

५८. *हे कंसशत्रु (श्रीकृष्ण) अधिक शीत भाण्डीर वन में जो ताप प्रचण्ड हो उठा है, वह यमुना के शीतल स्रोत में भी प्रबल हो गया है, तुम्हारे विरह से जनित यह अपूर्व बलवान् ताप सुबल आदि मित्रमण्डली को जला रहा है। ।११८।*

कृशता, यथा—

५९. *हे दानवों के शत्रु! तुम जब राजा कंस का अन्त करने के लिए मथुरा नगरी में पहुँचे तब गहरे खेद से गोपमण्डली के शरीरों में दिन-पर-दिन चार महाभूतों की कृशता हो गई, केवल नासिका के मार्ग से पवन की ही पृथुलता (अधिकता) हुई (श्वास दीर्घ हो गये)। ।११९।*

जागर्या, यथा—

६०. नेत्राम्बुज-द्वन्द्वमवेक्ष्य पूर्णं
बाष्पाम्बुपूरेण वरूथपस्य।
तत्रानुवृत्तिं किल यादवेन्द्र
निर्विद्य निद्रा-मधुपी मुमोच॥ (१२०)

[यादवेन्द्र! वरूथपस्य नेत्राम्बुजद्वन्द्वं बाष्पपूरेण पूर्णम् अवेक्ष्य, निद्रामधुपी निर्विद्य किल तत्र अनुवृत्तिं मुमोच॥]

आलम्बनशून्यता—

६१. गते वृन्दारण्यात् प्रियसुहृदि गोष्ठेश्वरसुते
लघूभूतं सद्यः पतदतितरामुत्पतदपि।
न हि भ्रामं भजति चटुलं तूलमिव मे
निरालम्बं चेतः क्वचिदपि विलम्बं लवमपि॥ (१२१)

[प्रियसुहृदि गोष्ठेश्वरसुते वृन्दारण्यात् गते लघुभूतं मे चटुलं चेतः निरालम्बं सद्यः पतत् अतितराम् उत्पतत् अपि भ्रामं भ्रामं तूलम् इव क्वचिद् अपि लवम् अपि विलम्बं न हि भजति॥]

अधृतिः—

६२. रचयति निजवृत्तौ पाशुपाल्ये निवृत्तिं
कलयति च कलानां विस्मृतौ यत्नकोटिम्।
किमपरमिह वाच्यं जीवितेऽप्यद्य धत्ते
यदुवर! विरहात्ते नार्थितां बन्धुवर्गः॥ (१२२)

[यदुवर! ते विरहात् बन्धुवर्गः अद्य निजवृत्तौ पाशुपाल्ये निवृत्तिं रचयति, कलानां च विस्मृतौ यत्नकोटिं कलयति, किम् अपरम् इह वाच्यम्! जीविते अपि अर्थितां न धत्ते॥]

जडता—

६३. अनाश्रितपरिच्छदाः कृशविशीर्णरूक्षाङ्गकाः[४०]
सदा विफलवृत्तयो विरहिताः किलच्छायया।
विराव[४१]-परिवर्जितास्तव मुकुन्द! गोष्ठान्तरे
स्फुरन्ति सुहृदां गणाः शिखरजातवृक्षा इव[४२]॥ (१२३)

[मुकुन्द! अनाश्रितपरिच्छदाः कृशविशीर्णरूक्षाङ्गकाः, सदा विफलवृत्तयः छायया किल विरहिताः, विराव-परिवर्जिताः तव सुहृदां गणाः गोष्ठान्तरे शिखरजातवृक्षाः इव स्फुरन्ति॥]

जागरण, यथा—

६०. *हे यादवेन्द्र! वरूथप (सखा) के दोनों नयनकमलों को आँसुओं की बाढ़ से भरे देखकर, निद्रारूपी भ्रमरी ने उदास होकर वहाँ जाना ही छोड़ दिया।* ।१२०।

आलम्बनशून्यता, यथा—

६१. *व्रजेश (नन्द) के नन्दन (श्रीकृष्ण) जब वृन्दावन से चले गये तब मेरा चञ्चल असहाय चित्त हल्का होकर तत्काल गिरता-उठता, चक्कर खाता हुआ रुई की भाँति, कहीं भी, क्षणभर भी टिकता नहीं।* ।१२१।

अधृति, यथा—

६२. *हे यदुवर! तुम्हारा मित्रवर्ग अपनी पशुपालन-वृत्ति के प्रति निवृत्ति धारण कर रहा है, कलाओं को भूल जाने के लिये कोटि-कोटि यत्न करता है, और क्या कहा जाय! तुम्हारे विरह से ये अपने जीवन का भी कोई प्रयोजन नहीं देख रहे हैं।* ।१२२।

जड़ता, यथा—

६३. *हे मुकुन्द! तुम्हारे मित्रों के समूह, वेश आदि को त्यागे हुए कृश, कुम्हलाये हुए और रूखे अङ्गों वाले, जिन की सभी वृत्तियाँ विफल हो गयी हैं, जो कान्ति से रहित हैं, कोलाहल छोड़ चुके हैं—ऐसे होकर व्रज के भीतर इस तरह दिखाई दे रहे हैं जैसे पर्वत के शिखर पर उगे हुए वृक्ष हों। (वृक्ष के पक्ष में पत्तों से रहित, कृश, कुम्हलाये हुए, रूखे, फलों से रहित शाखाओं वाले, छाया रहित, पक्षियों के कलरव से शून्य—ऐसा समझना चाहिये।)* ।१२३।

व्याधिः—

६४. विरहज्वर-संज्वरेण ते
ज्वलिता विश्लथगात्रबन्धना।
यदुवीर! तटे विचेष्टते
चिरमाभीर-कुमारमण्डली॥ (१२४)

[यदुवीर! ते विरहज्वरसंज्वरेण ज्वलिता विश्लथगात्रबन्धना आभीरकुमारमण्डली चिरं तटे विचेष्टते॥]

उन्मादः—

६५. विना भवदनुस्मृतिं विरहविभ्रमेणाधुना
जगद्व्यवहृति-क्रमं निखिलमेव विस्मारिताः।
लुठन्ति भुवि शेरते बत हसन्ति धावन्त्यमी
रुदन्ति मथुरापते! किमपि बल्लवानां गणाः॥ (१२५)

[मथुरापते! अमी बल्लवानां गणाः भवदनुस्मृतिं विना विरहविभ्रमेण अधुना निखिलम् एव जगद्व्यवहृतिक्रमं विस्मारिताः, किम् अपि भुवि लुठन्ति, बत शेरते, हसन्ति, धावन्ति, रुदन्ति॥]

मूर्च्छितम्—

६६. दीव्यतीह मधुरे मथुरायां
प्राप्य राज्यमधुना मधुनाथे।
विश्वमेव मुदितं रुदितान्धे
गोकुले तु मुहुराकुलताभूत्॥ (१२६)

[राज्यं प्राप्य इह मथुरायां मधुरे मधुनाथे दीव्यति अधुना विश्वम् एव मुदितम्, रुदितान्धे गोकुले तु मुहुः आकुलता अभूत्॥]

मृतिः—

६७. कंसारेर्विरहज्वरोर्मिजनित-ज्वालावलीजर्जरा
गोपाः शैलतटे तथा शिथिलितश्वासाङ्कुराः शेरते।
वारं वारमखर्वलोचन-जलैराप्लाव्य तान्निश्चलान्
शोचन्त्यद्य यथा चिरं परिचयस्निग्धाः कुरङ्गा अपि॥ (१२७)

[कंसारेः विरहज्वरोर्मिजनितज्वालावलीजर्जराः तथा शिथिलितश्वासाङ्कुराः गोपाः शैलतटे शेरते। परिचयस्निग्धाः कुरङ्गाः अपि वारं वारम् अखर्वलोचनजलैः तान् निश्चलान् आप्लाव्य अद्य शोचन्ति॥]

व्याधि, यथा—

६४. *हे यदुवीर! तुम्हारे विरह-ज्वर से जिनके शरीर के जोड़ शिथिल हो गये हैं, ऐसी गोप-कुमारों की मण्डली तट पर लोट-पोट हो रही है।* ।१२४।

उन्माद, यथा—

६५. *हे मथुरेश! आपके विरह से विभ्रम में पड़े हुए ये गोपगण आपके अनुस्मरण के सिवा अब समस्त जगद्-व्यवहार का क्रम भुला बैठे हैं, बस किसी तरह धरती पर लोटते हैं, सोये रहते हैं, कभी हँसते हैं, रोते हैं या (इधर-उधर) दौड़ने लगते हैं।* ।१२५।

मूर्च्छा, यथा—

६६. *अब मधुर मधुनाथ (माधव) राज्य प्राप्त करके यहाँ मथुरा में क्रीड़ा करने लगे तो सारा विश्व ही मुदित हुआ, किन्तु रोने से अन्धे हुए गोकुल में तो आकुलता ही बढ़ गई।* ।१२६।

मृति (मरण), यथा—

६७. *कंसरिपु (श्रीकृष्ण) के विरहज्वर की लहरियों से उत्पन्न ज्वालावली से जर्जर तथा शिथिल श्वास लेते हुए गोप (गोवर्धन) पर्वत की तलहटी में सो रहे हैं, (श्रीकृष्ण एवं गोपों के) परिचय से स्निग्ध हरिण भी आज निश्चल पड़े हुए उनको बारम्बार विपुल अश्रुजल से भिगोकर शोकमग्न हो रहे हैं।* ।१२७।

६१. प्रोक्तेयं विरहावस्था स्पष्ट-लीलानुसारतः।
कृष्णेन विप्रयोगः स्यान्न जातु व्रजवासिनाम्॥ (१२८)

[इयं विरहावस्था स्पष्टलीलानुसारतः प्रोक्ता। व्रजवासिनां कृष्णेन वियोगः न जातु स्यात्॥]

तथा च स्कान्दे मथुराखण्डे—

६८. वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः।
वृन्दावनान्तरगतः सरामो बालकैर्वृतः॥ (१२९)

[बालकैः वृतः सरामः माधवः वृन्दावनान्तरगतः वत्सैः वत्सतरीभिः च सदा क्रीडति॥]

अथ योगे सिद्धिर्यथा—

६९. पाण्डवः पुण्डरीकाक्षं प्रेक्ष्य चक्रिनिकेतने।
चित्राकारं भजन्नेव मित्राकारमदर्शयत्॥ (१३०)

[पाण्डवः पुण्डरीकाक्षं चक्रनिकेतने प्रेक्ष्य चित्राकारं भजन् एव मित्राकारम् अदर्शयत्॥]

तुष्टिः यथा श्रीदशमे (भा०१०/७१/२७)—

७०. तं मातुलेयं परिरभ्य निर्वृतो
भीमः स्मयन् प्रेमजवाकुलेन्द्रियः।
यमौ किरीटी च सुहृत्तमं मुदा
प्रवृद्धबाष्पाः परिरेभिरेऽच्युतम्॥ (१३१)

[प्रेमजवाकुलेन्द्रियः भीमः स्मयन् तं मातुलेयं परिरभ्य निर्वृतः, यमौ किरीटी च प्रवृद्धबाष्पाः सुहृत्तमम् अच्युतं मुदा परिरेभिरे॥]

यथा वा—

७१. कुरुजाङ्गले हरिमवेक्ष्य पुरः
प्रियसङ्गमं व्रजसुहृन्निकराः।
भुजमण्डलेन मणिकुण्डलिनः
पुलकाञ्चितेन परिषष्वजिरे॥ (१३२)

[कुरुजाङ्गले प्रियसङ्गमं हरिं पुरः अवेक्ष्य मणिकुण्डलिनः व्रजसुहृन्निकराः पुलकाञ्चितेन भुजमण्डलेन परिषष्वजिरे॥]

६१. यह विरहावस्था स्पष्ट (प्रकट) लीला के अनुसार कही है। (वास्तव में) श्रीकृष्ण के साथ व्रजवासियों का वियोग कभी-भी नहीं होता। ।१२८।

यथा-स्कन्दपुराण के मथुराखण्ड में—

६८. *वृन्दावन के भीतर, बलराम के साथ माधव बालकों से घिरा रहता हुआ बछड़ों-बछड़ियों के साथ सदा क्रीड़ा करता है। ।१२९।*

संयोग में सिद्धि, यथा—

६९. *कुम्हार के घर में पुण्डरीकाक्ष (श्रीकृष्ण) को देखकर अर्जुन चित्रलिखित से रह गये, इस प्रकार मित्र का आकार (अवस्था) दिखा दिया। ।१३०।*

तुष्टि, यथा श्रीदशम में (भा. १०/७१/२७)—

७०. *उस ममेरे भाई का आलिङ्गन करके भीम मुस्कुराता हुए प्रेम के वेग से व्याकुल इन्द्रियों वाला होकर हर्षित हुआ, जुड़वाँ भाई नकुल-सहदेव तथा मुकुटधारी अर्जुन ने आनन्द से उमड़ते हुए आँसू से भरकर अच्युत (श्रीकृष्ण) का आलिङ्गन किया। ।१३१।*

अथवा, यथा—

७१. *जिन का मिलन प्रिय है ऐसे श्रीहरि को कुरुक्षेत्र में सामने देखकर मणिकुण्डल पहने व्रज के सुहृत्-समूह ने पुलक भरे भुजमण्डल से (उनका) आलिङ्गन किया। ।१३२।*

स्थितिः यथा श्रीदशमे (भा० १०/१२/१२)-

७२. यत्पादपांशुर्बहुजन्मकृच्छ्रतो
धृतात्मभिर्योगिभिरप्यगम्यः[४३]।
स एव यद्दृग्विषयः स्वयं स्थितः[४४]
किं वर्ण्यते दिष्टमहो व्रजौकसाम्? (१३३)

[यत्पादपांशुः बहुजन्मकृच्छ्रतः धृतात्मभिः योगिभिः अपि अगम्यः, सः एव यद्दृग्विषयः स्वयं स्थितः (एषां) व्रजौकसाम् अहो किं वर्ण्यते॥]

६२. द्वयोरप्येकजातीयभावमाधुर्यभागसौ।
प्रेयान् कामपि पुष्णाति रसश्चित्तचमत्कृतिम्॥ (१३४)

[द्वयोः अपि एकजातीयभावमाधुर्यभाक् असौ प्रेयान् रसः काम् अपि चित्तचमत्कृतिं पुष्णाति॥]

६३. प्रीते च वत्सले चापि कृष्णतद्भक्तयोः पुनः।
द्वयोरन्योऽन्यभावस्य भिन्नजातीयता भवेत्॥ (१३५)

[प्रीते च वत्सले च अपि पुनः कृष्णतद्भक्तयोः द्वयोः अन्योन्यभावस्य भिन्नजातीयता भवेत्॥]

६४. प्रेयानेव भवेत् प्रेयानतः सर्वरसेष्वयम्।
सख्यसंपृक्तहृदयैः सद्भिरेवानुबुध्यते॥ (१३६)

[प्रेयान् एव प्रेयान् भवेत् अतः सर्वरसेषु अयं सख्यसम्पृक्तहृदयैः सद्भिः एव अनुबुध्यते॥]

॥ इति श्रीभक्तिरसामृतसिन्धौ पश्चिमविभागे
मुख्य-भक्तिरसपञ्चक-निरूपणे प्रेयोभक्तिरस-लहरी तृतीया॥

स्थिति, यथा श्रीदशम में (भा. १०/१२/१२)—

> ७२. *अनेक जन्मों की तपश्चर्या, योगसाधना द्वारा जिन्होंने अपने मन को वश में किया है ऐसे योगियों को भी जिनके चरणों की रज (धूलिकण) भी प्राप्त नहीं होती—वही स्वयं (श्रीकृष्ण) इन व्रजवासियों के सामने दृष्टिगोचर होकर स्थित हैं- अहो! इनके सौभाग्य का कैसे वर्णन (बखान) किया जाय?* *।१३३।*

६२. श्रीकृष्ण और सखा दोनों का एकजातीय भाव होने के कारण यह प्रेयान् रस विशेष माधुर्य का भाजन है और किसी अपूर्व चमत्कार को पुष्ट करता है। ।१३४।

६३. प्रीत और वत्सल दोनों में श्रीकृष्ण और उनके भक्तों (इन दोनों) के बीच परस्पर भाव भिन्नजातीय होता है। ।१३५।

६४. इसलिये प्रेयान् रस ही सब रसों में से प्रियतर है। जिनका हृदय सख्य के सम्पर्क से समृद्ध है ऐसे सज्जनों को ही इसका अनुभव होता है, अर्थात् वे ही इसे समझ सकते हैं। ।१३६।

॥ श्रीभक्तिरसामृतसिन्धु के पश्चिमविभाग में मुख्य पाँच भक्तिरसों के निरूपण में तीसरी प्रेयोभक्तिरस-लहरी समाप्त हुई॥

वत्सलभक्तिरसाख्या चतुर्थलहरी

१. विभावाद्यैस्तु वात्सल्यं स्थायी पुष्टिमुपागतः।
एष वत्सलनामात्र[१] प्रोक्तो भक्तिरसो बुधैः॥ (१)

[वात्सल्यं स्थायी, विभावाद्यैः तु पुष्टिम् आगतः एषः अत्र बुधैः वत्सलनामा भक्तिरसः प्रोक्तः॥]

तत्र आलम्बनाः—

२. कृष्णं तस्य गुरूँश्चात्र प्राहुरालम्बनान् बुधाः॥ (२)

[अत्र बुधाः कृष्णं तस्य गुरून् च आलम्बनान् प्राहुः॥]

तत्र कृष्णो, यथा—

१. नवकुवलयदाम-श्यामलं कोमलाङ्गं
विचलदलक-भृङ्ग-क्रान्त-नेत्राम्बुजान्तम्।
व्रजभुवि विहरन्तं पुत्रमालोकयन्ती
व्रजपतिदयितासीत्[२] प्रस्नवोत्पीडदिग्धा॥ (३)

[नवकुवलयदामश्यामलम्, कोमलाङ्गम्, विचलदलकभृङ्गक्रान्तनेत्राम्बुजान्तम्, व्रजभुवि विहरन्तं पुत्रम् आलोकयन्ती व्रजपतिदयिता प्रस्नवोत्पीडदिग्धा आसीत्॥]

३. श्यामाङ्गो रुचिरः सर्वसल्लक्षणयुतो मृदुः।
प्रियवाक् सरलो ह्रीमान् विनयी मान्यमानकृत्।
दातेत्यादिगुणः कृष्णो विभाव इति[३] कथ्यते॥ (४)

[श्यामाङ्गः, रुचिरः, सर्वसल्लक्षणयुतः, मृदुः, प्रियवाक्, सरलः, ह्रीमान्, विनयी, मान्यमानकृत्, दाता-इत्यादिगुणः कृष्णः विभावः इति कथ्यते॥]

४. एवंगुणस्य चास्यानुग्राह्यत्वादेव कीर्तिता।
प्रभावानास्पदतया वेद्यस्यात्र विभावता॥ (५)

[एवंगुणस्य अस्य वेद्यस्य च अत्र अनुग्राह्यत्वात् एव प्रभावानास्पदतया विभावता कीर्त्तिता॥]

चतुर्थलहरी-वत्सलभक्तिरस

१. वात्सल्य-नामक स्थायीभाव अपने विभाव आदि से पुष्टि पाकर स्वयं ही यहाँ विद्वज्जनों द्वारा वत्सलभक्तिरस नाम से कहा गया है। ।१।

इसके आलम्बन—

२. यहां (इस वत्सलभक्तिरस में) श्रीकृष्ण एवं उनके गुरुजन आलम्बन हैं, ऐसा विद्वान् जनों ने कहा है। ।२।

उनमें से श्रीकृष्ण, यथा—

१. *नवीन नीलकमलों की माला के सदृश श्यामल, कोमल अङ्गोंवाले, चञ्चल अलकों रूपी भ्रमरों से घिरे नयनंकमलोंवाले पुत्र को व्रजभूमि में खेलते हुए देखती हुई व्रजेशप्रिया नन्दरानी यशोदा पुत्र-स्नेह से उमड़े दूध से गीले वक्षवाली हो रही थी। ।३।*

३. श्याम अङ्गकान्ति वाले, रुचिर, सभी सद्लक्षणों से युक्त, मृदु स्वभाव वाले, प्रिय वाणी वाले, सरल, ह्री (लज्जा सौजन्य) से सम्पन्न, विनयी, सम्मान्यों को सम्मान देने वाले, दाता इत्यादि गुणों से समृद्ध श्रीकृष्ण को ही यहाँ विभाव कहा गया है। ।४।

४. ऐसे गुणों वाले ये (श्रीकृष्ण) जो प्रभाव के अनाश्रय के रूप में वेद्य हैं, यहाँ अनुग्रह के पात्र हैं, अतएव उनमें विभावता कही गई। ।५।

तथा श्रीदशमे (भा०१०/८/४५)—

२. त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः।
उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजम्॥ (६)

[त्रय्या उपनिषद्भिः च, साङ्ख्ययोगैः सात्वतैः च उपगीयमानमाहात्म्यं हरिं सा आत्मजम् अमन्यत॥]

यथा वा—

३. विष्णुर्नित्यमुपास्यते सखि! मया तेनात्र नीताः क्षयं
शङ्के पूतनिकादयः क्षितिरुहौ तौ वात्ययोन्मूलितौ।
प्रत्यक्षं गिरिरेष गोष्ठपतिना रामेण सार्धं धृत-
स्तत्तत् कर्म दुरन्वयं मम शिशोः केनास्य संभाव्यते? (७)

[सखि! मया नित्यं विष्णुः उपास्यते इति अत्र शङ्के तेन पूतनिकादयः क्षयं नीताः, तौ क्षितिरुहौ वात्यया उन्मूलितौ, एष गिरिः प्रत्यक्षं गोष्ठपतिना रामेण सार्धं धृतः, अस्य मम शिशोः तत् तत् दुरन्वयं कर्म केन सम्भाव्यते?॥]

अथ गुरवः—

५. अधिकम्मन्यभावेन शिक्षाकारितयापि च।
लालकत्वादिनाप्यत्र विभावा गुरवो मताः॥ (८)

[अधिकम्मन्यभावेन, अपि च शिक्षाकारितया, लालकत्वादिना अपि अत्र गुरवः विभावाः मताः॥]

यथा—

४. भूर्यनुग्रहचितेन चेतसा
लालनोत्कमभितः कृपाकुलम्।
गौरवेण गुरुणा जगद्गुरोर्
गौरवं गणमगण्यमाश्रये॥ (९)

[भूरि-अनुग्रहचितेन चेतसा अभितः कृपाकुलम्, लालनोत्कम्, जगद्गुरोः अगण्यं गौरवं गणम् गुरुणा गौरवेण आश्रये॥]

६. ते तु तस्यात्र कथिता व्रजराज्ञी व्रजेश्वरः।
रोहिणी ताश्च बल्लव्यो याः पद्मजहृतात्मजाः॥ (१०)

[व्रजराज्ञी, व्रजेश्वरः, रोहिणी, या पद्मजहृतात्मजाः ताः बल्लव्यः च—ते तु अत्र तस्य (गुरुजनाः) कथिताः॥]

यथा श्री दशम में (भा. १०/८/४५)—

२. *वेदों द्वारा, उपनिषदों द्वारा, सांख्ययोगों (दर्शनों) के द्वारा तथा वैष्णवों के द्वारा जिनका माहात्म्य गाया जाता है ऐसे हरि को वह (नन्दरानी) अपना बेटा मानती थी।* ।६।

अथवा—

३. *सखि! मैं नित्य ही विष्णु की उपासना करती हूँ, इसलिये लगता है कि (इस शिशु पर आई हुई) पूतना आदि विपत्तियाँ क्षय पाईं, वे दोनों विशाल वृक्ष आँधी से गिरे (भी तो यह शिशु बच गया), फिर यह पर्वत (गोवर्धन) गोष्ठपति (नन्द) ने बलराम के साथ प्रत्यक्ष ही उठाया-धारण किया। (मेरी विष्णु-उपासना के फल के सिवा) मेरे बालक के वे सब अद्भुत कर्म अन्यथा भला कैसे सम्भव हो सकते थे?* ।७।

गुरुजन—

५. स्वयं को अधिक, बड़ा मानने से, शिक्षा देनेवाले होने से, तथा लालन-पालन-दुलार आदि करने वाले होने से भी यहां गुरुजनों को विभाव माना गया है। ।८।

यथा—

४. *बहुत अनुग्रह भरे चित्त से सब ओर से दुलार करने को उत्सुक, कृपा (रक्षण की इच्छा) से आकुल, अतिशय गौरव (बड़प्पन) से जगद्गुरु के असङ्ख्य गुरुवर्ग का मैं आश्रय लेता हूँ।* ।९।

६. यहाँ हरि के गुरुजनों में व्रजरानी (यशोदा), व्रजेश्वर (नन्द), रोहिणी तथा वे गोपियाँ कही गई हैं जिनके पुत्रों को ब्रह्मा ने हरण किया था (तब हरि ने ही उन गोपबालकों का रूप धारण करके उन गोपियों को अपूर्व वात्सल्य का आनन्द दिया था।) ।१०।

७. देवकी तत्सपत्न्यश्य कुन्ती चानकदुन्दुभिः।
सान्दीपनिमुखाश्चान्ये यथापूर्वममी वराः।
व्रजेश्वरी-व्रजाधीशौ श्रेष्ठौ गुरुजनेष्विमौ॥ (११)

[देवकी, तत्सपत्न्यः च, कुन्ती, आनकदुन्दुभिः च, सान्दीपनिमुखाः, अन्ये च—अमी यथापूर्वं वराः, व्रजेश्वरी-व्रजाधीशौ इमौ गुरुजनेषु श्रेष्ठौ॥]

तत्र व्रजेश्वर्या रूपं, यथा श्रीदशमे (भा०१०/९/३)—

५. क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं
पुत्रस्नेहस्नुतकुचयुगं जातकम्पञ्च सुभ्रूः।
रज्ज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च
स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममन्थ॥ (१२)

[पृथुकटितटे सूत्रनद्धं क्षौमं वासः, पुत्रस्नेहस्नुतकुचयुगं च जातकम्पम्, रज्ज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले, स्विन्नं वक्त्रं च बिभ्रती, कबरविगलन्मालती सुभ्रूः निर्ममन्थ॥]

यथा वा—

६. डोरी-जूटित-वक्रकेशपटला सिन्दूरबिन्दूल्लसत्-
सीमन्तद्युतिरङ्गभूषणविधिं नातिप्रभूतं श्रिता।
गोविन्दास्य-निसृष्टसाश्रुनयनद्वन्द्वा[४] नवेन्दीवर-
श्याम-श्यामरुचिर्विचित्रसिचया गोष्ठेश्वरी पातु वः॥ (१३)

[डोरी-जूटित-वक्रकेशपटला, सिन्दूरबिन्दूल्लसत्सीमन्तद्युतिः न अतिप्रभूतं अङ्गभूषणविधिं श्रिता, गोविन्दास्यनिसृष्टसाश्रुनयनद्वन्द्वा, नवेन्दीवरश्यामश्यामरुचिः विचित्रसिचया गोष्ठेश्वरी वः पातु॥]

वात्सल्यं, यथा—

७. तनौ मन्त्रन्यासं प्रणयति हरेर्गद्गदमयी
सबाष्पाक्षी रक्षा-तिलकमलिके कल्पयति च।
स्नुवाना प्रत्यूषे दिशति च भुजे कार्मणमसौ
यशोदा मूर्तेव स्फुरति सुतवात्सल्यपटली॥ (१४)

[हरेः तनौ मन्त्रन्यासं प्रणयति, गद्गदमयी सबाष्पाक्षी अलिके रक्षातिलकं च कल्पयति। प्रत्यूषे च असौ स्नुवाना भुजे कार्मणं दिशति। यशोदा मूर्ता इव सुतवात्सल्यपटली स्फुरति॥]

७. देवकी तथा उनकी सपत्नियाँ, कुन्ती, वसुदेव, तथा सान्दीपनि आदि एवं अन्य भी गुरुजन हैं। ये सब कहे गये क्रम में पहले-पहले (यथापूर्व) श्रेष्ठ हैं, सभी गुरुजनों में व्रजेश्वरी एवं व्रजेश्वर श्रेष्ठ हैं। ।११।

इनमें से व्रजेश्वरी का रूप-

यथा श्रीदशम में (भा. १०/९/३)—

५. *जिसके भारी कटि तट पर डोरी से बँधा रेशमी वस्त्र है, पुत्र के स्नेह से उमड़ते दूध वाले स्तनयुगल काँप रहे हैं, दोनों भुजाओं से मथने की डोरी खींचने के श्रम से कङ्कण एवं कुण्डल हिल-डोल रहे हैं, मुखमण्डल स्वेद (पसीने) से भरा है, हिलते केशपाश (जूड़े) से मालती पुष्प झड़ रहे हैं—ऐसी, सुन्दर भौंहोवाली यशोदा दही मथ रही थीं। ।१२।*

यथा वा—

६. *डोरी से घुंघराले बालों का जूड़ा बाँधे हुए हैं, सिन्दूर-बिन्दी से माँग तथा भाल उल्लसित, सुशोभित हैं, थोड़े-से आभूषण धारण किये हुए हैं। (स्वयं ही धमकाये हुए) गोविन्द के मुख पर (वात्सल्य करुणा से) आँसू भरे नयन टिकाये हुए हैं, नवीन नीलकमल जैसा वर्ण एवं साँवली कान्ति है, बहुरंगी सुन्दर वस्त्र पहने हुए हैं—ऐसी व्रजेश्वरी यशोदा आपकी रक्षा करें। ।१३।*

वात्सल्य, यथा—

७. *हरि (बालकृष्ण) के शरीर पर गद्‌गद कण्ठ से मन्त्रन्यास (प्रति अङ्ग की रक्षा के लिये) करती हैं, भावाश्रुभरे नयन लिये (हरि के) माथे पर रक्षातिलक लगाती हैं, भोर में स्नेह से उमड़ते दूध वाली (यह अपने बालक की) भुजा पर टोटका बाँध देती है—ऐसी यह यशोदा मानो मूर्तिमती पुत्रवात्सल्य की पुतली हैं। ।१४।*

व्रजाधीशस्य रूपं, यथा—

८. तिलतण्डुलितैः कचैः स्फुरन्तं
नवभाण्डीरपलाशचारुचेलम्।
अतितुन्दिलमिन्दुकान्तिभाजं
व्रजराजं वरकूर्चमर्चयामि॥ (१५)

[तिलतण्डुलितैः कचैः स्फुरन्तम्, नवभाण्डीरपलाशचारुचेलम्, अतितुन्दिलम्, इन्दुकान्तिभाजम् वरकूर्चम् व्रजराजम् अर्चयामि॥]

वात्सल्यं, यथा—

९. अवलम्ब्य कराङ्गुलिं निजां
स्खलदङ्घ्रि प्रसरन्तमङ्गने।
उरसि स्रवदश्रुनिर्झरो[५]
मुमुदे प्रेक्ष्य सुतं व्रजाधिपः॥ (१६)

[निजां कराङ्गुलिम् अवलम्ब्य स्खलदङ्घ्रि अङ्गने प्रसरन्तं सुतं प्रेक्ष्य उरसि स्रवदश्रुनिर्झरः व्रजाधिपः मुमुदे॥]

अथ उद्दीपनाः—

८. कौमारादि-वयो-रूप-वेशाः शैशवचापलम्।
जल्पित-स्मित-लीलाद्या बुधैरुद्दीपनाः स्मृताः॥ (१७)

[कौमारादिवयोरूपवेषाः शैशवचापलं जल्पित-स्मित-लीलाद्याः बुधैः उद्दीपनाः स्मृताः॥]

तत्र कौमारम्—

९. आद्यं मध्यं तथा शेषं कौमारं त्रिविधं मतम्। (१८)

[आद्यं मध्यं तथा शेषं त्रिविधं कौमारं मतम्॥]

तत्र आद्यम्—

१०. स्थूलमध्योरुतापाङ्ग-श्वेतिमा स्वल्पदन्तता।
प्रव्यक्त[६]-मार्दवत्वञ्च कौमारे प्रथमे सति॥ (१९)

[स्थूलमध्योरुता, अपाङ्गश्वेतिमा, स्वल्पदन्तता प्रव्यक्तमार्दवत्वं च प्रथमे कौमारे सति॥]

व्रजाधीश (नन्द) का रूप, यथा—

८. तिल (काले) और तण्डुल (श्वेत) वर्ण के (अधपके) केशों से शोभित, भाण्डीर (वट) की कोंपलों जैसे लाल वस्त्र पहने हुए, बड़ी तोंद वाले (स्थूल काया), चन्द्रमा जैसे गौरवर्ण, लम्बी भरावदार मूँछ वाले व्रजेश्वर (नन्दराय) की मैं पूजा करता हूँ। ।१५।

(नन्दबाबा का) वात्सल्य, यथा—

९. अपनी अंगुली पकड़ कर लटपटाते चरणों से आँगन में पग-पग बढ़ते चलते हुए (अपने) बेटे को देख-देख आनन्दाश्रु के झरने जिनके वक्षःस्थल तक बह रहे थे ऐसे व्रजेश्वर (नन्दराय) अतीव मुदित हुए। ।१६।

अब उद्दीपन (कहे जाते हैं)—

८. कौमार आदि वयस्, वैसे रूप, वेश, शैशवोचित चपलता, वैसा ही बोलना-मुस्कुराना, खेलना आदि को तत्त्वज्ञों ने उद्दीपन माना है। ।१७।

इनमें कौमार—

९. यह कौमार तीन प्रकार का माना गया है-आद्य, मध्य तथा शेष। ।१८।

इनमें से आद्य (प्रथम)—

१०. पहले कौमार वयस् में (तनु का) मँझला भाग तथा ऊरु स्थूल होते हैं, चितवन श्वेत होती है, नन्हें-नन्हें थोड़े से दाँत होते हैं, मृदुता भली-भाँति व्यक्त होती है। ।१९।

यथा—

१०. त्रिचतुरदशनस्फुरन्मुखेन्दुः
पृथुतरमध्यकटिरङ्कोरुसीमा।
नवकुवलयकोमलः कुमारो
मुदमधिकां व्रजनाथयोर्व्यतानीत्॥ (२०)

[त्रिचतुरदशनस्फुरन्मुखेन्दुः पृथुतरमध्यकटिः अङ्कोरुसीमा, नवकुवलयकोमलः कुमारः व्रजनाथयोः अधिकां मुदं व्यतानीत्॥]

११. अस्मिन् मुहुः पदक्षेपः क्षणिके रुदितस्मिते।
स्वाङ्गुष्ठपानमुत्तानशयनाद्यञ्च चेष्टितम्॥ (२१)

[अस्मिन् क्षणिके रुदितस्मिते मुहुः पदक्षेपः, स्वाङ्गुष्ठपानम्, उत्तानशयनाद्यं च चेष्टितम्॥]

यथा—

११. मुखपुट-कृतपादाम्भोरुहाङ्गुष्ठमूर्ध्व-
प्रचलचरणयुग्मं पुत्रमुत्तान-सुप्तम्।
क्षणमिह विरुदन्तं स्मेरवक्त्रं क्षणं सा
तिलमपि विरतासीन्नेक्षितुं गोष्ठराज्ञी॥ (२२)

[मुखपुटकृतपादाम्भोरुहाङ्गुष्ठयुग्मम्, ऊर्ध्वप्रचलचरणयुग्मम् उत्तानसुप्तं क्षणं विरुदन्तं क्षणं स्मेरवक्त्रं सुतम् इह ईक्षितुं सा गोष्ठराज्ञी तिलम् अपि विरता न आसीत्॥]

१२. अत्र व्याघ्रनखः कण्ठे रक्षातिलकमञ्जनम्।
पट्टडोरी कटौ हस्ते सूत्रमित्यादि मण्डनम्॥ (२३)

[अत्र कण्ठे व्याघ्रनखः, रक्षातिलकम्, अञ्जनम्, कटौ पट्टडोरी, हस्ते सूत्रम् इत्यादि मण्डनम्॥]

यथा—

१२. तरक्षुनखमण्डनं नवतमालपत्रद्युतिं
शिशुं रुचिर-रोचना-कृत-तमालपत्रश्रियम्।
धृतप्रतिसरं कटिस्फुरितपट्टसूत्रस्रजं
व्रजेशगृहिणी सुतं न किल वीक्ष्य तृप्तिं ययौ॥ (२४)

[तरक्षुनखमण्डनम्, नवतमालपत्रद्युतिम्, रुचिररोचनाकृततमालपत्रश्रियम्, धृतप्रतिसरम्, कटिस्फुरितपट्टसूत्रस्रजं सुतं वीक्ष्य व्रजेशगृहिणी किल तृप्तिं न ययौ॥]

यथा—

१०. *तीन-चार दँतुलियों से शोभायमान जिसका मुखचन्द्र है, मध्यभाग, कटि, ऊरु की सीमा-पर्यन्त फूला-फूला है, नवकुवलय (पहले-पहले खिलते हुए से नील-कमल) जैसा सुकोमल तनु है ऐसा कुमार व्रजेश्वरी व्रजेश (यशोदा-नन्द) को अतीव मुदित कर रहा था। ।२०।*

११. इसमें बारम्बार पाँव चलाना, क्षण में हँसना क्षण में रोना, अपना अंगूठा चूसना, सीधे लेटना आदि चेष्टायें (देखी जाती) हैं। ।२१।

यथा—

११. *(कभी) चरण कमल के अंगूठे को (हाथ से पकड़कर) मुख्य में डाले हुए, (कभी) दोनों पाँव ऊपर की ओर उछाल-उछाल कर निरन्तर चलाते हुए; सीधे पीठ के बल लेटे-सोये हुए, क्षण में रोते-क्षण में मुस्कुराते मुख वाले अपने बेटे को निरखती हुई नन्दरानी तिलभर भी हटती या क्षणभर भी रुकती न थीं। ।२२।*

१२. यहाँ कण्ठ में बघनखा, भाल में रक्षातिलक, नयनों में अञ्जन, कटि में रेशम की डोर, कलाइयों में (भी) डोरे-इत्यादि अलङ्करण होते हैं। ।२३।

यथा—

१२. *छोटे बाघ के नखवाला पदिक गले में सुशोभित है, तमाल के कोंपल जैसी कोमल-साँवली आभा है, गोरोचना से रुचिर तमालपत्र जैसा रक्षातिलक लगाया हुआ है, (हाथों कलाइयों में) 'पहुँची' पहने, कटि में रेशमी डोर एवं माला शोभायमान है, ऐसे अपने 'लाल' को निरख-निरख कर नन्दरानी अघाती न थीं। ।२४।*

अथ मध्यम्—

१३. दृक्तटी[७]-भागलकतानग्रताच्छिद्रिकर्णता।
कलोक्तिरिङ्गणाद्यञ्च कौमारे सति मध्यमे॥ (२५)

[दृक्तटीभाक्-अलकता, आनग्रता, छिद्रिकर्णता कलोक्तिरिङ्गणाद्यं च मध्यमे कौमारे सति॥]

यथा—

१३. विचलदलकरुद्ध[८]-भ्रूतटी-चञ्चलाक्षं
कलवचनमुदञ्चन्नूतन-श्रोत्ररन्ध्रम्।
अलघुरचितरिङ्गं गोकुले दिग्दुकूलं
तनयममृतसिन्धौ प्रेक्ष्य माता न्यमाङ्क्षीत्॥ (२६)

[विचलदलकरुद्धभ्रूतटीचञ्चलाक्षम्, कलवचनम्, उदञ्चन्नूतनश्रोत्ररन्ध्रम्, अलघुरचितरिङ्गम् दिग्दुकूलं तनयं गोकुले प्रेक्ष्य माता अमृत-सिन्धौ न्यमाङ्क्षीत्॥]

१४. घ्राणस्य शिखरे मुक्ता नवनीतं कराम्बुजे।
किङ्किण्यादि च कट्यादौ प्रसाधनमिहोदितम्॥ (२७)

[घ्राणस्य शिखरे मुक्ता, कराम्बुजे नवनीतम्, कट्यादौ च किङ्किण्यादि प्रसाधनम् इह उदितम्॥]

यथा—

१४. क्वणितकनककिङ्किणीकलापं
स्मितमुखमुज्ज्वल[९]-नासिकाग्रमुक्तम्।
करधृतनवनीतपिण्डमग्रे
तनयमवेक्ष्य ननन्द नन्दपत्नी॥ (२८)

[क्वणितकनककिङ्किणीकलापं स्मितमुखम्, उज्ज्वलनासिकाग्रमुक्तम्, करधृतनवनीतपिण्डम् तनयम् अग्रे अवेक्ष्य नन्दपत्नी ननन्द॥]

अथ शेषम्—

१५. अत्र किञ्चित्कृशं मध्यमीषत्प्रथिम[१०]-भागुरः।
शिरश्च काकपक्षाढ्यं कौमारे चरमे सति॥ (२९)

[अत्र किञ्चित् कृशं मध्यम्, ईषत्प्रथिमभाग् उरः, काकपक्षाढ्यं च शिरः-चरमे कौमारे सति॥]

अब मध्य—

१३. मध्यम कौमार आने पर नयनों तक झुल आती अलकें, अधखुला मध्यभाग (कभी ढका कभी उघड़ा) प्रायः नग्रता, छिदे हुए कान, तोतली वाणी, घुटनों रेंगना आदि दिखते हैं। ।२५।

यथा—

१३. जिसकी चञ्चल अलकें भौंहों एवं चञ्चल नयनों तक झुकी आ रही हैं, उन्हें ढक दे रही हैं, सुहावनी तोतली बोली में कुछ-कुछ कहना चलता रहता है, छोटे-छोटे कान नई-नई ध्वनियाँ सुनते हुए उठे रहते हैं, ऐसे अपने बेटे को दिग्वसन (नग्न) ही त्वरित गति से गोकुल में घुटनों रेंगते-भागते-फिरते हुए देखकर माता यशोदा अमृतसिन्धु में निमग्न थी। ।२६।

१४. यहाँ नासिका के अग्रभाग में मुक्ता, करकमल में नवनीत, कटि आदि में किङ्कणी (कौंधनी) आदि यथोचित विविध आभरण-ये प्रसाधन कहे गये हैं। ।२७।

यथा—

१४. रुनझुन करती स्वर्णमयी करधनी (कटिमेखला) और वैसे ही रुनझुनाते कंगन तथा पैंजनी से सुशोभित, मुस्कुराते-मुखवाले ऊँची सुन्दर नासिका में उज्ज्वल मुक्ता पहने हुए, हथेली में ताजे माखन का गोला लिये हुए अपने बेटे को सामने देखकर नन्दरानी यशोदा आनन्दित हो रही थी। ।२८।

अब शेष—

१५. यहाँ कौमार की चरम अवस्था में, मध्यभाग (कटि) थोड़ा-सा कृश होता है, वक्षःस्थल कुछ भरा हुआ, और मस्तक काकपक्ष से सुशोभित होता है। ।२९।

यथा—

१५. स मनागपचीयमानमध्यः
प्रथिमोपक्रमशिक्षणार्थिवक्षाः।
दधदाकुलकाकपक्षलक्ष्मीं
जननीं स्तम्भयति स्म दिव्यडिम्भः॥ (३०)

[सः दिव्यडिम्भः मनाक् अपचीयमानमध्यः, प्रथिमोपक्रमशिक्षणार्थिवक्षाः आकुलकाकपक्ष-लक्ष्मीं दधत् जननीं स्तम्भयति स्म॥]

१६. धटी फणपटी चात्र किञ्चिद्वन्यविभूषणम्।
लघुवेत्रकरत्वादि मण्डनं परिकीर्तितम्॥ (३१)

[अत्र धटी फणपटी च, किञ्चिद् वन्यविभूषणम्, लघुवेत्रकरत्वादि मण्डनं परिकीर्तितम्॥]

१७. वत्सरक्षा व्रजाभ्यर्णे वयस्यैः सह खेलनम्।
पावशृङ्गदलादीनां वादनाद्यत्र चेष्टितम्॥ (३२)

[अत्र चेष्टितम्-वत्सरक्षा, व्रजाभ्यर्णे वयस्यैः सह खेलनम्, पाव-शृङ्गदलादीनां-वादनादि॥]

यथा—

१६. शिखण्डकृतशेखरः फणपटीं कटीरे दधत्
करे च लगुडीं लघुं सवयसां [११]कुलैरावृतः।
अवन्निह शकृत्करीन् परिसरे व्रजस्य प्रिये
सुतस्तव कृतार्थयत्यहह पश्य नेत्राणि नः॥ (३३)

[शिखण्डकृतशेखरः, कटीरे फणपटीं करे च लघुं लगुडीं दधत्, सवयसां कुलैः आवृतः, व्रजस्य प्रिये परिसरे इह शकृत्करीन् अवन् तव सुतः पश्य! अहह नः नेत्राणि कृतार्थयति॥]

अथ पौगण्डम्—

१८. पौगण्डादि पुरैवोक्तं तेन संक्षिप्य लिख्यते। (३४)

[पौगण्डादि पुरा एव उक्तम्। तेन संक्षिप्य लिख्यते॥]

यथा—

१५. *वह दिव्य बालक थोड़े क्षीण होते हुए मध्यभाग (कमर) से युक्त, कुछ फूलना सीखना चाहते हुए से (थोड़ा-थोड़ा फूलते-भरते) वक्षःस्थल वाला, (शरीर की चञ्चलता से) हिलते हुए काकपक्ष (बच्चों के सिर पर बीचोबीच बाँधा जाने वाला सामने के बालों का जूड़ा जैसा) की शोभा लिये हुए अपनी माँ को (आनन्द से) स्तब्ध कर रहा था।* *।३०।*

१६. यहाँ धटी (छोटी-सी धोती) फणपटी (कछौटी-धोती को कमर पर कसे रखने के लिये बाँधा गया फेंटा), अङ्गों पर थोड़े से वन्य विभूषण, छोटी-सी लकुटी हाथ में लिये होना, इत्यादि मण्डन (अलङ्करण) कहे गये हैं। ।३१।

१७. बछड़े चराना, बछड़ों को संभालना, व्रज के आँगन में अपने जैसी वयस् के सखाओं-ग्वालबालकों से खेलना, पावा (छोटी वंशी) सींगी, पत्तों की पीपनी बजाना आदि यही यहाँ चेष्टायें हैं। ।३२।

यथा—

१६. *अहा! मस्तक पर मयूरपिच्छ का छोटा-सा मुकुट धारण किये हुए, कमर में काछनी काछे हुए छोटी-सी लकुटी हाथ में लिये हुए, समान वयस्वाले ग्वालबालों से घिरा हुआ, व्रज के परिसर (आँगन) में शिशु-मल जैसा गोबर करते हुए छोटे बछड़ों को सम्हालता हुआ तुम्हारा बेटा हमारे नेत्रों को कृतार्थ कर रहा है।* *।३३।*

अब पौगण्ड—

१८. पौगण्ड आदि का वर्णन पहले ही किया जा चुका है, अतः अब संक्षेप में लिखा जाता है। ।३४।

यथा—

१७. पथि पथि सुरभीणामंशुकोत्तंसिमूर्धा
धवलिमयुगपाङ्गो मण्डितः कञ्चुकेन।
लघु लघु परिगुञ्जन्मञ्जुमञ्जीरयुग्मं
व्रजभुवि मम वत्सः कच्छदेशादुपैति॥ (३५)

[अंशुकोत्तंसिमूर्धा, धवलितयुगपाङ्गः, कञ्चुकेन मण्डितः, मञ्जुमञ्जीरयुग्मं लघु-लघु परिगुञ्जन् मम वत्सः कच्छदेशात् व्रजभुवि सुरभीणां पथि-पथि उपैति॥]

अथ कैशोरम्—

१८. अरुणिमयुगपाङ्गस्तुङ्गवक्षःकपाटी-
विलुठदमलहारो रम्यरोमावलिश्रीः।
पुरुषमणिरयं मे देवकि! श्यामलाङ्ग-
स्त्वदुदरखनिजन्मा नेत्रमुच्चैर्धिनोति॥ (३६)

[देवकि! अयं अरुणिमयुगपाङ्गः तुङ्गवक्षःकपाटीविलुठदमलहारः, रम्यरोमावलिश्रीः श्यामलाङ्गः त्वदुदरखनिजन्मा पुरुषमणिः मे नेत्रम् उच्चैः धुनोति॥]

१९. नव्येन यौवनेनापि[१२] दीव्यन् गोष्ठेन्द्रनन्दनः[१३]।
भाति केवलवात्सल्यभाजां पौगण्डभागिव॥ (३७)

[नव्येन यौवनेन दीव्यन् अपि गोष्ठेन्द्रनन्दनः केवलवात्सल्यभाजां पौगण्डभाक् इव भाति॥]

२०. सुकुमारेण पौगण्डवयसा सङ्गतोऽप्यसौ।
किशोराभः सदा दासविशेषाणां प्रभासते॥ (३८)

[सुकुमारेण पौगण्डवयसा सङ्गतः अपि असौ दासविशेषाणां सदा किशोराभः प्रभासते॥]

अथ शैशव-चापलम्—

१९. पारीर्भिनत्ति विकिरत्यजिरे दधीनि
सन्तानिकां हरति कृन्तति मन्थदण्डम्।
वह्नौ क्षिपत्यविरतं नवनीतमित्थं
मातुः प्रमोदभरमेव हरिस्तनोति॥ (३९)

[पारीः भिनत्ति, अजिरे दधीनि विकिरति, सन्तानिकां हरति, मन्थदण्डं कृन्तति, वह्नौ अविरतं नवनीतं क्षिपति, इत्थं हरिः मातुः प्रमोदभरम् एव तनोति॥]

यथा—

१७. *मस्तक पर रत्न-जड़े आभूषग वाली छोटी-सी पगड़ी बाँधे हुए, कञ्चुक (वागा या जामा) पहने हुए, धवल चितवन वाला, कमर की किंकिणी और चरणों के नूपुरों की धीमी-धीमी रुनझुन ध्वनि गुँजाता हुआ मेरा बेटा गोचर-भूमि या कछार से व्रजभूमि की ओर आती हुई गायों के पीछे-पीछे उसी पथ पर चला आ रहा है। ।३५।*

अब कैशोर, यथा—

१८. *देवकि! (देखो!) यह अरुणिम नयनों वाला, जिसके चौड़े-उभरे वक्षःस्थल पर शुभ्र हार डोल रहे हैं, रम्य रोमावलि की शोभा सब अङ्गों पर है, साँवला शरीर है, ऐसा तुम्हारे उदर रूपी खान से उत्पन्न पुरुषमणि मेरे नेत्रों को अतीव आनन्दित कर रहा है। ।३६।*

१९. नवीन यौवन से उज्ज्वल शोभायमान भी गोष्ठराज नन्द का नन्दन केवल वात्सल्यभरी दृष्टि वालों को पौगण्डवयस् वाला ही प्रतीत होता है। ।३७।

२०. सुकुमार पौगण्ड-वयस् से युक्त भी यह अपने दास-विशेषों के प्रति सदा किशोर-आभा वाला प्रभासित होता है। ।३८।

अब शैशव की चपलता—

यथा—

१९. *कुल्हड़ शकोरे (दूध-दही के पात्र) फोड़ता रहता है, आँगन में इधर-उधर दही-दूध बिखरा देता है, दूध-दही पर से मलाई निकाल लेता है; मथने का डण्डा (बड़ी मथनी) काट डालता है, चूल्हे (की आग) में मक्खन फेंकता रहता है—इस प्रकार की चपलतायें करते हुए हरि (श्रीकृष्ण) माँ (यशोदा) का प्रमोद बढ़ाते रहते हैं। ।३९।*

यथा वा—

२०. प्रेक्ष्य प्रेक्ष्य दिशः सशङ्कमसकृन्मन्दं पदं निक्षिप-
न्नायात्येष लतान्तरे स्फुटमितो गव्यं हरिष्यन् हरिः।
तिष्ठ स्वैरमजानतीव मुखरे! चौर्यभ्रमद्भ्रूलतं
त्रस्यल्लोचनमस्य शुष्यदधरं रम्यं दिदृक्षे मुखम्॥ (४०)

[सशङ्कं दिशः प्रेक्ष्य प्रेक्ष्य, लतान्तरे असकृत् मन्दं पदं निक्षिपत् एषः हरिः गव्यं हरिष्यन् स्फुटम् इतः आयाति। मुखरे! स्वैरम् अजानती इव तिष्ठ। अस्य रम्यं चौर्यभ्रमद्भ्रूलतम् त्रस्यल्लोचनं मुखं दिदृक्षे॥]

अथ अनुभावाः—

२१. अनुभावाः शिरोघ्राणं करेणाङ्गाभिमार्जनम्।
आशीर्वादो निदेशश्च लालनं प्रतिपालनम्।
हितोपदेशदानाद्या वत्सले परिकीर्तिताः॥ (४१)

[शिरोघ्राणम्, करेण अङ्गाभिमार्जनम्, आशीर्वादः, निदेशः, लालनं प्रतिपालनम् च, हितोपदेशदानाद्याः अनुभावाः वत्सले परिकीर्त्तिताः॥]

तत्र शिरोघ्राणं, यथा श्रीदशमे (भा०१०/१३/३३)—

२१. तदीक्षणोत्प्रेमरसाप्लुताशया[१४]
जातानुरागा गतमन्यवोऽर्भकान्।
उदूह्य दोर्भिः परिरभ्य मूर्धनि
घ्राणैरवापुः परमां मुदं ते। (४२)

[तदीक्षणोत्प्रेमरसाप्लुताशयाः जातानुरागाः गतमन्यवः ते अर्भकान् उदूह्य दोर्भिः परिरभ्य मूर्धनि घ्राणैः परमां मुदम् अवापुः॥]

यथा वा—

२२. दुग्धेन दिग्धा कुचविच्युतेन
समग्रमाघ्राय[१५] शिरः सपिच्छम्।
करेण गोष्ठेशितुरङ्गनेय-
मङ्गानि पुत्रस्य मुहुर्ममार्ज॥ (४३)

[कुचविच्युतेन दुग्धेन दिग्धा (स्निग्धा) इयं गोष्ठेशितुः अङ्गना पुत्रस्य समग्रं सपिच्छम् शिरः आघ्राय अङ्गानि मुहुः ममार्ज॥]

यथा वा—

२०. *मुखरे! यह देखो! सब दिशाओं में शङ्का भरी दृष्टि से ताकते हुए, लता की ओट में धीमे-धीमे पाँव बढ़ाते हुए यह हरि (कन्हैया) माखन चुराने के लिये स्पष्ट ही इस ओर आ रहा है। तुम जानबूझ कर न जानती हुई जैसी चुपचाप बैठी रहो, चोरी के लिये इधर-उधर घूमती-हुई चञ्चल भौंहों वाले, भयभीत नयनों वाले इस के रमणीय मुख को मैं देखना चाहती हूँ। ।४०।*

अब अनुभाव—

२१. सिर सूँघना, हाथ से अङ्गों की धूल पोंछना, आशीर्वाद देना, आज्ञा या निर्देश देना, लाड़-दुलार करना, रक्षा करना, हितोपदेश देना, समझाना-बुझाना- आदि अनुभाव वत्सल-भक्ति में कहे गये हैं। ।४१।

इनमें से मस्तक सूँघना—

यथा श्रीदशम (भा. १०/१३/३३) में—

२१. *उन बालकों को देखने से उमड़े प्रेमरस से भरपूर अन्तःकरण वाले, उमगते-अनुराग भरे, छूट चुके क्रोध वाले (अनुराग के कारण जिनका रोष शान्त पड़ गया था ऐसे) उन सब (गोप-गोपियों) ने अपने-अपने बालकों को गोद में उठाकर, बाँहों में भरते हुए, सिर सूँघते हुए परम मोद (आनन्द) प्राप्त किया। ।४२।*

यथा वा—

२२. *(उमड़ते स्नेह से) स्तनों से झरते दूध से भीगी व्रजेश (नन्द) की रानी अपने बेटे का समूचा मस्तक मोरपंख सहित बारम्बार सूँघकर उस (बालक) के अङ्ग पोंछने लगी। ।४३।*

२२. चुम्बाश्लेषौ तथाह्वानं नामग्रहणपूर्वकम्।
उपालम्भादयश्चात्र मित्रैः साधारणाः क्रियाः॥ (४४)

[चुम्बाश्लेषौ तथा नामग्रहणपूर्वकम् आह्वानम्, उपालम्भादयः च अत्र मित्रैः साधारणाः क्रियाः॥]

अथ सात्त्विकाः—

२३. नवात्र सात्त्विकाः स्तन्यस्रावः स्तम्भादयश्च ते॥ (४५)

[स्तन्यस्रावः, ते स्तम्भादयः च नव अत्र सात्त्विकाः॥]

तत्र स्तन्यस्रावो, यथा श्रीदशमे (भा०१०/१३/२२)-

२३. तन्मातरो वेणुरव-त्वरोत्थिता
उत्थाप्य[१६] दोर्भिः परिरभ्य निर्भरम्।
स्नेहस्नुतस्तन्यपयः सुधासवं
मत्वा परं ब्रह्म सुतानपाययन्॥ (४६)

[वेणुरवत्वरोत्थिताः तन्मातरः दोर्भिः उत्थाप्य निर्भरं परिरभ्य सुतान् परं ब्रह्म मत्वा स्नेहस्नुतस्तन्यपयः सुधासवम् अपाययन्॥]

यथा वा ललितमाधवे—

२४. निचुलित-गिरिधातु-स्फीतपत्रावलीका-
नखिलसुरभिरेणून् क्षालयद्भिर्यशोदा।
कुचकलसविमुक्तैः स्नेहमाध्वीकमेध्यै-
स्तव नवमभिषेकं दुग्धपूरैः करोति॥ (४७)

[निचुलित-गिरिधातु-स्फीत-पत्रावलीकान् अखिलसुरभिरेणून् क्षालयद्भिः कुचकलसविमुक्तैः स्नेहमाध्वीकमध्यैः दुग्धपूरैः यशोदा तव नवम् अभिषेकं करोति॥]

स्तम्भादयो, यथा—

२५. कथमपि परिरब्धुं न क्षमा स्तब्धगात्री
कलयितुमपि नालं बाष्पपूरप्लुताक्षी।
न च सुतमुपदेष्टुं रुद्धकण्ठी समर्था
दधतमचलमासीद्व्याकुला गोकुलेशा॥ (४८)

[स्तब्धगात्री गोकुलेशा अचलं दधतं सुतं परिरब्धुं कथम् अपि न क्षमा, बाष्पपूरप्लुताक्षी कलयितुं न अलम्, रुद्धकण्ठी च उपदेष्टुं न समर्था व्याकुला आसीत्॥]

२२. चुम्बन, आलिङ्गन, नाम लेकर बुलाना, उलाहना देना, आदि यहाँ मित्रों की साधारण क्रियायें हैं। ।४४।

अब सात्त्विकभाव—

२३. यहाँ स्तब्ध हो जाना आदि पूर्वोक्त (आठ) तथा स्तन्य (दूध)-झरना ऐसे कुल नौ सात्त्विकभाव हैं। ।४५।

इनमें से दूध झरना, यथा श्री दशम में (भा. १०/१३/२२)—

२३. *वेणु की ध्वनि सुनकर (बछड़े चराने गये हुए बालकों को लौटकर निकट आये हुए जानकर) त्वरा से उठ खड़ी हुई उनकी माताओं ने अपने बालकों को बाँहों से उठाकर, गोद में भली-भाँति चिपका कर, (वस्तुतः) परम ब्रह्म श्रीकृष्ण को अपना-अपना बेटा ही मान कर, उमड़े स्नेह से स्वयं स्तनों से झरता हुआ दूध रूपी सुधासव (अमृतरस) पिलाया। ।४६।*

यथा वा ललितमाधव में—

२४. *(हे कृष्ण!) गोवर्धन गिरि के धातु (पत्थरों के रंग) से (सखाओं द्वारा) बनाई गई सुन्दर पत्रावली (चेहरे और भुजाओं आदि पर किया गया चित्राङ्कन) पर छाई हुई गायों की उड़ाई धूल को धोते हुए स्तन-कलशों से छलक कर बाहर आये हुए, स्नेह रूपी माध्वीक (मीठी सुरा) मिले हुए दूध की बाढ़ जैसी फुहारों से यशोदा तुम्हारा नवीन अभिषेक कर रही हैं। ।४७।*

स्तम्भ आदि यथा—

२५. *गोवर्धन-गिरि धारण किये हुए अपने पुत्र को देखकर यशोदा-सम्पूर्ण शरीर स्तब्ध हो जाने के कारण किसी भी प्रकार अँकवार न भर सकी, नेत्रों में अश्रु छा जाने से देख नहीं पा रही थी, कण्ठ रुँध जाने से कुछ कह भी न पा रही थी-इस प्रकार सर्वथा व्याकुल हो रही। ।४८।*

अथ व्यभिचारिणः—

२४. अत्रापस्मारसहिताः[१७] प्रीतोक्ताः व्यभिचारिणः॥ (४९)

[अत्र व्यभिचारिणः अपस्मारसहिताः प्रीतोक्ताः॥]

तत्र हर्षो, यथा श्रीदशमे (भा०१०/१७/१९)-

२६. यशोदापि[१८] महाभागा नष्टलब्धप्रजा सती।
परिष्वज्याङ्कमारोप्य मुमोचाश्रुकलां मुहुः॥ (५०)

[महाभागा यशोदा अपि नष्टलब्धप्रजा सती (सुतम्) अङ्कम् आरोप्य परिष्वज्य मुहुः अश्रुकलां मुमोच॥]

यथा वा विदग्धमाधवे—

२७. जितचन्द्रपरागचन्द्रिका-
नलदेन्दीवर-चन्दनश्रियम्।
परितो मयि शैत्यमाधुरीं
वहति स्पर्शमहोत्सवस्तव॥ (५१)

[तव स्पर्शमहोत्सवः जितचन्द्रपरागचन्द्रिकानलदेन्दीवरचन्दनश्रियम् शैलमाधुरीं मयि परितः वहति॥]

अथ स्थायी—

२५. सम्भ्रमादि-च्युता या स्यादनुकम्प्येऽनुकम्पितुः।
रतिः सैवात्र वात्सल्यं स्थायी भावो निगद्यते॥ (५२)

[सम्भ्रमादिच्युता या अनुकम्पितुः अनुकम्पा स्यात् सा एव रतिः वात्सल्यम् अत्र स्थायीभावः निगद्यते॥]

२६. यशोदादेस्तु वात्सल्यरतिः प्रौढा निसर्गतः।
प्रेमवत् स्नेहवद्भाति कदाचित् किल रागवत्॥ (५३)

[यशोदादेः वात्सल्यरतिः तु निसर्गतः प्रौढा। प्रेमवत् स्नेहवत् कदाचित् किल रागवत् भाति॥]

अब व्यभिचारी भाव—

२४. यहाँ अपस्मारसहित प्रीत-भक्ति में कहे गये सब व्यभिचारी भाव होते हैं। ।४९।

उनमें से हर्ष, यथा श्री दशम में (भा. १०/१७/१९)—

२६. *महाभाग्यशालिनी यशोदा भी अपने खोये हुए बालक को पुनः पाकर उसे गोद में लेकर भली-भाँति अँकवार भरकर, बारम्बार अश्रुधारा बहने लगी।* ।५०।

यथा वा विदग्धमाधव में—

२७. *तुम्हारे स्पर्श का महोत्सव-चन्द्रपराग (कर्पूर) और चन्द्रिका को भी जीतनेवाली, खस-कमल-चन्दन की श्री जैसी शीतलताकी माधुरी-मुझमें सब ओर से ला रहा है।* ।५१।

अब स्थायी भाव—

२५. अनुकम्प्य (अनुकम्पा के विषय, पात्र) पर अनुकम्पा के आश्रय (करने वाले, आलम्बन) की जो सम्भ्रम (गौरव-बोध से उत्पन्न अन्तराय) से रहित रति होती है उसे ही यहां वात्सल्य नामक स्थायी भाव कहा जाता है। ।५२।

२६. यशोदा आदि की वात्सल्यरति निसर्ग से ही प्रौढ़ है, वह कभी प्रेम की भाँति, कभी स्नेह-जैसी और कभी राग-जैसी दिखाई देती है। ।५३।

तत्र वात्सल्यरतिर्यथा श्रीदशमे (भा०१०/६/४३)—

२८. नन्दः स्वपुत्रमादाय प्रोष्यागत उदारधीः।
मूर्ध्न्यवघ्राय परमां मुदं लेभे कुरूद्वह! (५४)

[कुरूद्वह! प्रोष्य आगतः उदारधीः नन्दः स्वपुत्रम् आदाय मूर्ध्नि आघ्राय परमां मुदं लेभे॥]

यथा वा—

२९. विन्यस्त-श्रुति-पालिरद्य मुरलीनिस्वानशुश्रूषया
भूयः प्रस्रववर्षिणी[१९] द्विगुणितोत्कण्ठा प्रदोषोदये।
गेहादङ्गनमङ्गनात् पुनरसौ गेहं विशन्त्याकुला
गोविन्दस्य मुहुर्व्रजेन्द्रगृहिणी पन्थानमालोकते॥ (५५)

[अद्य प्रदोषोदये मुरली-निस्वान-शुश्रूषया विन्यस्तश्रुतिपालिः, भूयः प्रस्रववर्षिणी, द्विगुणितोत्कण्ठा आकुला असौ व्रजेन्द्रगृहिणी गेहात् अङ्गनम् अङ्गनात् पुनः गेहं विशन्ती मुहुः गोविन्दस्य पन्थानम् आलोकते॥]

प्रेमवद्, यथा—

३०. प्रेक्ष्य तत्र मुनिराजमण्डलैः
स्तूयमानमपि मुक्तसम्भ्रमा।
कृष्णमङ्कमभि गोकुलेश्वरी
प्रस्नुता कुरुभुवि[२०] न्यवीविशत्॥ (५६)

[तत्र मुनिराजमण्डलैः स्तूयमानं कृष्णम् प्रेक्ष्य अपि मुक्तसम्भ्रमा गोकुलेश्वरी अङ्कम् अभि प्रस्नुता कुरुभुवि न्यवीविशत्॥]

यथा वा—

३१. देवक्या विवृत-प्रसूचरितयाप्युन्मृज्यमानानने
भूयोभिर्वसुदेवनन्दनतयाप्युद्घुष्यमाणे जनैः।
गोविन्दे मिहिरग्रहोत्सुकतया क्षेत्रं कुरोरागते
प्रेमा वल्लभनाथयोरतितरामुल्लासमेवाययौ॥ (५७)

[विवृतप्रसूचरितया देवक्या उन्मृज्यमानानने अपि, भूयोभिः जनैः वसुदेवनन्दनतया उद्घुष्यमाणे अपि, मिहिरग्रहोत्सुकतया कुरोः क्षेत्रम् आगते गोविन्दे बल्लवनाथयोः प्रेमा अतितराम् उल्लासम् एव आययौ॥]

इनमें वात्सल्यरति यथा श्रीदशम में (भा. १०/६/४३)—

२८. *हे कुरुवंशज (परीक्षित्)! प्रवास से लौटे हुए उदारधी वाले नन्द ने अपने बेटे को गोद में लेकर उसका मस्तक सूँघकर परम मोद का अनुभव किया।* ।५४।

यथा वा—

२९. *आज सन्ध्या हो आने पर (गोचारण से लौटते हुए पुत्र की) मुरली ध्वनि सुन पाने की इच्छा से कान लगाये हुए, आकुल हुई, दुगनी होती जाती उत्कण्ठा वाली, स्नेह से उमड़कर झरते दूधवाली यह व्रजेन्द्र (नन्द) की गृहिणी (यशोदा) बारम्बार आँगन से घर के भीतर और घर में से आँगन में आती-जाती हुई गोविन्द की राह देख रही है।* ।५५।

प्रेम से युक्त यथा—

३०. *वहाँ, कुरुक्षेत्र में मुनिवरों के समूहों द्वारा स्तुति किये जाते हुए श्रीकृष्ण को देखकर भी सम्भ्रम से मुक्त, उमड़ते दूध से भीगे अङ्कवाली गोकुलेश्वरी वहीं धरती पर बैठ गयी।* ।५६।

यथा वा—

३१. *सूर्यग्रहण के निमित्त से जब गोविन्द कुरुक्षेत्र आये हुए थे, तब प्रकट मातृभाव का आचरण करती हुई देवकी द्वारा मुख पोंछना आदि देखने पर भी, अनेकों जनसमूहों द्वारा बारम्बार वसुदेव-नन्दन या वासुदेव नाम से पुकारे जाने पर भी, वहाँ आये हुए गोपराज नन्द एवं यशोदा का गोविन्द के प्रति (वात्सल्य) प्रेम अधिक-अधिक उल्लास को ही प्राप्त हुआ।* ।५७।

स्नेहवद्, यथा—

३२. पीयूषद्युतिभिः स्तनाद्रिपतितैः क्षीरोत्करैर्जाह्नवी
कालिन्दी च विलोचनाब्जजनितै[21]-र्जाताञ्जनश्यामलैः।
आरान्मध्यमवेदिमापतितयोः क्लिन्ना तयोः सङ्गमे
वृत्तासि व्रजराज्ञि! तत्सुतमुखप्रेक्षां स्फुटं वाञ्छसि॥ (५८)

[वृत्तराज्ञि! स्तनाद्रिपतितैः पीयूषद्युतिभिः क्षीरोत्करैः जाह्नवी, विलोचनाब्जजनितैः अञ्जनश्यामलैः (अश्रुभिः) कालिन्दी च जाता। आरात् मध्यमवेदिम् आपतितयोः तयोः सङ्गमे क्लिन्ना वृत्ता असि, तत् (तस्मात्) स्फुटं सुतमुखप्रेक्षां वाञ्छसि॥]

रागवद्, यथा—

३३. तुषारति तुषानलोऽप्युपरि तस्य बद्धस्थिति-
र्भवन्तमवलोकते यदि मुकुन्द! गोष्ठेश्वरी।
सुधाम्बुधिरपि स्फुटं विकटकालकूटत्यलं
स्थिता यदि न तत्र ते वदनपद्ममुद्वीक्ष्यते॥ (५९)

[मुकुन्द! तुषानलः अपि तुषारति, यदि तस्य उपरि बद्धस्थितिः गोष्ठेश्वरी भवन्तम् अवलोकते। सुधाम्बुधिः अपि स्फुटम् अलं कालकूटति यदि तत्र स्थिता (सा) ते वदनपद्मं न उद्वीक्ष्यते॥]

अथ अयोगे उत्कण्ठितम्—

३४. वत्सस्य हन्त शरदिन्दुविनिन्दि-वक्त्रं
सम्पादयिष्यति कदा नयनोत्सवं नः?
इत्यच्युते विहरति व्रजवाटिकाया-
मुर्वी त्वरा जयति देवकनन्दिनीनाम्॥ (६०)

[हन्त! वत्सस्य शरदिन्दुविनिन्दिवक्त्रं कदा नः नयनोत्सवं सम्पादयिष्यति—इति व्रजवाटिकायां विहरति अच्युते देवकनन्दिनीनाम् उर्वी त्वरा जयति॥]

यथा वा—

३५. भ्रातस्तनयं भ्रातुर्मम सन्दिश गान्दिनीपुत्र!
भ्रातृव्येषु वसन्ती दिदृक्षते त्वां हरे! कुन्ती॥ (६१)

[भ्रातः गान्दिनीपुत्र! मम भ्रातुः तनयं सन्दिश-"हरे! भातृव्येषु वसन्ती कुन्ती त्वां दिदृक्षते॥"]

स्नेह से युक्त यथा—

३२. *हे व्रजरानी (यशोदा)! तुम्हारे स्तन-पर्वत से गिरते हुए पीयूष जैसी (श्वेत) द्युतिवाले क्षीर-निर्झरों से गङ्गा, नयन-कमलों से उत्पन्न अञ्जन से श्यामल हुए अश्रुओं से यमुना उत्पन्न हो गयी है; इन दोनों के साथ-साथ मध्यमवेदी (वक्षःस्थल) पर आ गिरने से हुए सङ्गम से तुम भीग गई हो, इससे स्पष्ट प्रतीत हो रहा है बेटे का मुख देखना चाह रही हो।* ।५८।

राग से युक्त यथा—

३३. *मुकुन्द! तुषानल (जलते हुए भूसे के ढेर) के ऊपर बैठी हुई भी गोकुलेश्वरी (यशोदा) यदि तुम्हें देख लेती है तो वह भड़का हुआ अग्निपुञ्ज भी उसे तुषार (हिम) जैसा शीतल प्रतीत होता है, और सुधासागर भी उसके लिये प्रकट कालकूट बन जाता है यदि उसमें बैठी हुई वह तुम्हारा मुखकमल नहीं देख पाती।* ।५९।

अब अयोग में उत्कण्ठा, यथा—

३४. *अच्युत जब व्रजवाटिका में विहार कर रहे थे तब देवक की पुत्रियों (देवकी आदि) को अतीव त्वरा (शीघ्रता के लिये उत्कण्ठा) हो रही थी कि हाय! भला कब बेटे का शरच्चन्द्र को भी लजाने वाला मुख हमारे नयनों का उत्सव सम्पन्न करेगा? उस त्वरा की जय हो।* ।६०।

यथा वा—

३५. *भाई गान्दिनीपुत्र (अक्रूर)! मेरे भाई के पुत्र को मेरा यह सन्देश देना "हे हरि! भतीजों या शत्रुओं (अहितैषी परिवार) में रहती हुई कुन्ती (तुम्हारी बुआ) तुम्हारा दर्शन चाहती है।"* ।६१।

वियोगो, यथा श्रीदशमे (भा०१०/४६/२८)—

३६. यशोदा वर्ण्यमानानि पुत्रस्य[22] चरितानि च।
श्रृण्वन्त्यश्रूण्यवास्राक्षीत् स्नेहस्नुतपयोधरा॥ (६२)

[स्नेहस्नुतपयोधरा यशोदा च पुत्रस्य वर्ण्यमानानि चरितानि श्रृण्वन्ती अश्रूणि अवास्राक्षीत्॥]

यथा वा—

३७. याते राजपुरं हरौ मुखतटी-व्याकीर्ण-धूम्रालका
पश्य स्रस्ततनुः कठोरलुठनैर्देहे व्रणं कुर्वती।
क्षीणा गोष्ठमहीमहेन्द्रमहिषी हा पुत्र हा पुत्रेत्यसौ
क्रोशन्ती करयोर्युगेन कुरुते कष्टादुरस्ताडनम्॥ (६३)

[पश्य! हरौ राजपुरं याते मुखतटी-व्याकीर्ण-धूम्रालका, स्रस्ततनुः, कठोर लुठनैः देहे व्रणं कुर्वती, क्षीणा गोष्ठमहीमहेन्द्रमहिषी "हा पुत्र! पुत्र!" इति क्रोशन्ती करयोः युगेन कष्टात् उरस्ताडनं कुरुते॥]

२७. बहूनामपि सद्भावे वियोगेऽत्र तु केचन।
चिन्ता-विषाद-निर्वेद-जाड्य-दैन्यानि चापलम्।
उन्माद-मोहावित्याद्या अत्युद्रेकं व्रजन्त्यमी॥ (६४)

[बहूनाम् अपि सद्भावे, अत्र, वियोगे तु केचन चिन्ता-विषाद-निर्वेद-जाड्य-दैन्यानि चापलम् उन्मादमोहौ इत्याद्या अमी अत्युद्रेकं व्रजन्ति॥]

तत्र चिन्ता—

३८. मन्दस्पन्दमभूत् क्लमैरलघुभिः सन्दानितं मानसं
द्वन्द्वं लोचनयोश्चिरादविचल-व्याभुग्नतारं स्थितम्[23]।
निश्वासैः स्रवदेव पाकमयते स्तन्यञ्च तप्तैरिदं
नूनं वल्लभराज्ञि! पुत्रविरहोद्घूर्णाभिराक्रम्यसे॥ (६५)

[बल्लवराज्ञि! अलघुभिः क्लमैः मानसं सन्दानितं मन्दस्पन्दं (च) अभूत्, लोचनयोः द्वन्द्वं चिरात् अविरलव्याभुग्नतारं स्थितम्, तप्तैः निःश्वासैः इदं स्तन्यं च स्रवत एव पाकम् अवते, नूनं पुत्रविरहोद्घूर्णाभिः आक्रम्यसे॥]

वियोग में यथा श्रीदशम में (भा. १०/४६/२८)—

३६. *स्नेह से उमड़ा दूध झरने से भीगे वक्षःस्थल वाली यशोदा पुत्र के चरितों का वर्णन सुनती हुई आँसू बहाने लगी।*
।६२।

यथा वा—

३७. *हरि के राजपुर (मथुरा) चले जाने पर देखो यह गोकुलव्रज के महेन्द्र नन्दराय की रानी यशोदा 'हा पुत्र! हा पुत्र!' उच्च स्वर से पुकारती हुई, बिखरी अलकों और धूल से धूमिल मुख वाली, बेसुध होकर कठोर भूमि पर लोटने-छटपटाने से देह में घाव करती हुई, दुःख से दुर्बल क्षीण पड़ी हुई, असह्य कष्ट के कारण दोनों हाथों से वक्षःस्थल को पीट रही है।*
।६३।

२७. बहुत भावों के रहने पर भी यहाँ वियोग-दशा में कोई-कोई चिन्ता-विषाद-निर्वेद-जड़ता-दैत्य-चपलता-उन्माद और मोह इत्यादि अतिशय उद्रेक प्राप्त करते हैं। ।६४।

इनमें चिन्ता—

३८. *हे गोपेश्वरि! अतिशय खेद से तुम्हारा चित्त बँध गया है और शिथिल पड़ गया है, दोनों नेत्र लम्बे समय से चढ़े हुए स्थिर ताराओं वाले हो रहे हैं, तपे हुए निःश्वासों के कारण तुम्हारे स्तनों से झरते ही दूध उबल-सा जाता है अवश्य ही (गोचारण के लिये वन में गये) पुत्र के विरह से उत्पन्न चिन्ता-जन्य चक्करों से तुम आक्रान्त हो।* *।६५।*

विषादः—

३९. वदनकमलं पुत्रस्याहं निमीलति शैशवे
नवतरुणिमारम्भोन्मृष्टं न रम्यमालोकयम्।
अभिनव-वधूयुक्तञ्चामुं न हर्म्यमावेशयं
शिरसि कुलिशं हन्त क्षिप्तं श्वफल्कसुतेन मे॥ (६६)

[पुत्रस्य निमीलति शैशवे अहं नवतरुणिमारम्भोन्मृष्टं वदनकमलं रम्यं न आलोकयम् अभिनववधूयुक्तं च अमुं हर्म्यं न आवेशयम्, हन्त मे शिरसि श्वफल्कसुतेन कुलिशं क्षिप्तम्॥]

निर्वेदः—

४०. धिगस्तु हतजीवितं निरवधिश्रियोऽप्यद्य मे
यया[२४] न हि हरेः शिरः स्नुतकुचाग्रमाघ्रायते।
सदा नवसुधादुहामपि गवां परार्धञ्च धिक्
स लुञ्चति न चञ्चलः सुरभिगन्धि यासां दधि॥ (६७)

[अद्य निरवधिश्रियः अपि मे हतजीवितं धिक् अस्तु, यया स्नुतकुचाग्रं हरेः शिरः न आघ्रायते, सदा नवसुधादुहां गवां परार्धम् अपि धिक्, यासां सुरभिगन्धि दधि सः चपलः न लुञ्चति॥]

जाड्यम्—

४१. यः पुण्डरीकेक्षण! तिष्ठतस्ते
गोष्ठे कराम्भोरुहमण्डनोऽभूत्।
तं प्रेक्ष्य दण्डस्तिमितेन्द्रियाद्य
दण्डाकृतिस्ते जननी बभूव॥ (६८)

[पुण्डरीकेक्षण! गोष्ठे ते तिष्ठतः यः दण्डः कराम्भोरुहमण्डनः अभूत्, तं प्रेक्ष्य अद्य ते जननी स्तिमितेन्द्रिया दण्डाकृतिः बभूव॥]

दैन्यम्—

४२. याचते बत विधातरुदस्रा
त्वां रदैस्तृणमुदस्य यशोदा।
गोचरे सकृदपि क्षणमद्य
मत्सरं त्यज ममानय वत्सम्॥ (६९)

[विधातः! रदैः तृणम् उदस्य यशोदा बत उदस्रं त्वां याचते-''मत्सरं त्यज! मम वत्सं सकृत् अपि क्षणम् अद्य गोचरे आनय॥'']

विषाद—

३९. *बाल्यावस्था बीत जाने पर नवयौवन के आरम्भ से निखरा हुआ अपने बेटे का सुन्दर मुखकमल मैंने नहीं देखा, नई दुल्हन के साथ उसका कोहबर या अन्तःपुर में प्रवेश भी नहीं करा पाई, हाय श्वफल्क के पुत्र इस अक्रूर ने मेरे मस्तक पर वज्र ही गिरा दिया। ।६६।*

निर्वेद—

४०. *अपार श्री-वैभव से सम्पन्न भी मेरे इस निगोड़े जीवन को आज धिक्कार है, जोकि मैं स्नेह से झरते दूध सहित मेरे बालक हरि का मस्तक नहीं सूँघ पा रही हूँ। सदा नवीन अमृत दुहाने वाली इन कोटि-कोटि गायों के परार्ध-समूह को भी धिक्कार है जिनका सुगन्धित दही अब वह चञ्चल छीन-झपट कर खाता नहीं। ।६७।*

जड़ता—

४१. *हे कमलनयन! व्रज में तुम्हारे रहते जो डण्डा या लकुटी हाथों को सुशोभित करता था, उसे देखकर आज तुम्हारी माँ स्तब्ध इन्द्रियों वाली पथराई देहवाली स्वयं डण्डे के आकार वाली हो गयी। ।६८।*

दैन्य—

४२. *हे विधाता! दाँतों में तिनका लेकर यशोदा आँसुओं से डबडबाई आँखों से तुम से याचना कर रही है-"मत्सर छोड़ो! आज तो मेरे बेटे को, क्षण भर के लिये ही सही, दिखा दो!" ।६९।*

चापलम्—

४३. किमिव कुरुते हर्म्ये तिष्ठन्नयं निरपत्रपो
व्रजपतिरिति ब्रूते मुग्धोऽयमत्र मुदा जनः।
अहह तनयं प्राणेभ्योऽपि प्रियं परिहृत्य तं
कठिनहृदयो[25] गोष्ठे स्वैरी प्रविश्य सुखीयति॥ (७०)

["अयं निरपत्रपः व्रजपतिः हर्म्ये तिष्ठन् किम् इव कुरुते!"–इति अयं मुग्धः जनः अत्र मुदा ब्रूते। अहह! प्राणेभ्यः अपि प्रियं तनयं परिहृत्य कठिनहृदयः स्वैरी गोष्ठे प्रविश्य सुखीयति॥]

उन्मादः—

४४. क्व मे पुत्रो नीपाः! कथयत कुरङ्गाः! किमिह वः
स बभ्रामाभ्यर्णे भणत तदुदन्तं मधुकराः!
इति भ्रामं भ्रामं भ्रमभरविदूना यदुपते!
भवन्तं पृच्छन्ती दिशि दिशि यशोदा विचरति॥ (७१)

[हे नीपाः! कथयत क्व मे पुत्रः? कुरङ्गाः! किं सः इह वः (भवताम्) अभ्यर्णे बभ्राम? मधुकराः! तद्-(तस्य) उदन्तं भणत। यदुपते! भ्रमभरविदूना यशोदा इति भ्रामं भ्रामं भवन्तं पृच्छन्ती दिशि-दिशि विचरति॥

मोहः—

४५. कुटुम्बिनि! मनस्तटे विधुरतां विधत्से कथं
प्रसारय दृशं मनाक् तव सुतः पुरो वर्तते।
इदं गृहिणि! मे गृहं न कुरु शून्यमित्याकुलः
स शोचति तव प्रसूं यदुकुलेन्द्र! नन्दः पिता॥ (७२)

[कुटुम्बिनि! मनस्तटे विधुरतां कथं विधत्से? दृशं मनाक् प्रसारय, तव सुतः पुरः वर्तते। गृहिणि! इदं मे गृहं शून्यं न कुरु, यदुकुलेन्द्र! इति सः तव पिता नन्दः आकुलं शोचति॥]

अथ योगे सिद्धिः—

४६. विलोक्य रङ्गस्थललब्धसङ्गमं
विलोचनाभीष्टविलोकनं हरिम्।
स्तन्यैरसिञ्चन्नवकञ्चुकाञ्चलं[26]
देव्यः क्षणादानकदुन्दुभिप्रियाः॥ (७३)

[रङ्गस्थललब्धसङ्गमं विलोचनाभीष्टविलोकनं हरिं विलोक्य आनकदुन्दुभिप्रियाः देव्यः नवकञ्चुकाञ्चलं क्षणात् स्तन्यैः असिञ्चन्॥]

चपलता—

४३. *''अरे! यह निर्लज्ज व्रजपति (नन्द) घर के भीतर ही बैठा हुआ कर क्या रहा है?''-ऐसे यहाँ यह मूढ़ व्यक्ति चाहे जैसा बोलता है। हाय! प्राणों से भी प्यारे बेटे को (मथुरा) छोड़ आकर यह कठोर हृदयवाला स्वैरी (स्वच्छन्द आचरण करने वाला) घर में घुसा हुआ सुख मना रहा है। ।७०।*

उन्माद—

४४. *''हे कदम्बतरुओ! बताओ तो मेरा पुत्र कहाँ है? अरे हरिणो! क्या वह यहाँ (वन-प्राङ्गण में) तुम्हारे साथ घूम रहा था? मधुकरो! उसका वृत्तान्त कहो न!'' इस तरह श्रम की बाढ़ से दुःखित, क्षीण हुई यशोदा हे यदुपति! दिशा-दिशा में घूमकर आपको पूछती डोल रही है। ।७१।*

मोह—

४५. *''अयि कुटुम्बिनि! मन में अकेलापन या विरह क्यों लिये हुए हो? जरा आँख तो खोलो! दृष्टि पसारो! देखो तुम्हारा बेटा सामने ही तो है? गृहस्वामिनि! मेरे इस घर को खाली न करो (घर छोड़कर इधर-उधर भटको नहीं!)''-हे यदुकुलेन्द्र! इस प्रकार तुम्हारे पिता नन्द आकुल होकर सोचते-कहते रहते हैं। ।७२।*

अब योग में सिद्धि—

४६. *रङ्गस्थल में पहुँचे हुए, नयनों को अभीष्ट अभिराम दर्शन वाले हरि को देखकर वसुदेव की प्रियायें (देवकी आदि) तत्क्षण उमड़ आये दूध से अपने नये कञ्चुक एवं आँचल को भिगोने लगीं। ।७३।*

तुष्टिर्यथा प्रथमे (भा०१/११/३०)—

४७. ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः।
हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः॥ (७४)

[स्नेहस्नुतपयोधराः हर्षविह्वलितात्मानः ताः पुत्रम् अङ्कम् आरोप्य नेत्रजैः जलैः सिषिचुः॥]

यथा वा ललितमाधवे—

४८. नयनयोः स्तनयोरपि युग्मतः
परिपतद्भिरसौ पयसाञ्झरैः।
अहह बल्लवराजगृहेश्वरी[२७]
स्वतनयं प्रणयादभिषिञ्चति॥ (७५)

[अहह! नयनयोः स्तनयोः अपि युग्मतः परिपतद्भिः पयसां झरैः असौ बल्लवराजगृहेश्वरी स्वतनयं प्रणयात् अभिषिञ्चति॥]

स्थितिर्यथा विदग्धमाधवे—

४९. अहह कमलगन्धेरत्र सौन्दर्यवृन्दे
विनिहितनयनेयं त्वन्मुखेन्दोर्मुकुन्द!
कुचकलसमुखाभ्यामम्बरक्नोपमम्बा
तव मुहुरतिहर्षाद्वर्षति क्षीरधाराम्॥ (७६)

[अहह! मुकुन्द! कमलगन्धेः त्वन्मुखेन्दोः सौन्दर्यवृन्दे विनिहितनयना इयं तव अम्बा कुचकलशमुखाभ्याम् अति हर्षात् अम्बरक्नोपम् मुहुः क्षीरधारां वर्षति॥]

२८. स्वीकुर्वते रसमिमं नाट्यज्ञा अपि केचन। (७७)

[केचन नाट्यज्ञाः अपि इमं रसं स्वीकुर्वते॥]

तथाहुः—

५०. "स्फुटं चमत्कारितया वत्सलञ्च रसं विदुः।
स्थायी वत्सलतास्येह पुत्राद्यालम्बनं मतम्"॥ (७८)

[स्फुटं चमत्कारितया वत्सलं च रसं विदुः। इह अस्य स्थायी वत्सलता, पुत्रादि आलम्बनं मतम्॥]

तुष्टि, यथा प्रथम में (भा. १/११/३०)—

४७. *स्नेह से जिनके स्तनों से दूध झरने लगा था, और जो हर्ष से विह्वल हो रही थीं ऐसी वे (वासुदेव-पत्नियाँ होने से मातायें) पुत्र (श्रीकृष्ण) को गोद में लेकर नयनों के जलों (आँसुओं) से सींचने लगीं।* ।७४।

यथा वा ललितमाधव में—

४८. *हाय! यह गोपराज नन्द की गृहिणी (यशोदा) आँखों से आँसू और स्तनों से दूध एक साथ बहाती हुई अपने बेटे को (प्रगाढ़) स्नेह से मानो नहला रही है—अभिषेक कर रही है।* ।७५।

स्थिति यथा विदग्धमाधव में—

४९. *अहह! (हाय) हे मुकुन्द! कमल जैसी सुगन्ध वाले तुम्हारे मुखचन्द्र के सौन्दर्य-समूह पर टिके हुए नयनों वाली यह तुम्हारी माँ (यशोदा) अत्यन्त हर्ष (के वेग) से अपने वक्षःस्थल से मानो आकाश को ढकते हुए कुच-कलशों के मुखों से बारम्बार दूध की धारा बरसा रही है।* ।७६।

२८. कुछ नाट्य के विशेषज्ञ भी इस रस को स्वीकार करते हैं। ।७७।

ऐसा कहा भी है—

५०. *प्रकट रूप से चमत्कारी होने के कारण वत्सल को भी रस-रूप जाना गया है। यहाँ इसका स्थायीभाव है वत्सलता, और आलम्बन हैं पुत्र आदि।* ।७८।

किञ्च—

२९. अप्रतीतौ हरिरतेः प्रीतस्य स्यादपुष्टता।
प्रेयसस्तु तिरोभावो वत्सलस्यास्य न क्षतिः॥ (७९)

[हरिरतेः अप्रतीतौ प्रीतस्य अपुष्टता स्यात्, प्रेयसः तु तिरोभावः, अस्य वत्सलस्य न क्षतिः॥]

३०. एषा रसत्रयी प्रोक्ता प्रीतादिः परमाद्भुता।
तत्र केषुचिदप्यस्याः सङ्कुलत्वमुदीर्यते[२८]॥ (८०)

[एषा प्रीतादिः रसत्रयी परमाद्भुताः तत्र केषुचित् अस्याः सङ्कुलत्वम् अपि उदीर्यते॥]

३१. सङ्कर्षणस्य सख्यन्तु प्रीतिवात्सल्यसङ्गतम्[२९]।
युधिष्ठिरस्य वात्सल्यं प्रीत्या सख्येन चान्वितम्॥ (८१)

[सङ्कर्षणस्य सख्यं तु प्रीतिवात्सल्यसङ्गतम्। युधिष्ठिरस्य वात्सल्यं सख्येन प्रीत्या च अन्वितम्॥]

३२. आहुकप्रभृतीनान्तु प्रीतिर्वात्सल्यमिश्रिता।
जरदाभीरिकादीनां वात्सल्यं सख्यमिश्रितम्॥ (८२)

[आहुकप्रभृतीनां प्रीतिः तु वात्सल्यमिश्रिता। जरदाभीरिकादीनां वात्सल्यं सख्यमिश्रितम्॥]

३३. माद्रेय[३०]-नारदादीनां सख्यं प्रीत्या करम्बितम्।
रुद्रताक्ष्योद्धवादीनां प्रीतिः सख्येन मिश्रिता॥ (८३)

[माद्रेयनारदादीनां सख्यं प्रीत्या करम्बितम्। रुद्रताक्ष्य-उद्धवादीनां प्रीतिः सख्येन मिश्रिता॥]

३४. अनिरुद्धादि-नप्तृणामेवं केचिद् बभाषिरे।
एवं केषुचिदन्येषु विज्ञेयं भावमिश्रणम्॥ (८४)

[केचित् अनिरुद्धादि-नप्तृणां (प्रीतिः) एवं बभाषिरे। केषुचित् अन्येषु (अपि) एवं भावमिश्रणं विज्ञेयम्॥]

॥ इति श्रीभक्तिरसामृतसिन्धौ पश्चिमविभागे
मुख्य-भक्तिरसपञ्चक-निरूपणे वत्सलभक्तिरस-लहरी चतुर्थी॥

और भी—

२९. हरि-रति की प्रतीति न हो तो प्रीति की पुष्टता नहीं होगी, प्रेयस् तो तिरोहित ही हो जायेगा, (किन्तु) इस वत्सल की क्षति नहीं होगी। ।७९।

३०. ये प्रीत आदि तीनों रस परम अद्भुत हैं; उनमें कहीं-कहीं इस रसत्रयी की सङ्कुलता (एकसाथ मिले-जुले की स्थिति) भी कही गयी है। ।८०।

३१. सङ्कर्षण (बलराम) का सख्य प्रीति तथा वात्सल्य से सङ्गत (मिला हुआ) है, और युधिष्ठिर का वात्सल्य प्रीति एवं सख्य से युक्त है। ।८१।

३२. आहुक (उग्रसेन) आदि की प्रीति वात्सल्य से मिश्रित है और वृद्धा गोपियों (मुखरा) आदि का वात्सल्य सख्य से मिश्रित है। ।८२।

३३. माद्री के पुत्रों (नकुल-सहदेव) तथा नारद आदि का सख्य प्रीति (दास्य) से मिला-जुला है। रुद्र, गरुड, उद्धव आदि की प्रीति सख्य से मिश्रित है। ।८३।

३४. अनिरुद्ध आदि पौत्रों का भाव भी कुछ लोगों ने ऐसा ही कहा है। इसी प्रकार कुछ अन्यों में भी भावमिश्रण जानना चाहिये। ।८४।

॥ श्रीभक्तिरसामृतसिन्धु के पश्चिमविभाग में मुख्य पाँच भक्तिरसों के निरूपण में चौथी वत्सलभक्तिरस-लहरी समाप्त हुई॥

मधुरभक्तिरसाख्या पञ्चमलहरी

१. आत्मोचितैर्विभावाद्यैः पुष्टिं नीता सतां हृदि।
मधुराख्यो भवेद्भक्तिरसोऽसौ मधुरा रतिः॥ (१)

[आत्मोचितैः विभावाद्यैः सतां हृदि पुष्टिं नीता असौ मधुरा रतिः मधुराख्यः भक्तिरसः भवेत्॥]

२. निवृत्तानुपयोगित्वाद्दुरूहत्वादयं रसः।
रहस्यत्वाच्च संक्षिप्य विततात्गोऽपि लिख्यते॥ (२)

[निवृत्तानुपयोगित्वात्, दुरूहत्वात् रहस्यत्वात् च अयं रसः विततात्गः अपि संक्षिप्य लिख्यते॥]

तत्र आलम्बनाः—

३. अस्मिन्नालम्बनः कृष्णः प्रियास्तस्य च सुभ्रुवः। (३)

[अस्मिन् कृष्णः आलम्बनः। तस्य सुभ्रुवः प्रियाः च॥]

तत्र कृष्णः—

४. असमानोर्ध्व-सौन्दर्य-लीला-वैदग्ध्यसम्पदाम्।
आश्रयत्वेन मधुरे हरिरालम्बनो मतः॥ (४)

[असमानोर्ध्व-सौन्दर्य-लीला-वैदग्ध्यसम्पदाम् आश्रयत्वेन हरिः मधुरे आलम्बनः मतः॥]

यथा श्रीगीतगोविन्दे—

१. विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणी-श्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि! मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥(५)

[सखि! विश्वेषाम् अनुरञ्जनेन आनन्दं जनयन्, इन्दीवरश्रेणीश्यामलकोमलैः अङ्गैः अनङ्गोत्सवम् उपनयन्, व्रजसुन्दरीभिः अभितः स्वच्छन्दं प्रत्यङ्गम् आलिङ्गितः, मूर्त्तिमान् शृङ्गारः इव मुग्धो हरिः मधौ क्रीडति॥]

पञ्चमलहरी-मधुरभक्तिरस

१. अपने अनुरूप विभाव आदि के द्वारा सज्जनों के हृदय में पुष्ट करायी गयी यह मधुरा रति ही मधुर-नामक भक्तिरस कहलाती है। ।१।

२. निवृत्त के लिये अनुपयोगी होने के कारण, दुरूह होने के कारण और रहस्यमय होने के कारण यह रस विस्तीर्ण अङ्गों वाला होने पर भी संक्षेप से लिखा (कहा) ज़ा रहा है। ।२।

इसमें आलम्बन हैं—

३. इस मधुरभक्तिरस के आलम्बन श्रीकृष्ण एवं उनकी सुन्दर भौंहों वाली सुन्दरी प्रियायें हैं। ।३।

उसमें श्रीकृष्ण—

४. असमान एवं अनूर्ध्व (जिसके कोई समान 'नहीं न कोई जिससे बढ़कर है ऐसे—) सौन्दर्य, लीला, विदग्धता आदि सम्पदाओं का आश्रय होने के नाते श्रीहरि स्वयं मधुर रस के आलम्बन हैं। ।४।

यथा श्रीगीतगोविन्द में—

१. *सम्पूर्ण विश्वों का, अथवा सभी का अनुरञ्जन करने से सभी में आनन्द का उद्भव कराते हुए, नीलकमलों की पंक्तियों के सदृश श्यामल एवं सुकोमल अङ्गों द्वारा (दर्शकों में) अनङ्ग (कामदेव) का उत्सव उपजाते हुए, व्रज की सुन्दरियों (गोपाङ्गनाओं) द्वारा चारों ओर से प्रत्येक अङ्ग में स्वच्छन्द (किसी भी अवरोधक के बिना) आलिङ्गित हरि (श्रीकृष्ण) मधुवन में, मधुमास (वसन्त) में मुग्ध हुए मूर्तिमान् शृङ्गार की भाँति क्रीडा कर रहे हैं! अर्थात् मानो वसन्त ऋतु में मुग्ध हुआ स्वयं शृङ्गार खेल रहा हो ऐसे ये श्री श्यामसुन्दर व्रजसुन्दरियों के मध्य आनन्द-क्रीड़ा कर रहे हैं। ।५।*

अथ तस्य प्रेयस्यः—

२. नव-नव-वरमाधुरीधुरीणाः
प्रणय-तरङ्गकरम्बितान्तरङ्गाः।
निजरमणतया हरिं भजन्तीः
प्रणमत ताः परमाद्भुताः किशोरीः॥ (६)

[ताः नव-नव-वरमाधुरीधुरीणाः प्रणयतरङ्गकरम्बितान्तरङ्गाः हरिं निजरमणतया भजन्तीः परमाद्‌भुताः किशोरीः प्रणमत॥]

५. प्रेयसीषु हरेरासु प्रवरा वार्षभानवी॥ (७)

[आसु हरेः प्रेयसीषु वार्षभानवी प्रवरा॥]

अस्या रूपम्—

३. मदचकितचकोरी[1]-चारुताचोरदृष्टि-
र्वदनदमितराकारोहिणीकान्तकीर्तिः।
अविकलकलधौतोद्धूतिधौरेयकश्री-
र्मधुरिममधुपात्री राजते पश्य राधा॥ (८)

[पश्य! मदचकितचकोरी-चारुताचोरदृष्टिः वदनदमितराकारोहिणीकान्तकीर्तिः, अविकलकलधौतोद्‌धूतिधौरेयकश्रीः मधुरिममधुपात्री राधा राजते॥]

अस्या रतिः—

४. नर्मोक्तौ मम निर्मितोरुपरमानन्दोत्सवायामपि
श्रोत्रस्यान्तततटीमपि स्फुटमनाधाय स्थितोद्यन्मुखी।
राधा लाघवमप्यनादरगिरां भङ्गीभिरातन्वती
मैत्रीगौरवतोऽप्यसौ शतगुणां मत्प्रीतिमेवादधे॥ (९)

[मम नर्मोक्तौ निर्मितोरुपरमानन्दोत्सवायाम् अपि, श्रोत्रस्य अन्तरतटीम् अनाधाय स्फुटम् उद्यन्मुखी, स्थिता अपि अनादरगिरां लाघवं भङ्गीभिः आतन्वती अपि असौ राधा मैत्रीगौरवतः शतगुणां मत्प्रीतिम् एव आदधे॥]

उनकी प्रेयसियाँ—

२. *नवीन-नवीन श्रेष्ठ माधुरी में धुरीण (प्रवीण), प्रणयतरङ्गों से मिश्रित अन्तरङ्गवाली, अपने रमण-भाव से श्रीहरि को भजती (सेवा करती) हुई इन परम अद्भुत/अद्‌भुत/किशोरियों को प्रणाम करो। ।६।*

५. श्रीहरि की प्रेयसियों में वृषभानुनन्दिनी श्रीराधा प्रमुख हैं। ।७।

उनका रूप—

३. *मद से चकित चञ्चल चकोरी की चारुता को चुराने वाली दृष्टि है, पूर्णिमा के चन्द्र की कीर्त्ति को भी दमित करने वाला मुख है, शुद्ध खरे सुवर्ण की उत्तम ख्याति से भी उत्तम तनुकान्ति की शोभा है—ऐसी मधुरिमा रूपी मधु से भरे पात्र जैसी श्रीराधा विराजमान हैं—देखो!! ।८।*

श्रीराधा की रति—

४. *मेरे द्वारा नर्म (शृङ्गारगर्भित)-वचन कहे जाने पर हृदय में महान् परमानन्द का उत्सव निर्मित होने पर कानों तक फैलती हुई मुस्कानवाली होकर भी उसे प्रकट न करके (प्रणयभरे गर्व से) मुख ऊँचा उठाये भङ्गिमाओं से अनादरवृत्ति का लाघव व्यक्त करती हुई भी यह राधा मैत्री के गौरव से भी सौ गुनी मेरी प्रीति का ही आधान कर रही है। ।९।*

तत्र[2] कृष्णरतिर्यथा श्रीगीतगोविन्दे—

५. कंसारिरपि संसारवासनाबद्धशृङ्खलाम्।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः॥ (१०)

[कंसारिः अपि संसारवासनाबद्धशृङ्खलां राधां हृदये निधाय व्रजसुन्दरीः तत्याज॥]

अथ उद्दीपनाः—

६. उद्दीपना इह प्रोक्ता मुरलीनिस्वनादयः। (११)

[मुरलीनिस्वनादयः इह उद्दीपनाः प्रोक्ताः॥]

यथा पद्यावल्याम्—

६. गुरुजनगञ्जनमयशो
गृहपतिचरितञ्च[3] दारुणं किमपि।
विस्मारयति समस्तं
शिव शिव मुरली मुराराते:॥ (१२)

[शिव-शिव! मुराराते: मुरली गुरुजनगञ्जनम्, अयशः, किम् अपि दारुणं गृहपतिचरितं च समस्तं विस्मारयति॥]

अथ अनुभावाः—

७. अनुभावास्तु कथिता दृगन्तेक्षा-स्मितादयः। (१३)

[दृगन्तेक्षा-स्मितादयः तु अनुभावाः प्रोक्ताः॥]

यथा ललितमाधवे—

७. कृष्णापाङ्गतरङ्गितद्युमणिज़ासम्भेदवेणी[4]-कृते
राधायाः स्मितचन्द्रिकासुरधुनीपूरे निपीयामृतम्।
अन्तस्तोषतुषारसंप्लवलवव्यालीढतापोद्गमाः[5]
क्रान्त्वा सप्त जगन्ति सम्प्रति वयं सर्वोर्ध्वमध्यास्महे॥
(१४)

[कृष्णापाङ्गतरङ्गित-द्युमणिजा-सम्भेदवेणीकृते राधायाः स्मितचन्द्रिकासुरधुनीपूरे अमृतं निपीय अंम्भस्तोय-तुषारसंप्लव-व्यालीढतापोद्गमाः वयं सप्त जगन्ति क्रान्त्वा सर्वोर्ध्वम् अध्यास्महे॥]

श्रीकृष्ण की रति-यथा श्रीगीतगोविन्द में—

५. *कंसरिपु (श्रीकृष्ण) ने भी संसारवासना से बाँधने वाली शृङ्खला-रूपिणी राधा को हृदय में धारण करके (अन्य) व्रजसुन्दरियों (गोपियों) को छोड़ दिया।* *।१०।*

उद्दीपन—

६. यहाँ मुरलीध्वनि आदि उद्दीपन कहे गये हैं। ।११।

यथा पद्यावली में—

६. *शिव! शिव! (अरे रे!) गुरुजनों की फटकार या अवहेलना, अयश, गृहस्वामी का किसी भी प्रकार का दारुण चरित (कठोर व्यवहार या ताड़न)-सभी कुछ भुला डालती है यह मुरारि की मुरली!* *।१२।*

अनुभाव—

७. नयनों की कोर (कटाक्ष) से देखना और मुस्कुराना आदि अनुभाव कहे गये हैं। ।१३।

यथा ललितमाधव में—

७. *श्रीकृष्ण के कटाक्ष (नयनकोर से देखना) चितवन रूपी तरङ्गों से चञ्चल सूर्यपुत्री (यमुना) के मिश्रण से त्रिवेणी बनी हुई, श्रीराधा की स्मित की चन्द्रिका रूपी गङ्गा, की बाढ़ में जी-भर अमृतपान करके अन्तस् की तुष्टि रूपी तुषार के संप्लव से जिनके तापों का स्रोत ही मिटा दिया गया या निगला गया है ऐसे हम सातों लोक लाँघ कर सबके ऊपर चढ़े बैठे हैं।* *।१४।*

अथ सात्त्विकाः, यथा पद्यावल्याम्—

८. कामं वपुः पुलकितं नयने धृतास्रे
वाचः सगद्गदपदाः सखि! कम्पि वक्षः।
ज्ञातं मुकुन्दमुरलीरवमाधुरी ते
चेतः सुधांशुवदने! तरलीकरोति॥ (१५)

[हे सुधांशुवदने सखि! (ते) वपुः कामं पुलकितम्, नयने धृतास्रे, वाचः सगद्गदपदाः, कम्पि वक्षः, ज्ञातम्, मुकुन्दमुरलीरवः ते चेतः तरलीकरोति॥]

अथ व्यभिचारिणः—

८. आलस्यौग्र्ये विना सर्वे विज्ञेया व्यभिचारिणः। (१६)

[आलस्य-औग्र्ये विना सर्वे व्यभिचारिणः विज्ञेयाः॥]

तत्र निर्वेदो, यथा पद्यावल्याम्—

९. मा मुञ्च पञ्चशर! पञ्चशरीं शरीरे
मा सिञ्च सान्द्र-मकरन्दरसेन वायो!
अङ्गानि तत्प्रणयभङ्गविगर्हितानि
नालम्बितुं कथमपि क्षमतेऽद्य[६] जीवः॥ (१७)

[पञ्चशर! शरीरे पञ्चशरीं मा मुञ्च! वायो! सान्द्रमकरन्दरसेन मा सिञ्च! अङ्गानि तत्प्रणयभङ्गविगर्हितानि, अद्य जीवः कथम् अपि आलम्बितुं न क्षमते॥]

हर्षो, यथा दानकेलिकौमुद्याम्—

१०. कुवलययुवतीनां लेहयन्नक्षिभृङ्गान्
-कुवलयदललक्ष्मी-लङ्घिमाः स्वाङ्गभासः।
मदकल-कलभेन्द्रोल्लङ्घि-लीला-तरङ्गः
कवलयति धृतिं मे क्ष्माधरारण्यधूर्तः॥ (१८)

[कुवलययुवतीनाम् अक्षिभृङ्गम् लेहयन्, कुवलयदललक्ष्मीलङ्घिमाः स्वाङ्गभासः, मदकलकलभेन्द्रोल्लङ्घिलीला-तरङ्गः क्ष्माधरारण्यधूर्तः मे धृतिं कवलयति॥]

सात्त्विकभाव-यथा पद्यावली में—

८. *हे चन्द्रवदनी सखी! (तुम्हारा) शरीर भली-भाँति पुलकित है, नयनों में आँसू भरे हैं, वचन गद्गद-शब्दों-वाले बोल रही हो, वक्षःस्थल में कम्प है-इससे प्रतीत होता है कि मुकुन्द की मुरलीध्वनि की माधुरी तुम्हारे चेतस् (चित्त) को तरल बना (पिघला) रही है।* ।१५।

व्यभिचारी भाव—

८. आलस्य और उग्रता को छोड़कर अन्य सभी व्यभिचारी भाव यहाँ समझे जायें। ।१६।

निर्वेद यथा पद्यावली में—

९. *हे कामदेव! इस शरीर पर अपने पाँच बाण न फेंको! हे वायुदेव! घने मकरन्द-रस से मुझे न सींचो! ये अङ्ग तो उन (श्रीकृष्ण) के प्रणय-भङ्ग से निन्दनीय हो चुके हैं। आज यह जीव किसी भी प्रकार ठहर नहीं पा रहा है; प्राण-धारण दुष्कर है।* ।१७।

हर्ष यथा दानकेलिकौमुदी में—

१०. *समस्त भूमण्डल की युवतियों के नयन रूपी भौरों को कमलदलों की शोभा को लाँघने वाली अपनी अङ्ग-ज्योति चटाये हुए, मदमत्त कलभ-राज से बढ़कर लीला-तरङ्गों वाला, गोवर्धन के अरण्य में गोचारण के लिये घूमता हुआ यह धूर्त मेरे धैर्य को निगल रहा है।* ।१८।

अथ स्थायी—

९. स्थायी भावो भवत्यत्र पूर्वोक्ता मधुरा रतिः। (१९)

[पूर्वोक्ता मधुरा रतिः अत्र स्थायी भावः भवति॥]

यथा पद्यावल्याम्—

११. भ्रूवल्लि-ताण्डवकला-मधुराननश्रीः
कङ्केल्लिकोरक-करम्बित-कर्णपूरः।
कोऽयं नवीन-निकषोपलतुल्यवेषो
वंशीरवेण सखि! मामवशीकरोति? (२०)

[सखि! भ्रूवल्लि-ताण्डवकला-मधुराननश्रीः, कङ्केलिकोरक-करम्बित-कर्णपूरः कः अयं नवीननिकषोपल-तुल्यवेषः, वंशीरवेण मां विवशीकरोति?॥]

१०. राधामाधवयोरेव क्वापि भावैः कदाप्यसौ।
सजातीय-विजातीयैर्नैव विच्छिद्यते रतिः॥ (२१)

[असौ रतिः राधामाधवयोः एव सजातीयविजातीयैः भावैः क्व (चित्) अपि कदा अपि न एव विच्छिद्यते।।]

यथा—

१२. इतोऽदूरे राज्ञी स्फुरति परितो मित्रपटली
दृशोरग्रे चन्द्रावलिरुपरि शैलस्य दनुजः।
असव्ये राधायां कुसुमितलता-संवृततनौ
दृगन्तश्रीर्लोला तडिदिव मुकुन्दस्य वलते॥ (२२)

[इतः अदूरे राज्ञी, परितः मित्रपटली, दृशोः अग्रे चन्द्रावलिः, शैलस्य उपरि दनुजः स्फुरति, असव्ये कुसुमितलतासंवृततनौ राधायां मुकुन्दस्य लोला दृगन्तश्रीः तडित् इव वलते॥]

१३. घोरा खण्डितशङ्खचूडमजिरं रुन्धे शिवा तामसी
ब्रह्मिष्ठश्वसनः शमस्तुति-कथा-प्रालेयमासिञ्चति।
अग्रे रामसुधारुचिर्विजयते कृष्णप्रमोदोचितं
राधायास्तदपि प्रफुल्लमभजन् ग्लानिं न भावाम्बुजम्॥
(२३)

[खण्डितशङ्खचूडम् अजिरं घोरा तामसी शिवा रुन्धे, ब्रह्मिष्ठश्वसनः शमस्तुतिकथा प्रालेयम् आसिञ्चति, अग्रे सुधारुचिः रामः विजयते, तद् अपि राधायाः कृष्णप्रमोदोचितं प्रफुल्लं भावाम्बुजं ग्लानिं न अभजत्॥]

स्थायी भाव—

९. पहले कही गयी मधुरा रति ही यहाँ स्थायिभाव है.। ।१९।

यथा पद्यावली में—

११. हे सखि! भ्रूलताओं की ताण्डवकला (नचाना) से मधुर मुखशोभा वाला, अशोक-पुष्प की कली कान में खोंसे हुए, नये कसौटी के पत्थर जैसे उज्ज्वल नील वर्ण पर सुवर्णकान्ति वाला पीताम्बर पहने हुए यह कौन वंशीध्वनि द्वारा मुझे विवश बना रहा है? ।२०।

१०. यह रति श्रीराधा-माधव के ही सजातीय-विजातीय भावों से कभी भी विच्छिन्न नहीं होती। ।२१।

यथा—

१२. यहाँ से समीप ही नन्दरानी स्थित हैं, चारों ओर मित्रमण्डली घेरे हुए है, आँखों के सामने ही चन्द्रावली है, पर्वत (गोवर्धन) पर अरिष्ट दानव है, बाँयी ओर फूली हुई लता के सदृश तनु वाली राधा की ओर मुकुन्द की बिजली जैसी चञ्चल-उज्ज्वल कटाक्ष-दृष्टि घूमी हुई है। ।२२।

१३. क्रीड़ा के आँगन में मारा हुआ शङ्खचूड़ पड़ा है, उस आँगन को डरावनी तामसी शृगाल जाति या रात्रि घेरे खड़ी है। अत्यधिक बढ़ा हुआ श्वसन या पवन है अथवा ब्रह्मनिष्ठ जनों की शमकारक स्तुतिकथा रूपी हिमसमूह है; सामने बलराम ही मानो अमृतमय छबि वाला चन्द्र है, फिर भी श्रीकृष्ण का प्रमोदास्पद श्रीराधा का प्रफुल्ल भावकमल नहीं मुरझाया या मुकुलित नहीं हुआ। ।२३।

११. स विप्रलम्भ-सम्भोगभेदेन द्विविधो मतः। (२४)

[सः विप्रलम्भ-सम्भोग-भेदेन द्विविधः मतः॥]

तत्र विप्रलम्भः—

१२. स पूर्वरागो मानश्च प्रवासादिमयस्तथा।
विप्रलम्भो बहुविधो विद्वद्भिरिह कथ्यते॥ (२५)

[सः विप्रलम्भः इह पूर्वरागः, मानः तथा प्रवासादिमयः च विद्वद्भिः बहुविधः कथ्यते॥]

तत्र पूर्वरागः—

१३. प्रागसङ्गतयोर्भावः पूर्वरागो भवेद्द्वयोः। (२६)

[प्राक् असङ्गतयोः द्वयोः भावः पूर्वरागः भवेत्॥]

यथा पद्यावल्याम्—

१४. अकस्मादेकस्मिन् पथि सखि! मया यामुनतटं
व्रजन्त्या दृष्टो यो॰ नवजलधर-श्यामलतनुः।
स दृग्भङ्ग्या किंवाऽकुरुत न हि जाने तत इदं
मनो मे व्यालोलं क्वचन गृहकृत्ये न लगते॰॥ (२७)

[सखि! यमुनापथं व्रजन्त्या मया एकस्मिन् पथि अकस्मात् यः नवजलधरश्यामलतनुः दृष्टः, न हि जाने सः दृग्भङ्ग्या किं वा अकुरुत, ततः इदं मे व्यालोलं मनः क्वचन गृहकृत्ये न लगते॥]

यथा वा श्रीदशमे (भा०१०/५३/२)—

१५. यथा विनिद्रा मच्चित्ता रुक्मिणी कमलेक्षणा।
तथाहमपि तच्चित्तो निद्राञ्च न लभे निशि।
वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः॥ (२८)

[यथा मच्चित्ता कमलेक्षणा रुक्मिणी विनिद्रा तथा अहम् अपि तच्चित्तः निशि निद्रां च न लभे। रुक्मिणा द्वेषात् मम उद्वाहः निवारितः (इति) अहं वेद॥]

११. वह (मधुर भक्तिरस) विप्रलम्भ एवं संयोग ऐसे दो प्रकार का है। ।२४।

विप्रलम्भ—

१२. वह विप्रलम्भ भी विद्वज्जनों द्वारा अनेक प्रकार का कहा गया है— पूर्वराग, मान, प्रवासादिमय। ।२५।

पूर्वराग—

१३. पहले न मिले हुए उन (प्रेम के आश्रय-विषय) दोनों का परस्पर भाव ही पूर्वराग होता है। ।२६।

यथा पद्यावली में—

१४. *हे सखि! यमुनातट को जाती हुई मैंने अकस्मात् एक दिन एक ही पथ पर जो नवीन जलधर के समान श्यामल तनु वाला देखा, तब उसने अपनी दृष्टिभङ्गिमा या कटाक्ष से देखते हुए न जाने क्या किया कि (तब से) मेरा यह अधिक चञ्चल मन किसी भी गृहकार्य में लगता नहीं। ।२७।*

अथवा यथा श्रीदशम में (भा. १०/५३/२)—

१५. *जैसे मुझ में ही चित्त लगाये हुए कमलनयनी रुक्मिणी निद्रा से रहित है, वैसे ही उसी में लगे हुए चित्त वाला मैं भी रात्रि में निद्रा नहीं पाता। मैं जानता हूँ कि रुक्मी ने द्वेष के कारण मेरा (रुक्मिणी से) विवाह रोक दिया है। ।२८।*

अथ मानः—

१४. मानः प्रसिद्ध एवात्र। (२९)

[अत्र मानः प्रसिद्धः एव॥]

यथा श्रीगीतगोविन्दे—

१६. विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्युत[९]।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखर-शिखरे लीना [१०]दीनान्युवाच रहः सखीम्॥ (३०)

[साधारणप्रणये हरौ वने विहरति, राधा क्वचित् अपि गुञ्जन्मधुव्रतमण्डली-मुखरशिखरे लताकुञ्जे लीना विगलित-निजोत्कर्षात् ईर्ष्यावशेन गतानि दीनानि सखीम् उवाच॥]

अथ प्रवासः—

१५. प्रवासः सङ्गविच्युतिः। (३१)

[सङ्गविच्युतिः प्रवासः॥]

यथा पद्यावल्याम्—

१७. हस्तोदरे विनिहितैक-कपोलपाले-
रश्रान्तलोचनजलस्नपिताननायाः[११]।
प्रस्थानमङ्गलदिनावधि माधवस्य
निद्रालवोऽपि कुत एव सरोरुहाक्ष्याः? (३२)

[हन्त! उदरे विनिहतैककपोलपालेः अश्रान्तलोचनजलस्नपिताननायाः सरोरुहाक्ष्याः माधवस्य प्रस्थानमङ्गलदिनावधि निद्रालवः अपि कुतः एव?।]

यथा प्रह्लादसंहितायामुद्धववाक्यम्—

१८. भगवानपि गोविन्दः कन्दर्पशरपीडितः।
न भुङ्क्ते न स्वपिति च चिन्तयन् वो ह्यहर्निशम्॥ (३३)

[गोविन्दः भगवान् अपि कन्दर्पशरपीडितः अहर्निशं हि वः चिन्तयन् न भुङ्क्ते, न स्वपिति च॥]

मान—

१४. मान तो यहाँ प्रसिद्ध ही है। ।२९।

यथा श्रीगीतगोविन्द में—

१६. *वृन्दावन में श्रीकृष्ण को अन्य गोपीसमूह के साथ प्रणय-विहार करते देखकर (राधा) इसके द्वारा अपना प्रणयोत्कर्ष विगलित होने से ईर्ष्या के वशीभूत हुए दीन वचन—कहीं एकान्त में गूँजते हुए भौंरों से मुखर शिखर वाले लताकुञ्ज में बैठी हुई राधा—अपनी सखी से कहने लगी। ।३०।*

प्रवास—

१५. सङ्ग छूट जाना ही प्रवास है। ।३१।

यथा पद्यावली में—

१७. *हाय ! माधव के प्रस्थानमङ्गल के दिन से आज तक, आँसुओं के जल से धुलते-कुम्हलाते मुखवाली, एक हाथ पर कपोल टिकाये, गोद में झुके मुखवाली कमलनयनी राधा को निद्रा का लेश भी कहाँ है? ।३२।*

और यथा प्रह्लादसंहिता में उद्धव का वचन—

१८. *वे भगवान् गोविन्द भी दिन-रात आप सबका ही चिन्तन करते हुए, कन्दर्प के बाणों से पीड़ित होकर न कुछ भोजन करते हैं, न ही सो पाते हैं। ।३३।*

अथ सम्भोगः—

१६. द्वयोर्मिलितयोर्भोगः सम्भोग इति कीर्त्यते। (३४)

[द्वयोः मिलितयोः भोगः सम्भोगः इति कीर्त्यते॥]

यथा पद्यावल्याम्—

१९. परमानुरागपरयाथ राधया
परिरम्भ-कौशल-विकाशिभावया।
स तया सह स्मरसभाजनोत्सवं
निरवाहयच्छिखिशिखण्डशेखरः॥ (३५)

[परमानुरागपरया परिरम्भ-कौशल-विकाशिभावया तया राधया सह सः शिखिशिखण्डशेखरः स्मरसभाजनोत्सवं निरवाहयत्॥]

१७. श्रीमद्भागवताद्यर्हशास्त्रदर्शितया दृशा।
इयमाविष्कृता मुख्यपञ्चभक्तिरसौ मया॥ (३६)

[श्रीमद्भागवतादि-अर्हशास्त्रदर्शितया दृशा इयम् असौ पञ्चभक्तिः मया आविष्कृता॥]

१८. गोपालरूप-शोभां
दधदपि रघुनाथभावविस्तारी।
तुष्यतु सनातनात्मा
पश्चिम[१२]-भागे रसाम्बुनिधेः॥ (३७)

[गोपालरूपशोभां दधत् अपि रघुनाथभावविस्तारी सनातनात्मा रसाम्बुनिधेः पश्चिमभागे तुष्यतु॥]

। इति श्रीभक्तिरसामृतसिन्धौ पश्चिमविभागे
मुख्य-भक्तिरसपञ्चक-निरूपणे मधुराख्यभक्तिरस-लहरी पञ्चमी।

॥ इति श्रीभक्तिरसामृतसिन्धौ मुख्यभक्तिरस-निरूपको नाम
पश्चिमविभागः॥

सम्भोग—

१६. दोनों का मिलन के समय भोग ही सम्भोग है। ।३४।

यथा पद्यावली में—

> १९. *परम अनुराग से भरी, आलिङ्गन के कौशल का विकास करनेवाले भाव से भरी उस राधा के साथ मयूरपिच्छ-युक्त मुकुटवाले गोपाल ने कामदेव को आनन्दित करने वाला उत्सव मनाया।* ।३५।

१७. श्रीमद्भागवत आदि आधिकारिक शास्त्रों में दिखाई गई दृष्टि से यह पञ्चविधा भक्ति मैंने यहाँ प्रकट दिखाई है। ।३६।

१८. गोपाल-रूप की शोभा धारण किये हुए भी रघुनाथभाव का विस्तार करनेवाले सनातन-स्वरूप प्रभु रस-जलनिधि के इस पश्चिम भाग में सन्तुष्ट हों। (श्रीकृष्ण के विशेषणों में ही अपने गुरुजनों—श्री गोपाल भट्ट, श्रीरूप, श्रीसनातन, 'आत्मा' शब्द से श्रीजीव, तथा रघुनाथ नाम से श्री रघुनाथ भट्ट एवं श्री रघुनाथ दास दोनों का नामोल्लेख श्लेष द्वारा करके इसी श्लोक द्वारा उन्हें भी नमन किया गया)। ।३७।

। श्रीभक्तिरसामृतसिन्धु के पश्चिम विभाग में मुख्य पाँच भक्तिरसों के निरूपण में पाँचवीं मधुरभक्तिरस-लहरी समाप्त हुई।

॥ इसी के साथ मुख्यभक्तिरस-निरूपक यह पश्चिम-विभाग भी समाप्त हुआ ॥

गौणभक्तिरस-निरूपकः

उत्तर-विभागः

हास्यभक्तिरसाख्या प्रथमलहरी

१. भक्तिभरेण प्रीतिं कलयन्नुररीकृत-व्रजासङ्गः।
तनुतां सनातनात्मा भगवान्मयि सर्वदा तुष्टिम्॥ (१)

[भक्तिभरेण प्रीतिं कलयन्, उररीकृतव्रजासङ्गः सनातनात्मा भगवान् मयि सर्वदा तुष्टिं तनुताम्॥]

२. रसामृताब्धेर्भागेऽत्र तुरीये तूत्तराभिधे।
रसः सप्तविधो गौणो मैत्री वैरस्थितिर्मिथः॥ (२)

[रसामृताब्धेः उत्तराभिधे तुर्ये विभागे अत्र तु सप्तविधः गौणः रसः; मिथः मैत्री, वैरस्थितिः (च)॥]

३. रसाभासाश्च तेनात्र लहर्यो नव कीर्तिताः।
प्रागत्रानियताधाराः[1] कदाचित् क्वाप्युदित्वराः॥ (३)

[रसाभासाः च। तेन अत्र नव लहर्यः कीर्त्तिताः। अत्र प्राक् अनियताधाराः, कदाचित् क्व अपि उदित्वराः॥]

४. गौणाः भक्तिरसाः सप्त लेख्या हास्यादयः क्रमात्॥ (४)

[गौणाः सप्त हास्यादयः भक्तिरसाः क्रमात् लेख्याः॥]

५. भक्तानां पञ्चधोक्तानामेषां मध्यत एव हि।
क्वाप्येकः क्वाप्यनेकश्च गौणेष्वालम्बनो मतः॥ (५)

[एषां पञ्चधा उक्तानां भक्तानां मध्यतः एव हि क्व अपि एकः, क्व अपि अनेकः च गौणेषु (भक्तिरसेषु) आलम्बनः मतः॥]

तत्र हास्यभक्तिरसः—

६. वक्ष्यमाणैर्विभावाद्यैः पुष्टिं हासरतिर्गता।
हास्यभक्तिरसो नाम बुधैरेष निगद्यते॥ (६)

[वक्ष्यमाणैः विभावाद्यैः पुष्टिं गता हासरतिः हास्यभक्तिरसः नाम एषः बुधैः निगद्यते॥]

गौण-भक्तिरस-निरूपक

उत्तर-विभाग

प्रथम लहरी-हास्यभक्तिरस

१. जिनका श्रीविग्रह सनातन (नित्य) है ऐसे भगवान् श्रीकृष्ण (अथवा श्री सनातन-प्रभु) भक्तों में स्थित भक्ति के अतिशय से प्रसन्न होते हुए, व्रज के समस्त सङ्ग को अथवा व्रज की प्रीति-आसक्ति को हृदय में लिये हुए सर्वदा मेरे प्रति सन्तुष्ट हों। ।१।

२-४. इस रसामृतसिन्धु के उत्तर-संज्ञक चौथे विभाग में सात प्रकार के गौण रस, उनकी परस्पर मैत्री, विरोध-स्थिति तथा रसाभास की निरूपिका नौ लहरियाँ हैं। दास्य आदि मुख्य रस तो पहले दास आदि में नियत-आधार वाले हैं। उन्हीं में उदित होते हैं, ह्रास आदि वैसे नहीं हैं, किन्तु कभी-कभी, कहीं भक्तों में उदित होते हैं। ये गौण भक्तिरस हास्य आदि सात लहरियों में क्रमशः उल्लिखित होंगे। ।२-४।

५. पाँच प्रकार से कहे गये इन (मुख्य) भक्तों में से ही किसी में कभी एक कभी अनेक भी गौण भक्तिरसों में आलम्बन माने गये हैं। ।५।

हास्यभक्तिरस—

६. आगे कहे जाने वाले विभाव आदि के द्वारा पुष्ट हुई हासरति ही बोधशील अनुभवियों द्वारा इस हास्य-भक्तिरस नाम से कही गयी है। ।६।

७. अस्मिन्नालम्बनः कृष्णस्तथाऽन्योऽपि तदन्वयी।
वृद्धाः शिशुमुखाः प्रायः प्रोक्ता धीरैस्तदाश्रयाः।
विभावनादि-वैशिष्ट्यात् प्रवराश्च क्वचिन्मताः॥ (७)

[अस्मिन् कृष्णः तथा अन्यद् अपि तदन्वयी आलम्बनः, वृद्धाः, शिशुमुखाः प्रायः धीरैः तदाश्रयाः प्रोक्ताः, क्वचित् विभावनादिवैशिष्ट्यात् प्रवराः च मताः॥]

तत्र कृष्णो, यथा—

१. यास्याम्यस्य[2] न भीषणस्य सविधं जीर्णस्य शीर्णाकृते-
र्मातर्नेष्यति मां पिधाय कपटादाधारिकायामसौ।
इत्युक्त्वा चकिताक्षमद्भुतशिशावुद्वीक्ष्यमाणे हरौ
हास्यं तस्य निरुन्धतोऽप्यतितरां व्यक्तं तदासीन्मुनेः॥ (८)

["मातः! भीषणस्य जीर्णस्य शीर्णाकृतेः अस्य सविधं न यास्यामि, असौ मां कपटात् आधारिकायां पिधाय नेष्यति"—इति उक्त्वा चकिताक्षम् उद्वीक्ष्यमाणे अद्भुतशिशौ हरौ तस्य मुनेः हास्यं निरुद्धतः अपि अतितरां व्यक्तम् आसीत्॥]

अथ तदन्वयी—

८. यच्चेष्टा कृष्णविषया प्रोक्तः सोऽत्र तदन्वयी। (९)

[यच्चेष्टा कृष्णविषया सः अत्र तदन्वयी प्रोक्तः॥]

यथा—

२. ददामि दधि फ़ाणितं विवृणु वक्त्रमित्यग्रतो
निशम्य जरतीगिरं विवृतकोमलौष्ठे स्थिते।
तया कुसुममर्पितं नवमवेत्य[3] भुग्नानने
हरौ जहसुरुद्धुरं किमपि सुष्ठु गोष्ठार्भकाः॥ (१०)

["दधि-फाणितं ददामि, अग्रतः वक्त्रं विवृणु!"—इति जरतीगिरं निशम्य विवृतकोमलौष्ठे स्थिते हरौ तया भुग्नानने नवं कुसुमम् अर्पितम् अवेत्य गोष्ठार्भकाः सुष्ठु किम् अपि उद्धुरं जहसुः॥]

७. इसमें श्रीकृष्ण अथवा उनके अनुकूल अन्य जन भी आलम्बन होते हैं एवं वृद्ध तथा शिशुमुख (बाल्य-भाव वाले) प्रायः आश्रय होते हैं, विभावना आदि वैशिष्ट्य से कभी प्रवर (मध्यवयस्क) भी आश्रय माने गये हैं—ऐसा धीरजनों ने कहा है। ।७।

श्रीकृष्ण (आलम्बन) यथा—

१. *''मैया री! इस भयानक, बूढ़े गली हुई आकृति-वाले (बाबा-साधू) के पास मैं नहीं जाऊँगा। यह तो मुझे धोखे से झोले में डाल कर ले जायेगा।''—ऐसा कहकर अद्भुत-शिशु बने हुए हरि के चकित दृष्टि से टकटकी लगाये देखते रहने पर उस मुनि की हँसी रोकी जाने पर भी खुलकर भली-भाँति व्यक्त हो गयी। ।८।*

श्रीकृष्ण के अन्वयी—

८. जिसकी चेष्टा कृष्ण-विषयक हो वही यहाँ उनका अन्वयी कहा गया है। ।९।

यथा—

२. *''देख तुझे दही-बूरा (या मक्खन) दे रही हूँ—आगे मुँह खोल तो!''-वृद्ध गोपी द्वारा ऐसा कहे जाने पर उसकी बात सुनकर बालकृष्ण सुकोमल ओठ खोलकर खड़े रहे तब उस गोपी ने एक नया खिला पुष्प उनके मुँह में डाल दिया—यह जानकर व्रज के बालक जोर से भली-भाँति हँस पड़े। ।१०।*

यथा वा—

३. अस्य प्रेक्ष्य करं शिशोर्मुनिपते! श्यामस्य मे कथ्यतां
तथ्यं हन्त चिरायुरेष भविता किं धेनुकोटीश्वरः।
इत्युक्ते भगवन्! मयाद्य परितश्चीरेण किं चारुणा
द्रागाविर्भवदुद्धुरस्मितमिदं वक्त्रं त्वया[४] रुध्यते? (११)

["मुनिपते! अस्य शिशोः श्यामस्य करं प्रेक्ष्य मे कथ्यताम् हन्त एषः चिरायुः, धेनुकोटीश्वरः भविता किम्?"—इति मया उक्ते अद्य भगवन्! त्वया परितः चारुणा चीरेण द्रागाविर्भवदुद्धुरस्मितम् इदं वक्त्रं किं रुध्यते॥]

९. उद्दीपना हरेस्तादृग्वाग्वेषचरितादयः।
अनुभावास्तु नासौष्ठगण्डनिस्पन्दनादयः॥ (१२)

[हरेः तादृक् वाग्-वेष-चरितादयः उद्दीपनाः, अनुभावाः तु नासा-ओष्ठ-गण्ड-निस्पन्दनादयः॥]

१०. हर्षालस्यावहित्थाद्या विज्ञेया व्यभिचारिणः।
सा हासरतिरेवात्र स्थायिभावतयोदिता॥ (१३)

[हर्ष-आलस्य-अवहित्था-आद्याः व्यभिचारिणः विज्ञेयाः। सा हासरतिः एव अत्र स्थायिभावतया उदिता॥]

११. षोढा हासरतिः स्यात्-स्मितहसिते
विहसितावहसितेच।
अपहसितातिहसितके
ज्येष्ठादीनां क्रमाद् द्वे द्वे॥ (१४)

[हासरतिः षोढा स्यात्-स्मित-हसिते, विहसितावहसिते, अपहसित-अतिहसितके च (इति) ज्येष्ठादीनां क्रमात् द्वे द्वे॥]

१२. विभावनादि-वैचित्र्यादुत्तमस्यापि कुत्रचित्।
भवेद्विहसिताद्यञ्च भावज्ञैरिति भण्यते॥ (१५)

[विभावनादि-वैचित्र्यात् उत्तमस्य अपि कुत्रचित् विहसिताद्यं च भवेत् इति भावज्ञैः भण्यते॥]

और भी यथा—

३. *"हे मुनिश्रेष्ठ! इस श्याम-शिशु का हाथ देखकर भला मुझे बताओ तो कि क्या यह चिरायु दीर्घजीवी, करोड़ों गायों का स्वामी होगा?"—मेरे ऐसा कहने पर हे भगवन्! आप सुन्दर चीर (वल्कल वस्त्र) से सब ओर से ढक कर हठात् फूटी पड़ती हुई-सी मुस्कान वाला अपना मुख क्यों छिपा रहे हैं?* ।११।

९. श्रीहरि (तथा उनके साथियों) के वैसे (हास्यजनक) वचन, वेष, चरित आदि उद्दीपन हैं और नासिका, होठ-कपोल का अधिक स्पन्दित होना आदि अनुभाव हैं। ।१२।

१०. हर्ष, आलस्य, अवहित्था आदि यहाँ व्यभिचारीभाव जाने जायें। वह हासरति ही यहाँ स्थायिभाव रूप से कही गयी है। ।१३।

११. हासरति छह प्रकार की है—स्मित-हसित, विहसित-अवहसित, अपहसित-अतिहसित, इस प्रकार दो-दो ज्येष्ठ आदि के क्रम से हैं। ।१४।

१२. विभावना आदि के वैचित्र्य से अत्तम के भी कभी विहसित आदि होते हैं—ऐसा भावज्ञ लोग कहते हैं। ।१५।

तत्र स्मितम्—

१३. स्मितं त्वलक्ष्यदशनं नेत्रगण्डविकाशकृत्। (१६)

[स्मितं तु अलक्ष्यदशनं नेत्रगण्डविकाशकृत्॥]

यथा—

४. क्व यामि जरती खला दधिहरं दिधीर्षन्त्यसौ
प्रधावति जवेन मां सुबल! मङ्क्षु रक्षां कुरु।
इति स्खलदुदीरिते द्रवति कान्दिशीके हरौ
विकस्वरमुखाम्बुजं कुलमभून्मुनीनां दिवि॥ (१७)

[“सुबल! क्व यामि, असौ खला जरती दधिहरं मां दिधीर्षन्ती जवेन प्रधावति, मङ्क्षु रक्षां कुरु!”—इति स्खलदुदीरिते कान्दिशीके हरौ द्रवति, दिवि मुनीनां कुलं विकस्वरमुखाम्बुजम् अभूत्॥]

हसितम्—

१४. तदेव दर-संलक्ष्य-दन्ताग्रं हसितं भवेत्। (१८)

[तत् एव दरसंलक्ष्यदन्ताग्रं हसितं भवेत्॥]

यथा—

५. मद्वेषेण पुरः स्थितो हरिरसौ पुत्रोऽहमेवास्मि ते
पश्येत्यच्युतजल्पविश्वसितया संरम्भरज्यद्दृशा।
मामेति स्खलदक्षरे जटिलया व्याक्रुश्य निष्कासिते
पुत्रे प्राङ्गणतः सखीकुलमभूद्दन्तांशुधौताधरम्॥ (१९)

[“मद्वेषेण पुरः स्थितः असौ हरिः, पश्य अहम् एव ते पुत्रः अस्मि”—इति अच्युतजल्पविश्वसितया संरम्भरज्यद्दृशा जटिलया “मा! मा!” इति स्खलदक्षरे व्याक्रुश्य प्राङ्गणतः निष्कासिते पुत्रे, सखीकुलं दन्तांशुधौताधरम् अभूत्॥]

विहसितम्—

१५. सस्वनं दृष्टदशनं भवेद्विहसितं तु तत्। (२०)

[सस्वनं दृष्टदशनं तु तत् विहसितं भवेत्॥]

स्मित—

१३. दाँत दिखाई न देते हुए नेत्रों एवं कपोलों में विकास (खिलापन एवं थोड़ा-सा फैलाना) लाने वाला हास्या स्मित (मुस्कान) होता है। ।१६।

यथा—

४. *"सुबल! अरे कहाँ भागूँ? जल्दी मुझे बचाओ! देखो! दही चुराकर खाते हुए मुझे डपटती हुई यह वृद्धा गोपी पीछे दौड़ी आ रही है!" शीघ्रता में ऐसा लटपटाते बोलते हुए, रुआँसे हुए, भांगे जाते हुए बालकृष्ण को देखकर आकाश में दिव्य मुनिगणों के मुख खिलना चाहते हुए कमल जैसे (मुस्कान भरे) हो गये।* ।१७।

हसित—

१४. जब दाँतों का अग्रभाग थोड़ा-सा दिखता हो तब वही (हास्य) हसित कहलाता है। ।१८।

यथा—

५. *"मेरा वेष बनाये हुए यह कृष्ण ही सामने खड़ा है"-हरि के इस कथन पर विश्वास करते हुए जब क्रोध भरी घबराहट से "नहीं! नहीं! ऐसा नहीं! माँ! ..." ऐसा चिल्लाते हुए अपने बेटे को ही जटिला (राधा रानी की सास) ने आँगन से निकाल-भगाया, तब सखियों का समूह दाँतों की किरणों से धुले ओठों वाला हो गया। (अर्थात् वे सब हँसने लगीं।)* ।१९।

विहसित—

१५. जो ध्वनियुक्त हो और दाँत दिखते हों-ऐसा हँसना विहसित होता है। ।२०।

यथा—

६. मुषाण दधि मेदुरं विफलमन्तरा शङ्कसे
सनिःश्वसित-डम्बरं जटिलयात्र निद्रायते।
इति ब्रुवति केशवे प्रकटशीर्णदन्तस्थलं
कृतं हसितमुत्स्वनं कपटसुप्तया वृद्धया॥ (२१)

["मेदुरं दधि मुषाण! अन्तरा विफलं शङ्कसे, सनिःश्वसितडम्बरं जटिलया अत्र निद्रायते"—इति ब्रुवति केशवे कपटसुप्तया वृद्धया कपटशीर्णदन्तस्थलम् उत्स्वनं हसितं कृतम्॥]

अवहसितम्—

१६. तच्चावहसितं फुल्लनासं कुञ्चितलोचनम्। (२२)

[फुल्लनासं कुञ्चितलोचनं तत् च अवहसितम्॥]

यथा—

७. लग्नस्ते नितरां दृशोरपि युगे किं धातुरागो घनः
प्रातः पुत्र! बलस्य वा किमसितं वासस्त्वयाङ्गे धृतम्?
इत्याकर्ण्य पुरो व्रजेशगृहिणीवाचं स्फुरन्नासिका
दूती सङ्कुचदीक्षणावहसितं जाता न रोद्धुं क्षमा॥ (२३)

अपहसितम्—

१७. तच्चापहसितं साश्रुलोचनं कम्पितांसकम्। (२४)

[साश्रुलोचनं कम्पितांसकं तत् च अपहसितम्॥]

यथा—

८. उदस्रं देवर्षिर्दिवि दरतरङ्गद्भुजशिरा
यदभ्राण्युद्दण्डो दशनरुचिभिः पाण्डुरयति।
स्फुटं ब्रह्मादीनां नटयितरि दिव्ये व्रजशिशौ
जरत्याः प्रस्तोभान्नटति तदनैषीद्दृशमसौ॥ (२५)

[दरतरङ्गद्भुजशिराः देवर्षिः यत् उदस्रं दशनरुचिभिः अभ्राणि पाण्डुरयति, तत् असौ जरत्याः प्रस्तोभात् नटति ब्रह्मादीनां नटयितरि दिव्ये व्रजशिशौ स्फुटं दृशम् अनैषीत्॥]

यथा—

६. *"सखे! घना जमा हुआ मलाई वाला दही चुरा लो! वृथा आशङ्का कर रहे हो (कि कोई देख लेगा)। बुढ़िया जटिला तो यहाँ जोर से खर्राटे भरती हुई सो रही है।"-कृष्ण के ऐसा कहने पर कपट से सोई (सोने का बहाना करती) हुई वृद्धा गिरे हुए दाँतों के मसूढ़े दिखाती हुई, ठठाकर हँस पड़ी। ।२१।*

अवहसित—

१६. जिस हँसने में ध्वनि होने, दाँत दिखने के साथ नासिका फूली हो, आँखे सिकुड़ी हों-वह अवहसित है। ।२२।

यथा—

७. *"पुत्र! तेरे नयनों पर क्या घना लाल धातुराग (रंग) लग गया है? और सुबह क्या तुम ने बलराम भैया का नीला वस्त्र ओढ़ लिया था?"-ऐसा व्रजरानी 'यशोदा का कहना सुनकर सामने खड़ी दूती (जो श्रीराधा से श्याम सुन्दर के मिलन की बात जानती थी) की नासिका फूलकर फरकने लगी, आँखें सिकुड़ गईं, किसी तरह न दबाई जा सकने वाली उसकी हँसी फूट पड़ी।' ।२३।*

अपहसित—

१७. उसी हास्य में जब आँखों में आँसू तक आ जायें और कन्धे काँपने लगें तब उसे अपहसित कहते हैं। ।२४।

यथा—

८. *ये देवर्षि नारद जो अतिशय हँस रहे हैं, हँसी के वेग से इनके कन्धे तरङ्गित हो (काँप) रहे हैं, आँखों में आँसू भरे हैं और खुले दाँतों की शुभ्रकान्ति से मेघ भी शुभ्र हुए जा रहे हैं- इससे ऐसा लगता है कि अवश्य ही इन्होंने व्रज में वृद्धागोपी द्वारा प्रलोभन दिये जाने पर नाचते हुए उस दिव्य शिशु (बालकृष्ण) को देख लिया है जो वस्तुतः ब्रह्मा को भी नचाने वाला है; (वही आज व्रज में नन्हा बालक बना हुआ माखन के लोभ में गोपी के नचाने से नाच रहा है।) ।२५।*

अतिहसितम्—

१८. सहस्ततालं क्षिप्ताङ्गं तच्चातिहसितं विदुः। (२६)

[तत् च सहस्ततालं क्षिप्ताङ्गम् अतिहसितं विदुः॥]

यथा—

९. वृद्धे त्वं वलितानानासि वलिभिः प्रेक्ष्य स्वयोग्यामत-
स्त्वामुद्वोढुमसौ बलीमुखवरो मां साधयत्युत्सुकः।
आभिर्विप्लुतधीर्वृणे न हि परं त्वत्तो बलिध्वंसना-
दित्युच्चैर्मुखरा-गिरा विजहसुः सोत्तालिका बालिकाः॥ (२७)

["वृद्धे त्वं वलिभिः वलितानना असि, अतः त्वां स्वयोग्यां प्रेक्ष्य उत्सुकः असौ बलीमुखवरः मां साधयति"—"आभिः विप्लुतधीः (अहं) बलिध्वंसनात् त्वत्तः परं न हि वृणे"—इति मुखरा-गिरा सोत्तालिका बालिकाः उच्चैः विजहसुः॥]

१९. यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते।
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते॥ (२८)

[यस्य हासः सः चेत् क्व अपि साक्षात् न एव निबध्यते, तथापि एषः विभावादि-सामर्थ्यात् उपलभ्यते॥]

यथा—

१०. शिम्बीलम्बि-कुचासि दर्दुरवधूविस्पर्धि-नासाकृति-
स्त्वं जीर्यद्द्दुलिदृष्टिरोष्ठतुलिताङ्गारा मृदङ्गोदरी।
का त्वत्तः कुटिले! परास्ति जटिलापुत्रि! क्षितौ सुन्दरी
पुण्येन व्रजसुभ्रुवां तव धृतिं हर्तुं न वंशी क्षमा॥ (२९)

[त्वं शिम्बीलम्बि-कुचा, दर्दुरवधू-विस्पर्धि-नासाकृतिः, जीर्यद्द्दुलिदृष्टिः, ओष्ठतुलिताङ्गारा, मृदङ्गोदरी असि, जटिलापुत्रि कुटिले! त्वत्तः परा क्षितौ का सुन्दरी अस्ति? व्रजसुभ्रुवां पुण्येन तव धृतिं हर्तुं वंशी न क्षमा॥]

अतिहसित—

१८. उसी हास्य में जब हाथों से तालियाँ बजाते हुए अङ्ग-अङ्ग उछल रहे हों, तब उसे अतिहसित कहते हैं। ।२६।

यथा—

९. *"वृद्धे! तुम झुर्रियों से भरे मुँह वाली हो, इसलिये तुम्हें सुयोग्य देखकर यह श्रेष्ठ बन्दर उत्सुक होकर मुझे साठ रहा है कि तुम से उसका ब्याह करा दूँ।" "इन वलियों (झुर्रियों) से मारी हुई बुद्धि वाली मैं तो वलियों (बलियों बड़े-बड़े बलवान् असुरों) का ध्वंस करने वाले तुमको छोड़कर और किसी का वरण नहीं करूँगी।" पौगण्ड-कृष्ण और मुखरा नाम की वृद्धा गोपी का यह संवाद सुनकर तालियाँ बजा-बजाकर उछलती-कूदती हुई गोप-बालिकायें जोर से हँसने लगीं। ।२७।*

१९. जिसका हास हो वह साक्षात् कहीं न भी दिखाई दे, तो भी विभाव आदि के सामर्थ्य से वह उपलब्ध हो जाता है। ।२८।

यथा—

१०. *हे जटिला की बेटी कुटिले तुम्हारे कुच सेम जैसे लम्बे लटकते हैं, मेंढकी से स्पर्धा में जीतने वाली तेरी नासिका है, बूढ़ी कछुई जैसी तुम्हारी आँखें हैं, ओठ अङ्गारों जैसे हैं, तुमसे बढ़कर सुन्दरी भला धरती पर कौन होगी? किन्तु व्रज की अन्य सुन्दरियों के पुण्य से तुम्हारे धैर्य का हरण यह वंशी नहीं कर पाती। ।२९।*

२०. एष हास्यरसस्तत्र कैशिकीवृत्तिविस्तृतौ।
शृङ्गारादिरसोद्भेदो[६] बहुधैव प्रपञ्चितः॥ (३०)

[एषः हास्यरसः शृङ्गारादिरसोद्भेदः, तत्र कैशिकीवृत्तिविस्तृतौ बहुधा एव प्रपञ्चितः॥]

॥ इति श्रीभक्तिरसामृतसिन्धौ उत्तरविभागे गौणभक्तिरसनिरूपणे
हास्यभक्तिरस-लहरी प्रथमा॥

२०. यह हास्यरस शृङ्गार आदि रसों का ही भेद है, यह कैशिकीवृत्ति के विस्तार में अनेक प्रकार से खोलकर कहा गया है। ।३०।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में पहली हास्यभक्तिरस-लहरी समाप्त हुई॥

अद्भुतभक्तिरसाख्या—द्वितीय लहरी

१. आत्मोचितैर्विभावाद्यैः स्वाद्यत्वं भक्तचेतसि।
सा विस्मय-रतिर्नीताद्भुतभक्तिरसो भवेत्॥ (१)

[आत्मोचितैः विभावाद्यैः (या) भक्तचेतसि स्वाद्यत्वं नीता, सा विस्मयरतिः अद्भुतभक्तिरसः भवेत्॥]

२. भक्तः सर्वविधोऽप्यत्र घटते विस्मयाश्रयः।
लोकोत्तरक्रियाहेतुर्विषयस्तत्र केशवः॥ (२)

[अत्र सर्वविधः अपि भक्तः विस्मयाश्रयः घटते। तत्र लोकोत्तरक्रियाहेतुः केशवः विषयः॥]

३. तस्य चेष्टाविशेषाद्यास्तस्मिन्नुदीपना मताः।
क्रियास्तु नेत्रविस्तारस्तम्भाश्रुपुलकादयः॥ (३)

[तस्य चेष्टाविशेषाद्याः तस्मिन् उद्दीपनाः मताः, क्रियाः तु नेत्रविस्तार-स्तम्भ-अश्रु-पुलकादयः॥]

४. आवेग-हर्ष-जाड्याद्यास्तत्र स्युर्व्यभिचारिणः।
स्थायी स्याद्विस्मयरतिः सा लोकोत्तरकर्मतः।
साक्षादनुमितश्चेति तच्च द्विविधमुच्यते॥ (४)

[तत्र आवेग-हर्ष-जाड्याद्याः व्यभिचारिणः स्युः। सा विस्मयरतिः लोकोत्तरकर्मतः स्थायी स्यात्। तत् च (कर्म) साक्षात् अनुमितं च इति द्विविधम् उच्यते॥]

तत्र साक्षात्, यथा—

५. साक्षादैन्द्रियकं दृष्टश्रुतसंकीर्तितादिकम्॥ (५)

[दृष्टश्रुतसङ्कीर्तितादिकम् ऐन्द्रियकम् साक्षात्॥]

तत्र दृष्टं, यथा—

१. एकमेव विविधोद्यमभाजं
मन्दिरेषु युगपन्निखिलेषु।
द्वारकामभि समीक्ष्य मुकुन्दं
स्पन्दनोज्झिततनुर्मुनिरासीत्॥ (६)

[एकम् एव मुकुन्दं द्वारकाम् अभि निखिलेषु मन्दिरेषु विविधोद्यमभाजं समीक्ष्य मुनिः स्पन्दनोज्झिततनुः आसीत्॥]

द्वितीय लहरी—अद्भुतभक्तिरस

१. विभाव आदि के द्वारा भक्तों के चित्त में आस्वाद्यता को प्राप्त हुई विस्मयरति ही अद्भुत-भक्तिरस है। ।१।

२. सभी प्रकार के भक्त यहाँ विस्मय रति के आश्रय हैं। तथा लोकोत्तर (अलौकिक) क्रियाओं के हेतु केशव (श्रीकृष्ण) ही उस विस्मय रति के विषय हैं। ।२।

३. उन कृष्ण की विशेष चेष्टायें इस रस में उद्दीपन मानी गई हैं—नेत्रों का फैलना, स्तम्भ हो जाना, अश्रु और पुलक आदि प्रकट होना-ये क्रियायें इस रस को व्यक्त करती है। ।३।

४. यहाँ आवेग, हर्ष, जड़ता आदि व्यभिचारीभाव होते हैं। अलौकिक कर्म से होने वाली विस्मयरति ही स्थायिभाव है। वे कर्म साक्षात् और अनुमित ऐसे दो प्रकार के होते हैं। ।४।

साक्षात्—

५. इन्द्रियों के विषय में होने वाले,-दिखाई तथा सुनाई देने वाले एवं संकीर्तित होने वाले कर्म साक्षात् हैं। ।५।

दृष्ट यथा—

१. द्वारिका में एक ही मुकुन्द को सभी भवनों में विविध उद्यमों में लगे हुए देखकर श्रीनारद मुनि स्पन्दनरहित (निश्चेष्ट) शरीर वाले हो रहे। ।६।

यथोक्तं श्रीदशमे (भा०१०/६९/२)—

२. चित्रं बतैतदेकेन वपुषा युगपत् पृथक्।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्॥ (७)

[चित्रं बत एतद् (यत्) एकेन वपुषा पृथक् गृहेषु द्व्यष्टसाहस्रं स्त्रियः युगपत् एकः उदावहत्॥]

यथा वा—

३. क्व स्तन्यगन्धिवदनेन्दुरसौ शिशुस्ते
गोवर्धनः शिखररुद्धघनः क्व चायम्?
भोः पश्य सव्यकर-कन्दुकिताचलेन्द्रः
खेलन्निव स्फुरति हन्त किमिन्द्रजालम्? (८)

[क्व असौ ते स्तन्यगन्धिमुखेन्दुः शिशुः, क्व च अयं शिखररुद्धघनः गोवर्धनः। भोः पश्य! सव्यकर-कन्दुकिताचलेन्द्रः खेलन् इव स्फुरति। हन्त! किम् इन्द्रजालम्?॥]

श्रुतं, यथा—

४. यान्यक्षिपन् प्रहरणानि भटाः स देवः
प्रत्येकमच्छिनदमूनि शरत्रयेण।
इत्याकलय्य युधि कंसरिपोः प्रभावं
स्फारेक्षणः क्षितिपतिः पुलकी तदासीत्॥ (९)

[भटाः यानि प्रहरणानि अक्षिपन्; अमूनि प्रत्येकं शरत्रयेण सः देवः अच्छिनत्। इति कंसरिपोः युधि प्रभावम् आकलय्य क्षितिपतिः तदा स्फारेक्षणः पुलकी (च) आसीत्॥]

सङ्कीर्तितं, यथा—

५. डिम्भाः स्वर्णनिभाम्बरा घनरुचो जाताश्चतुर्बाहवो
वत्साश्चेति वदन् कृतोऽस्मि विवशः स्तम्भश्रिया पश्यत[१]।
आश्चर्यं कथयामि वः शृणुत भोः प्रत्येकमेकैकशः
स्तूयन्ते जगदण्डवद्भिरभितस्ते हन्त पद्मासनैः॥ (१०)

[डिम्भाः वत्साः च स्वर्णनिभाम्बराः घनरुचः चतुर्बाहवः च जाताः, इति वदन् (अहं) पश्यत स्तम्भश्रिया विवशः कृतः अस्मि। वः आश्चर्यं कथयामि, भोः! शृणुत, हन्त ते प्रत्येकम् एकैकशः जगदण्डवद्भिः पद्मासनैः अभितः स्तूयन्ते।]

यथा श्रीदशम में (भा. १०/६९/२)—

२. *अहो! कैसा आश्चर्य है! एक ही श्रीकृष्ण ने एक ही शरीर से पृथक्-पृथक् भवनों में (एक ही मुहूर्त्त में) सोलह हजार कन्याओं से विवाह किया।* ।७।

और भी यथा—

३. *कहाँ तो तुम्हारा यह दुधमुँहा बालक, जिसके मुख़चन्द्र से अभी माँ के दूध की सुगन्ध आती है, और कहाँ यह बादलों को रोकते हुए से शिखरों वाला महान् पर्वत गोवर्धन! अरे देखो तो! उस पर्वत को भी यह तो बाँये हाथ पर गेंद की तरह उठाये हुए मानो खेल रहा-सा दिखता है! हाय! क्या यह कोई इन्द्रजाल (जादू का खेल) है?* ।८।

श्रुत यथा—

४. *शत्रु योद्धाओं ने जो अस्त्र फेंके उन्हें उन देव (दिव्य शक्तिशाली श्रीकृष्ण) ने प्रत्येक को तीन-तीन बाणों से काट डाला—ऐसा कंसरिपु का (नरकासुर के साथ) युद्ध में पराक्रम-प्रभाव सुनकर राजा (परीक्षित्) की आँखें फैल गईं और पूरा शरीर पुलकित हो उठा।* ।९।

संकीर्त्तित यथा—

५. *"सभी ग्वाल-बालक तथा बछड़े भी सुनहरे पीताम्बर पहने हुए, मेघ जैसी कान्ति वाले, चार भुजाओं वाले हो गये"- ऐसा कहते हुए मैं स्तम्भ की शोभा से कैसा विवश हो रहा हूँ, देखो तो! अरे आप सब सुनो! बड़े आश्चर्य की बात कहता हूँ—अरे! प्रत्येक अलग-अलग ब्रह्माण्डों के पद्मासन-ब्रह्माओं द्वारा इन चतुर्भुज रूप में विराजमान गोप-बालकों की स्तुति की जा रही है। वे सुशोभित हो रहे हैं।* ।१०।

अनुमितं, यथा—

६. उन्मील्य व्रजशिशवो दृशं पुरस्ता-
द्भाण्डीरं पुनरतुलं विलोकयन्तः।
सात्मानं पशुपटलीञ्च तत्र दावाद्-
उन्मुक्तां मनसि चमत्क्रियामवापुः॥ (११)

[व्रजशिशवः दृशम् उन्मील्य पुरस्तात् पुनः अतुलं भाण्डीरं सात्मानं पशुपटलीं च दावाद् मुक्तां तत्र विलोकयन्तः मनसि चमत्क्रियाम् अवापुः॥]

६. अप्रियादेः क्रिया कुर्यान्नालौकिक्यपि विस्मयम्।
असाधारण्यपि मनाक् करोत्येव प्रियस्य सा[२]॥ (१२)

[अप्रियादेः अलौकिकी क्रिया अपि विस्मयं न कुर्यात्, प्रियस्य मनाक् असाधारणी अपि सा (विस्मयं) करोति एव॥]

७. प्रियात् प्रियस्य किमुत सर्वलोकोत्तरोत्तरा।
इत्यत्र विस्मये प्रोक्ता रत्यनुग्रह-माधुरी॥ (१३)

[किम् उत प्रियात् प्रियस्य सर्वलोकोत्तरोत्तरा! इति अत्र विस्मये रत्यनुग्रहमाधुरी प्रोक्ता॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरसनिरूपणे
अद्भुतभक्तिरसलहरी द्वितीया॥

अनुमित यथा—

६. *व्रज के ग्वाल-बालकों ने आँखें खोलकर अपने सामने पुनः अतुल भाण्डीर वन को, पशु-समूह को यथा अपने आप को दावानल से मुक्त देखा तो चित्त में अतीव चमत्कृत हो गये।* ।११।

६. अप्रिय लोगों की अलौकिक क्रिया भी चित्त में विस्मय उत्पन्न नहीं करती, और प्रिय व्यक्ति की थोड़ी भी असाधारण क्रिया विस्मित कर देती है। ।१२।

७. फिर प्रियों से भी अधिक प्रिय की सभी लोकोत्तरों से भी बढ़ी-चढ़ी अलौकिक दिव्य क्रियाओं का तो कहना ही क्या! इस प्रकार यहाँ विस्मयरति के अनुग्रह की माधुरी कही गई। ।१३।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में यह दूसरी अद्भुतभक्तिरस-लहरी समाप्त हुई॥

अनुमितं, यथा—

६. उन्मील्य व्रजशिशवो दृशं पुरस्ता-
द्भाण्डीरं पुनरतुलं विलोकयन्तः।
सात्मानं पशुपटलीञ्च तत्र दावाद्-
उन्मुक्तां मनसि चमत्क्रियामवापुः॥ (११)

[व्रजशिशवः दृशम् उन्मील्य पुरस्तात् पुनः अतुलं भाण्डीरं सात्मानं पशुपटलीं च दावाद् मुक्तां तत्र विलोकयन्तः मनसि चमत्क्रियाम् अवापुः॥]

६. अप्रियादेः क्रिया कुर्यान्नालौकिक्यपि विस्मयम्।
असाधारण्यपि मनाक् करोत्येव प्रियस्य सा[2]॥ (१२)

[अप्रियादेः अलौकिकी क्रिया अपि विस्मयं न कुर्यात्, प्रियस्य मनाक् असाधारणी अपि सा (विस्मयं) करोति एव॥]

७. प्रियात् प्रियस्य किमुत सर्वलोकोत्तरोत्तरा।
इत्यत्र विस्मये प्रोक्ता रत्यनुग्रह-माधुरी॥ (१३)

[किम् उत प्रियात् प्रियस्य सर्वलोकोत्तरोत्तरा! इति अत्र विस्मये रत्यनुग्रहमाधुरी प्रोक्ता॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरसनिरूपणे
अद्भुतभक्तिरसलहरी द्वितीया॥

अनुमित यथा—

> ६. *व्रज के ग्वाल-बालकों ने आँखें खोलकर अपने सामने पुनः अतुल भाण्डीर वन को, पशु-समूह को यथा अपने आप को दावानल से मुक्त देखा तो चित्त में अतीव चमत्कृत हो गये। ।११।*

६. अप्रिय लोगों की अलौकिक क्रिया भी चित्त में विस्मय उत्पन्न नहीं करती, और प्रिय व्यक्ति की थोड़ी भी असाधारण क्रिया विस्मित कर देती है। ।१२।

७. फिर प्रियों से भी अधिक प्रिय की सभी लोकोत्तरों से भी बढ़ी-चढ़ी अलौकिक दिव्य क्रियाओं का तो कहना ही क्या! इस प्रकार यहाँ विस्मयरति के अनुग्रह की माधुरी कही गई। ।१३।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में यह दूसरी अद्भुतभक्तिरस-लहरी समाप्त हुई॥

वीरभक्तिरसाख्या-तृतीय लहरी

१. सैवोत्साहरतिः स्थायी विभावाद्यैर्निजोचितैः।
आनीयमाना स्वाद्यत्वं वीरभक्तिरसो भवेत्॥ (१)

[सा एव उत्साहरतिः स्थायी, निजोचितैः विभावाद्यैः स्वाद्यत्वं नीयमाना वीरभक्तिरसः भवेत्॥]

२. युद्ध-दान-दया-धर्मैश्चतुर्धा वीर उच्यते।
आलम्बन इह प्रोक्त एष एव चतुर्विधः॥ (२)

[वीरः युद्ध-दान-दया-धर्मैः चतुर्धा उच्यते। एषः एव चतुर्विधः वीरः इह आलम्बनः प्रोक्तः॥]

३. उत्साहस्त्वेष भक्तानां सर्वेषामेव सम्भवेत्॥ (३)

[एषः उत्साहः सर्वेषाम् एव भक्तानां सम्भवेत्॥]

तत्र युद्धवीरः—

४. परितोषाय कृष्णस्य दधदुत्साहमाहवे।
सखा बन्धुविशेषो वा युद्धवीर इहोच्यते॥ (४)

[कृष्णस्य परितोषाय आहवे उत्साहं दधत् सखा, बन्धुविशेषः वा इह युद्धवीरः उच्यते॥]

५. प्रतियोद्धा मुकुन्दो वा तस्मिन् वा प्रेक्षके स्थिते।
तदीयेच्छावशेनात्र भवेदन्यः सुहृद्वरः॥ (५)

[प्रतियोद्धा मुकुन्दो वा, तस्मिन् प्रेक्षके स्थिते वा, तदीयेच्छावशेन अत्र अन्यः सुहृद्वरः भवेत्॥]

तत्र कृष्णो, यथा—

१. अपराजितमानिनं हठा-
च्चटुलं त्वामभिभूय माधव!
धिनुयामधुना सुहृद्गणं
यदि न त्वं समरात् पराञ्चसि॥ (६)

[माधव! अपराजितमानिनं त्वां चटुलं हठात् अभिभूय अधुना सुहृद्गणं धिनुयाम्, यदि त्वं समरात् न पराञ्चसि॥]

तृतीय लहरी—वीरभक्तिरस

१. उत्साहरति ही स्वयं स्थायिभाव हुए अपने उचित विभाव आदि के द्वारा स्वाद्यता को प्राप्त करायी जाती हुई (आस्वाद्य बनती हुई) वीरभक्तिरस होती है। ।१।

२. वीरभक्तिरस युद्ध, दान, दया और धर्म से विशेषित होकर चार प्रकार का कहा जाता है, ऐसा चार प्रकारों का वीर यहाँ आलम्बन कहा गया है। ।२।

३. यह उत्साह (रति) सभी भक्तों में विद्यमान है। ।३।

युद्धवीर—

४. श्रीकृष्ण के परितोष के लिये युद्ध के प्रति उत्साह धारण करने वाला सखा या विशेष बन्धु यहाँ युद्धवीर कहा जाता है। ।४।

५. यहाँ स्वयं मुकुन्द प्रतियोद्धा होंगे अथवा यदि वे प्रेक्षक बने हों तो उनकी इच्छानुसार कोई दूसरा मित्र प्रतियोद्धा हो सकता है। ।५।

कृष्ण (प्रतियोद्धा)—

१. *माधव! अपने आप को अपराजित मानने वाले, बहुत बोलने वालें तुम्हें अभी हठात् हराकर मैं सब मित्रों को आनन्दित करता हूँ यदि तुम ही (डर के मारे) युद्ध से भाग न जाओ!* *।६।*

यथा वा—

२. संरम्भप्रकटीकृत-प्रतिभटारम्भ-श्रियोः साद्भुतं
कालिन्दीपुलिने वयस्यनिकरैरालोक्यमानस्तदा।
अव्युत्थापित-सख्ययोरपि वराहङ्कार[१]-विस्फूर्जितः
श्रीदाम्नश्च बकीद्विषश्च समराटोपः पटीयानभूत्॥ (७)

[संरम्भप्रकटीकृत-प्रतिभटारम्भ-श्रियोः अव्युत्थापितसख्ययोः अपि कालिन्दीपुलिने साद्भुतं विलोक्यमानः श्रीदाम्नः च बकीद्विषः च वराहङ्कारविस्फूर्जितः समराटोपः तदा पटीयान् अभूत्॥]

सुहृद्वरो[२], यथा-

३. सखिप्रकरमार्गणानगणितान् क्षिपन् सर्वत-
स्तथाद्य लगुडं क्रमाद् भ्रमयति स्म दामा कृती।
अमंस्त रचितस्तुतिर्व्रजपतेस्तनुजोऽप्यमुं
समृद्धपुलको यथा लगुडपञ्जरान्तः स्थितम्॥ (८)

[अगणितान् सखिप्रकरमार्गणान् सर्वतः क्षिपन् दामा कृती अस्य लगुडं तथा क्षिपति स्म यथा रचितस्तुतिः समृद्धपुलकः व्रजपतेः तनुजः अपि अमुं लगुडपञ्जरान्तः स्थितम् अमँस्त॥]

६. प्रायः प्रकृति-शूराणां स्वपक्षैरपि कर्हिचित्।
युद्धकेलिसमुत्साहो जायते परमाद्भुतः॥ (९)

[प्रकृतिशूराणां कर्हिचित् प्रायः स्वपक्षैः अपि परमाद्भुतः युद्धकेलि-समुत्साहः जायते॥]

तथा च हरिवंशे—

४. तथा गाण्डीवधन्वानं विक्रीडन्मधुसूदनः।
जिगाय भरतश्रेष्ठं कुन्त्याः प्रमुखतो विभुः॥ इति। (१०)

[मधुसूदनः विभुः तथा विक्रीडन् कुन्त्याः प्रमुखतः गाण्डीवधन्वानं भरतश्रेष्ठं जिगाय॥]

७. कत्थितास्फोट-विस्पर्धा-विक्रमास्त्रग्रहादयः।
प्रतियोधस्थिताः सन्तो भवन्त्युद्दीपना इह॥ (११)

[कत्थितास्फोट-विस्पर्धा-विक्रमास्त्रग्रहादयः प्रतियोधस्थिताः सन्तः अमी उद्दीपनाः भवन्ति॥]

और यथा—

२. *मैत्री अखण्डित रहते हुए भी संरम्भ (युद्धवीररस का स्वाभाविक कोप) से परस्पर प्रतियोद्धा की शोभा प्रकट करने वाले, श्रीदामा तथा पूतनारि श्रीकृष्ण का यमुना तट पर श्रेष्ठ अहङ्कार से विस्फूर्जित युद्ध का आटोप (विस्तार) बड़ी कुशलता से हुआ, जिसे सब सखा-गण बड़े आश्चर्य से देख रहे थे। ।७।*

सुहृद्वर (मित्र-प्रतियोद्धा) यथा—

३. *सखाओं के समूह द्वारा चारों ओर से एक साथ फेंके जाते हुए छोटे बाणों को अपना डण्डा वेग से घुमाता हुआ वीर श्रीदामा ऐसे दूर फेंक दे रहा था कि उसकी प्रशंसा करते हुए, पुलकित हुए नन्दकुमार भी उसे (श्रीदामा को) डण्डे के पिंजरे के भीतर स्थित जैसा मान रहे थे। ।८।*

६. प्रकृति से ही शूर लोगों में कभी-कभी अपने पक्षवालों के साथ भी युद्ध का खेल खेलने का परम अद्‌भुत समुत्साह उत्पन्न होता है। ।९।

यथा हरिवंश में—

४. *कुन्ती के सामने अर्जुन से युद्ध-खेल खेलते हुए विभु मधुसूदन ने गाण्डीव-धारी भरत-श्रेष्ठ को जीत लिया। ।१०।*

७. यहाँ प्रतियोद्धा में स्थित कत्थित (डींग मारना, शेखी बघारना) आस्फोट (ताल ठोकना), विस्पर्धा (विशेष प्रतिद्वन्द्विता, होड़) विक्रम, अस्त्रग्रहण आदि उद्दीपन होते हैं। ।११।

तत्र कत्थितम्, यथा—

५. पिण्डीशूरस्त्वमिह सुबलं कैतवेनाबलाङ्गं
जित्वा दामोदर! युधि वृथा मा कृथाः कत्थितानि।
माद्यन्नेष त्वदलघुभुजासर्प-दर्पापहारी
मन्द्रध्वानो नटति निकटे स्तोककृष्णः कलापी॥ (१२)

[दामोदर! पिण्डीशूरः त्वम् इह कैतवेन अबलाङ्गं सुबलं युधि जित्वा वृथा कत्थितानि मा कृथाः; त्वदलघुभुजासर्पदर्पापहारी मन्द्रध्वानः एषः स्तोककृष्णः कलापी निकटे नटति॥]

८. कत्थिताद्याः स्वसंस्थाश्चेदनुभावाः प्रकीर्तिताः।
तथैवाहोपुरुषिका क्ष्वेडिताक्रोशवल्गनम्॥ (१३)

[कत्थिताद्याः स्वसंस्थाः चेत् अनुभावाः प्रकीर्तिताः। आहोपुरुषिका क्ष्वेडिताक्रोशवल्गनं तथा एव॥]

९. असहायेऽपि युद्धेच्छा समरादपलायनम्।
भीताभयप्रदानाद्या विज्ञेयाश्चापरे बुधैः॥ (१४)

[असहाये अपि युद्धेच्छा, समरात् अपलायनम्, भीताभयप्रदानाद्याः च बुधैः अपराः (अनुभावाः) विज्ञेयाः॥]

तत्र कत्थितम्, यथा—

६. प्रोत्साहयस्यतितरां किमिवाग्रहेण
मां केशिसूदन! विदन्नपि भद्रसेनम्।
योद्धुं बलेन सममत्र सुदुर्बलेन
दिव्यार्गलाप्रतिभटस्त्रपते भुजो मे॥ (१५)

[केशिसूदन! मां भद्रसेनं विदन् अपि किम् इव आग्रहेण अतितराम् प्रोत्साहयसि। सुदुर्बलेन बलेन समम् अत्र योद्धुं मे दिव्या-अर्गला-प्रतिभटः भुजः त्रपते॥]

आहोपुरुषिका, यथा—

७. धृताटोपे गोपेश्वर-जलधिचन्द्रे परिकरं
निबध्नत्युल्लासाद् भुजसमरचर्यासमुचितम्।
सरोमाञ्चं क्ष्वेडा-निबिड-मुखबिम्बस्य नटतः
सुदाम्नः सोत्कण्ठं जयति मुहुराहोपुरुषिका॥ (१६)

[गोपेश्वर-जलधि-चन्द्रे धृताटोपे अत्युल्लासात् भुजसमरचर्यासमुचितं परिकरं निबध्नति सरोमाञ्चं नटतः क्ष्वेडा-निबिड-मुखबिम्बस्य सुदाम्नः आहोपुरुषिका सोत्कण्ठम् मुहुः जयति॥]

कत्थित (उद्दीपन) यथा—

५. *अरे खाने भरके शूर दामोदर! बलरहित या दुर्बल शरीर वाले इस सुबल को भी युद्ध में धोखे से हराकर व्यर्थ ही अपनी शेखी न जताओ! तुम्हारे समान ही भुजारूपी सर्पों का दर्प हरण करने वाला यह स्तोककृष्णरूपी मयूर मन्द्रध्वनि करता हुआ निकट ही घूम (नाच) रहा है।* ।१२।

८. कत्थित आदि अपने भीतर हो तो अनुभाव कहे गये हैं, उसी प्रकार आहोपुरुषिका (दर्प के कारण अपने को बंहुत मानना), क्ष्वेडित (सिंहनाद), आक्रोश, वल्गन (युद्ध के लिये पैंतरे बदलना) भी अनुभाव हैं। ।१३।

९. असहाय में भी युद्ध की इच्छा, समर से न भागना, भयभीत को अभय-प्रदान करना आदि अन्य भी अनुभाव बुधजनों ने कहे हैं। ।१४।

कत्थित (अनुभाव) यथा—

६. *हे केशिसूदन (केशी-दैत्य को मारने वाले कृष्ण)! मुझ भद्रसेन को भली-भाँति जानते हुए भी क्यों व्यर्थ ही आग्रह से मुझे अतिशय उकसा रहे हो! बहुत कम बल वाले बलराम के साथ युद्ध करने में मेरा दिव्य अर्गला का प्रतिद्वन्द्वी बाहु लज्जित होता है।* ।१५।

आहोपुरुषिका यथा—

७. *श्रीनन्द-यशोदा रूपी गोपेश्वर-जलधि में उत्पन्न श्रीकृष्णचन्द्र के "मैं ही सर्वोत्कृष्ट योद्धा हूँ, तुम सब छुटभैये मेरे सामने क्या हो?"—ऐसा आटोप धारण करने पर अद्भुत समरचर्या के लिये समुचित फेंटा कसते हुए और सिंह की तरह गर्जन से भरे मुखवाले, रोमाञ्च-सहित नाचते-कूदते हुए उत्कण्ठित सुदामा द्वारा वैसा ही दर्पयुक्त अपना बड़प्पन जताने की जय हो।* ।१६।

१०. चतुष्टयेऽपि वीराणां निखिला एव सात्त्विकाः।
गर्वावेग-धृति-व्रीडा-मति-हर्षावहित्थिकाः।
अमर्षोत्सुकतासूयास्मृत्याद्या व्यभिचारिणः॥ (१७)

[वीराणां चतुष्टये अपि निखिलाः एव सात्त्विकाः। गर्वावेग-धृति-व्रीडा-मति-हर्षावहित्थिकाः अमर्षोत्सुकता-असूया-स्मृति-आद्याः व्यभिचारिणः॥]

११. युद्धोत्साहरतिस्त्वस्मिन् स्थायिभावतयोदिता।
या स्वशक्तिसहायाद्यैराहार्या सहजापि वा।
जिगीषा स्थेयसी युद्धे सा युद्धोत्साह ईर्यते॥ (१८)

[तस्मिन् युद्धोत्साहरतिः स्थायिभावतया उदिता, या स्वशक्तिसहायाद्यैः उदिता, अपि वा सहजा, युद्धे या स्थेयसी जिगीषा सा युद्धोत्साहः ईर्यते॥]

तत्र स्वशक्त्या आहार्योत्साहरतिर्यथा—

८. स्वतातशिष्ट्या स्फुटमप्यनिच्छ-
न्नाहूयमानः[3] पुरुषोत्तमेन।
स स्तोककृष्णो धृतशुद्धतृष्णः
प्रोद्यम्य दण्डं भ्रमयाञ्चकार॥ (१९)

[स्वतातशिष्ट्या स्फुटम् अनिच्छन् अपि पुरुषोत्तमेन आहूयमानः सः धृतशुद्धतृष्णः स्तोककृष्णः दण्डं प्रोद्यम्य भ्रमयाञ्चकार॥]

स्वशक्त्या सहजोत्साहरतिर्यथा—

९. शुण्डाकारं प्रेक्ष्य मे[4] बाहुदण्डं
मा त्वं भैषीः क्षुद्र रे भद्रसेन!
हेलारम्भेणाद्य निर्जित्य रामं
श्रीदामाहं कृष्णमेवाह्वयेय[5]॥ (२०)

[रे क्षुद्र भद्रसेन! त्वं मे शुण्डाकारं बाहुदण्डं प्रेक्ष्य मा भैषीः। अद्य हेलारम्भेण रामं निर्जित्य अहं श्रीदामा कृष्णम् एव आह्वयेय॥]

१०. वीरों का चतुष्टय (चार प्रकार) होने पर भी ये सभी सात्त्विक हैं। यहाँ गर्व, आवेग, धृति, व्रीड़ा (लज्जा), मति, हर्ष, अवहित्था; अमर्ष, उत्सुकता, असूया, स्मृति आदि व्यभिचारीभाव हैं। ।१७।

११. इस वीर भक्तिरस में युद्ध के लिये उत्साहरति स्थायीभाव के रूप से रहती है, जो अपनी शक्ति एवं सहाय आदि के द्वारा आहार्य होती है अथवा सहज भी होती है। युद्ध में स्थिर रहने वाली विजय की इच्छा को ही युद्ध का उत्साह कहा जाता है। ।१८।

अपनी शक्ति से आहार्य उत्साहरति यथा—

८. अपने पिता के आदेश ("किसी से युद्ध मत करना") के कारण प्रकट रूप से न चाहता हुआ भी वह स्तोककृष्ण पुरुषोत्तम (श्रीकृष्ण) के द्वारा युद्ध के लिये उकसा कर बुलाया जाता हुआ, डण्डा उठाकर घुमाने लगा। ।१९।

अपनी शक्ति से सहज उत्साहरति यथा—

९. अरे क्षुद्र भद्रसेन! तुम मेरे सूँड जैसे बाहुदण्ड को देखकर मत डरो। आज तो मैं श्रीदामा खेल ही खेल में पहले ही बलराम को जीतकर (फिर) कृष्ण को भी ललकारने वाला हूँ। ।२०।

१०. चतुष्टयेऽपि वीराणां निखिला एव सात्त्विकाः।
गर्वावेग-धृति-व्रीडा-मति-हर्षावहित्थिकाः।
अमर्षोत्सुकतासूयास्मृत्याद्या व्यभिचारिणः॥ (१७)

[वीराणां चतुष्टये अपि निखिलाः एव सात्त्विकाः। गर्वावेग-धृति-व्रीडा-मति-हर्षावहित्थिकाः अमर्षोत्सुकता-असूया-स्मृति-आद्याः व्यभिचारिणः॥]

११. युद्धोत्साहरतिस्त्वस्मिन् स्थायिभावतयोदिता।
या स्वशक्तिसहायाद्यैराहार्या सहजापि वा।
जिगीषा स्थेयसी युद्धे सा युद्धोत्साह ईर्यते॥ (१८)

[तस्मिन् युद्धोत्साहरतिः स्थायिभावतया उदिता, या स्वशक्तिसहायाद्यैः उदिता, अपि वा सहजा, युद्धे या स्थेयसी जिगीषा सा युद्धोत्साहः ईर्यते॥]

तत्र स्वशक्त्या आहार्योत्साहरतिर्यथा—

८. स्वतातशिष्ट्या स्फुटमप्यनिच्छ-
न्नाहूयमानः[3] पुरुषोत्तमेन।
स स्तोककृष्णो धृतशुद्धतृष्णः
प्रोद्यम्य दण्डं भ्रमयाञ्चकार॥ (१९)

[स्वतातशिष्ट्या स्फुटम् अनिच्छन् अपि पुरुषोत्तमेन आहूयमानः सः धृतशुद्धतृष्णः स्तोककृष्णः दण्डं प्रोद्यम्य भ्रमयाञ्चकार॥]

स्वशक्त्या सहजोत्साहरतिर्यथा—

९. शुण्डाकारं प्रेक्ष्य मे[4] बाहुदण्डं
मा त्वं भैषीः क्षुद्र रे भद्रसेन!
हेलारम्भेणाद्य निर्जित्य रामं
श्रीदामाहं कृष्णमेवाह्वयेय[5]॥ (२०)

[रे क्षुद्र भद्रसेन! त्वं मे शुण्डाकारं बाहुदण्डं प्रेक्ष्य मा भैषीः। अद्य हेलारम्भेण रामं निर्जित्य अहं श्रीदामा कृष्णम् एव आह्वयेय॥]

१०. वीरों का चतुष्टय (चार प्रकार) होने पर भी ये सभी सात्त्विक हैं। यहाँ गर्व, आवेग, धृति, व्रीड़ा (लज्जा), मति, हर्ष, अवहित्था; अमर्ष, उत्सुकता, असूया, स्मृति आदि व्यभिचारीभाव हैं। ।१७।

११. इस वीर भक्तिरस में युद्ध के लिये उत्साहरति स्थायीभाव के रूप से रहती है, जो अपनी शक्ति एवं सहाय आदि के द्वारा आहार्य होती है अथवा सहज भी होती है। युद्ध में स्थिर रहने वाली विजय की इच्छा को ही युद्ध का उत्साह कहा जाता है। ।१८।

अपनी शक्ति से आहार्य उत्साहरति यथा—

८. अपने पिता के आदेश ("किसी से युद्ध मत करना") के कारण प्रकट रूप से न चाहता हुआ भी वह स्तोककृष्ण पुरुषोत्तम (श्रीकृष्ण) के द्वारा युद्ध के लिये उकसा कर बुलाया जाता हुआ, डण्डा उठाकर घुमाने लगा। ।१९।

अपनी शक्ति से सहज उत्साहरति यथा—

९. अरे क्षुद्र भद्रसेन! तुम मेरे सूँड जैसे बाहुदण्ड को देखकर मत डरो। आज तो मैं श्रीदामा खेल ही खेल में पहले ही बलराम को जीतकर (फिर) कृष्ण को भी ललकारने वाला हूँ। ।२०।

यथा वा—

१०. बलस्य बलिनो बलात् सुहृदनीकमालोडयन्
पयोधिमिव मन्दरः कृतमुकुन्दपक्षग्रहः।
जनं विकटगर्जितैर्बधिरयन् स धीरस्वरो
हरेः प्रमदमेककः समिति भद्रसेनो व्यधात्॥ (२१)

[बलिनः बलस्य सुहृदनीकं बलात् पयोधिं मन्दरः इव आलोडयन् कृतमुकुन्दपक्षग्रहः सः धीरस्वरः भद्रसेनः जनं विकटगर्जितैः बधिरयन् हरेः प्रमदं समिति व्यधात्॥]

सहायेनाहार्योत्साहरतिर्यथा—

११. मयि वल्गति भीमविक्रमे
भज भङ्गं न हि सङ्गरादितः।
इति मित्रगिरा वरूथपः
सविरूपं विरुवन् हरिं ययौ॥ (२२)

["मयि भीमविक्रमे वल्गति सङ्गरादितः भङ्गं न हि भज,"-इति मित्रगिरा वरूथपः सविरूपं विरुवन् हरिं ययौ॥].

सहायेन सहजोत्साहरतिर्यथा—

१२. संग्रामकामुकभुजः स्वयमेव कामं
दामोदरस्य विजयाय कृती सुदामा।
साहाय्यमत्र सुबलः कुरुते बली चे-
ज्जातो मणिः सुजटितो वरहाटकेन॥ (२३)

[सङ्ग्रामकामुकभुजः दामोदरस्य विजयाय कामं कृती सुदामा स्वयम् एव, बली सुबलः अत्र साहाय्यं कुरुते चेत् मणिः वरहाटकेन सुजटितः जातः॥]

१२. सुहृदेव प्रतिभटो वीरे कृष्णस्य न त्वरिः।
स भक्तक्षोभकारित्वाद् रौद्रे त्वालम्बनो रसे।
रागाभावो दृगादीनां रौद्रादस्य विभेदकः॥ (२४)

[प्रतिभटाः वीरे कृष्णस्य सुहृत् एव न तु अरिः। सः भक्तक्षोभकारित्वात् रौद्रे रसे तु आलम्बनः। दृगादीनां रागाभावः अस्य रौद्रात् विभेदकः॥]

अथवा यथा—

१०. *बलशाली बलराम की मित्रमण्डलीरूपी सेना को बलपूर्वक मन्दर पर्वत से क्षीरसागर की भाँति झकझोरते मथते हुए मुकुन्द का पक्ष लिये हुए उस धीर-स्वर-वाले भद्रसेन ने अपने विकट गर्जन से लोगों को बहरा-सा करते हुए युद्ध में हरि को आनन्द दिया। ।२१।*

सहाय के द्वारा आहार्य उत्साहरति यथा—

११. *"(शत्रु के लिये) भयङ्कर विक्रम वाले मेरे रहते तुम युद्ध आदि छोड़कर भागना नहीं!"-ऐसी मित्र की वाणी से (साहस पाकर) वह वरूथप नामक सखा घोर गर्जन करते हुए हरि (श्रीकृष्ण) की ओर बढ़े। ।२२।*

सहाय के कारण सहज उत्साहरति यथा—

१२. *संग्राम की इच्छुक भुजाओं वाला सुदामा (सखा) श्रीकृष्ण को जीतने में स्वयं ही समर्थ था, उसपर फिर बलशाली सुबल साहाय्य् करता हो तो अच्छा ही है, यह तो मणि का शुद्ध स्वर्ण में जटित होने जैसा हुआ। ।२३।*

१२. वीररस में सखा ही कृष्ण के प्रतिभट (युद्ध करनेवाला दूसरा पक्ष) होते हैं, शत्रु नहीं। शत्रु तो भक्त में क्षोभ उत्पन्न करता है इसलिये वह रौद्ररस में आलम्बन होता है। इसका रौद्र से भेद नेत्रों में लाली आदि के अभाव से होता है। ।२४।

अथ दानवीरः—

१३. द्विविधो दानवीरः स्यादेकस्तत्र बहुप्रदः।
उपस्थितदुरापार्थत्यागी चापर उच्यते॥ (२५)

[दानवीरः द्विविधः स्यात्, तत्र एकः बहुप्रदः, अपरः च उपस्थितदुरापार्थत्यागी उच्यते॥]

तत्र बहुप्रदः—

१४. सहसा दीयते येन स्वयं सर्वस्वमप्युत।
दामोदरस्य सौख्याय प्रोच्यते स बहुप्रदः॥ (२६)

[दामोदरस्य सौख्याय येन स्वयं सर्वस्वम् अपि सहसा दीयते, सः बहुप्रदः॥]

१५. सम्प्रदानस्य वीक्षाद्या अस्मिन्नुद्दीपना मताः।
वाञ्छिताधिकदातृत्वं स्मितपूर्वाभिभाषणम्॥ (२७)

[अस्मिन् सम्प्रदानस्य वीक्षाद्याः उद्दीपनाः मताः। वाञ्छिताधिकदातृत्वं स्मितपूर्वाभिभाषणम्॥]

१६. स्थैर्य-दाक्षिण्य-धैर्याद्या अनुभावा इहोदिताः।
वितर्कौत्सुक्यहर्षाद्या विज्ञेया व्यभिचारिणः॥ (२८)

[स्थैर्य-दाक्षिण्य-धैर्याद्याः अनुभावाः इह उदिताः। वितर्कौत्सुक्य-हर्षाद्याः व्यभिचारिणः विज्ञेयाः॥]

१७. दानोत्साहरतिस्त्वत्र स्थायिभावतयोदिता।
प्रगाढा स्थेयसी दित्सा दानोत्साह इतीर्यते॥ (२९)

[दानोत्साहरतिः तु अत्र स्थायिभावतया उदिता। प्रगाढा स्थेयसी दित्सा दानोत्साहः इति ईर्यते॥]

१८. द्विधा बहुप्रदोऽप्येष विद्वद्भिरिह कथ्यते।
स्यादाभ्युदयिकस्त्वेकः परस्तत्सम्प्रदानकः॥ (३०)

[एषः बहुप्रदः अपि इह विद्वद्भिः द्विधा कथ्यते। एकः तु आभ्युदयिकः परः तत् सम्प्रदानकः॥]

तत्र आभ्युदयिकः—

१९. कृष्णस्याभ्युदयार्थं तु येन सर्वस्वमर्प्यते।
अर्थिभ्यो ब्राह्मणादिभ्यः स आभ्युदयिको भवेत्॥ (३१)

[कृष्णस्य अभ्युदयार्थं येन ब्राह्मणादिभ्यः अर्थिभ्यः सर्वस्वम् अर्प्यते सः आभ्युदयिकः भवेत्॥]

दानवीर—

१३. दानवीर दो प्रकार का होता है; एक है बहुत प्रमाण में देने वाला, दूसरा-अपने पास की दुर्लभ वस्तु भी दे देने वाला। ।२५।

बहुप्रद—

१४. जिसके द्वारा दामोदर के सौख्य (सुख-सुविधा) के लिये अपना सर्वस्व भी सहसा दे दिया जाता है, वह बहुप्रद कहलाता है। ।२६।

१५-१६. इसमें सम्प्रदान की वीक्षा (विशेष ईक्षा) आदि उद्दीपन माने गये हैं। जितना चाहा गया हो उससे अधिक देना, मुस्कान के साथ सामने से स्वयं बोलना, स्थिरता, दाक्षिण्य (अनुकूलता युक्त कुशलता), धीरता आदि यहाँ अनुभाव कहे गये हैं। वितर्क, औत्सुक्य, हर्ष आदि व्यभिचारीभाव जानने चाहियें। ।२७-२८।

१७. यहाँ दान के प्रति उत्साह-रूपा रति स्थायीभाव मानी गई है। स्थिर एवं प्रगाढ़ देने की इच्छा ही दानोत्साह कहलाता है। ।२९।

१८. यह बहुप्रद भी विद्वद्जनों द्वारा दो प्रकार का कहा जाता है—एक आभ्युदयिक, दूसरा तत्-सम्प्रदानक। ।३०।

आभ्युदयिक—

१९. श्रीकृष्ण के अभ्युदय के लिये जिसके द्वारा ब्राह्मण आदि इच्छुक-याचकों को सर्वस्व दे डाला जाता है, वह आभ्युदयिक होता है। ।३१।

यथा—

१३. व्रजपतिरिह सूनोर्जातकार्थं तथासौ
व्यतरदमलचेताः सञ्चयं नैचिकीनाम्।
पृथुरपि नृगकीर्तिः साम्प्रतं संवृतासीद्
इति निजगदुरुच्चैर्भूसुरा येन तृप्ताः॥ (३२)

[अमलचेताः असौ व्रजपतिः इह सूनोः जातकार्थं नैचिकीनां सञ्चयं तथा व्यतरत येन "पृथुः अपि नृगकीर्त्तिः साम्प्रतं संवृता आसीत्" इति तृप्ताः भूसुरा उच्चैः निजगदुः॥]

अथ तत्सम्प्रदानकः—

२०. ज्ञातये हरये स्वीयमहन्ताममतास्पदम्।
सर्वस्वं दीयते येन स स्यात्तत्सम्प्रदानकः॥ (३३)

[येन ज्ञातये हरये स्वीयम् अहन्ताममतास्पदं सर्वस्वं दीयते, सः सम्प्रदानकः स्यात्॥]

२१. तद्दानं प्रीतिपूजाभ्यां भवेदित्युदितं द्विधा। (३४)

[तद् दानं प्रीति-पूजाभ्यां द्विधा भवेत् इति उदितम्॥]

तत्र प्रीतिदानम्—

२२. प्रीतिदानं तु तस्मै यद् दद्यात् बन्ध्वादिरूपिणे। (३५)

[यत् तु बन्धु-आदि रूपिणे तस्मै दद्यात् (तत्) प्रीतिदानम्॥]

यथा—

१४. चार्चिक्यं वैजयन्तीं पटमुरुपुरटोद्भासुरं भूषणानां
श्रेणिं माणिक्यभाजं गजरथतुरगान् कर्बुरान् कर्बुरेण।
दत्त्वा राज्यं कुटुम्बं स्वमपि भगवते दित्सुरप्यन्यदुच्चै-
र्देयं कुत्राप्यदृष्ट्वा मखसदसि तदा व्याकुलः पाण्डवोऽभूत्॥
(३६)

[मखसदसि पाण्डवः चार्चिक्यम्, माणिक्यभाजं वैजयन्तीम्, उरुपुरटोद्भासुरं पटम्, भूषणानां श्रेणिम्, कर्बुरेण कर्बुरान् गजरथतुरगान्, राज्यम्, स्वम् कुटुम्बम् अपि भगवते दत्वा उच्चैः अन्यत् अपि दित्सु कुत्र अपि देयम् अदृष्ट्वा तदा व्याकुलः अभूत्॥]

यथा—

१३. शुद्ध-स्वच्छ-चित्त-वाले इन व्रजपति (नन्द) ने यहाँ पुत्र के जातकर्म के उपलक्ष्य में अपनी उत्तम गायों का समूह ब्राह्मणों को ऐसा दे डाला कि तृप्त हुए द्विजों ने उच्च स्वर से कहा—महादानी नृग की विशाल कीर्त्ति भी अब (इसके सामने)संवृत (सिमटी हुई) हो गयी। ।३२।

तत्सम्प्रदानक—

२०. जिसके द्वारा बन्धु (सगे-सम्बन्धी) श्रीकृष्ण को अपना अहन्ताममता का आस्पद सर्वस्व ('यह मैं हूँ, यह मेरा है'-कहा जाने वाला सब-कुछ) दिया जाता है, वह तत्सम्प्रदानक होता है। ।३३।

२१. वह दान प्रीतिपूर्वक अथवा पूजाभाव से होता है इस प्रकार वह दो प्रकार का कहा गया है। ।३४।

प्रीतिदान—

२२. जो उन (श्रीकृष्ण) को अपना सगा-सम्बन्धी बन्धु मानते हुए (उस नाते से) दिया जाता है वह प्रीतिदान है। ।३५।

यथा—

१४. तनु पर लेप करने या लगाने योग्य सुगन्धमय शृङ्गारसामग्री-चन्दन-केशर-कस्तूरी आदि, माणिक-रत्न आदि से जटित वैजयन्ती माला, ज़री से सुनहले रेशमी वस्त्र, विविध आभूषणों की पंक्तियाँ, सोने के आभरणों से सुसज्जित हाथी-घोड़े, राज्य, कुटुम्ब तथा अपने आप को भी भगवान् को देकर फिर और भी कुछ उन्हें देने की इच्छा होने पर, किन्तु देने योग्य कुछ भी न देख पाकर राजसूय-यज्ञ की सभा में पाण्डुपुत्र युधिष्ठिर व्याकुल हो गया। ।३६।

पूजादानम्—

२३. पूजादानन्तु तस्मै यद्विप्ररूपाय दीयते। (३७)

[विप्ररूपाय तस्मै यद् दीयते, तत् तु पूजादानम्॥]

यथा अष्टमे (भा०८/२०/११)—

१५. यजन्ति यज्ञं क्रतुभिर्यमादृता
भवन्त आम्नायविधानकोविदाः।
स एव[६] विष्णुर्वरदोऽस्तु वाऽपरो
दास्याम्यमुष्मै क्षितिमीप्सितां मुने! (३८)

[मुने! आम्नायविधानकोविदाः भवन्तः आदृताः क्रतुभिः यं यज्ञं यजन्ति सः वरदः विष्णुः एव, अपरः वा अस्तु, अमुष्मै ईप्सितां क्षितिं दास्यामि॥]

यथा वा दशरूपके—

१६. लक्ष्मीपयोधरोत्सङ्ग-कुङ्कुमारुणितो हरेः।
बलिनैव स येनास्य भिक्षापात्रीकृतः करः॥ (३९)

[अस्य हरेः लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितः सः करः येन बलिना एव भिक्षापात्रीकृतः॥]

अथ उपस्थित-दुरापार्थत्यागी—

२४. उपस्थितदुरापार्थत्यागयसौ येन नेष्यते।
हरिणा दीयमानोऽपि सार्ष्ट्यादिस्तुष्यता वरः॥ (४०)

[असौ उपस्थितदुरापार्थत्यागी येन तुष्यता हरिणा दीयमानः सार्ष्टि-आदिः अपि न इष्यते॥]

२५. पूर्वतोऽत्र विपर्यस्तकारकत्वं द्वयोर्भवेत्।
अस्मिन्नुद्दीपनाः कृष्णकृपालाप-स्मितादयः॥ (४१)

[अत्र पूर्वतः द्वयोः विपर्यस्त-कारकत्वं भवेत्। कृष्णकृपालाप-स्मितादयः अस्मिन् उद्दीपनाः।।]

२६. अनुभावास्तदुत्कर्षवर्णन-द्रढिमादयः।
अत्र सञ्चारिता भूम्ना धृतेरेव समीक्ष्यते॥ (४२)

[तदुत्कर्षवर्णन-द्रढिमादयः अनुभावाः, अत्र भूम्ना धृतेः एव सञ्चारिता समीक्ष्यते॥]

पूजादान—

२३. ब्राह्मण-रूपधारी श्रीकृष्ण को जो दिया जाय वह पूजादान है। ।३७।

यथा-अष्टम स्कन्ध में (भा० ८/२०/११)—

१५. *(बलि शुक्राचार्य से कहते हैं—) हे मुनि! वेद-शास्त्रों के विधान के तत्त्वज्ञ एवं प्रवीण आप आदरपूर्वक यज्ञों द्वारा जिनका पूजन करते हैं वे वर देने वाले विष्णु (सामने) हों अथवा अन्य कोई भी (याचक रूप में सामने खड़ा) हो, इसे इसके द्वारा चाही हुई भूमि अवश्य दूँगा। ।३८।*

अथवा दशरूपक में—

१६. *इन श्रीहरि का, लक्ष्मी के वक्षःस्थल में लगे कुङ्कुम के सङ्ग से अरुणवर्ण हुआ वह (दाहिना) हाथ जिस वस्तुतः बलवान् (दैत्यराज बलि) के द्वारा भिक्षापात्र बना दिया गया। ।३९।*

उपस्थित-दुरापार्थत्यागी—

२४. स्वयं श्रीहरि के द्वारा सन्तुष्ट होकर सालोक्य-सार्ष्टि आदि दुर्लभ वर दिये जाने पर भी जो उसे नहीं लेता, त्याग देता है, वह सामने आयी दुर्लभ वस्तु का भी त्याग करने वाला कहलाता है। ।४०।

२५. इसमें पहले की अपेक्षा विपरीत कारक होता है, अर्थात् भक्त सम्प्रदान (जिसे दिया जाता है) एवं भगवान अपादान (जहाँ से दिया जाता है) होते हैं। यहाँ श्रीकृष्ण की कृपा, आलाप (बोलना), स्मित आदि उद्दीपन हैं। ।४१।

२६. यहां श्रीकृष्ण के उत्कर्ष का वर्णन, उनकी दृढ़ता आदि अनुभाव हैं। यहां धृति की ही अतिशय सहित सञ्चारिता है। ।४२।

२७. त्यागोत्साहरतिर्धीरैः स्थायी भाव इहोदितः।
त्यागेच्छा[७] तादृशी प्रौढा त्यागोत्साह इतीर्यते[८]॥ (४३)

[इह धीरैः त्यागोत्साहरतिः स्थायी भावः उदितः। तादृशी प्रौढा त्यागेच्छा त्यागोत्साहः इति ईर्यते॥]

यथा हरिभक्तिसुधोदये—

१७. स्थानाभिलाषी[९] तपसि स्थितोऽहं
त्वां प्राप्तवान्[१०] देवमुनीन्द्रगुह्यम्[११]।
काचं विचिन्वन्नपि[१२] दिव्यरत्नं
स्वामिन्! कृतार्थोऽस्मि वरं न याचे॥ (४४)

[(देव!) अहं स्थानाभिलाषी तपसि स्थितः काचं विचिन्वन् अपि दिवयरत्नम् (इव) त्वां देवमुनीन्द्रगुह्यं प्राप्तवान्, कृतार्थः अस्मि। स्वामिन्! वरं न याचे॥]

यथा वा तृतीये (भा०३/१५/४८)—

१८. नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किम्वन्यदर्पितभयं भ्रुव उन्नयैस्ते।
येऽङ्ग! त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्त्तन्यतीर्थयशसः कुशला रसज्ञाः॥ (४५)

[अङ्ग! ये त्वदङ्घ्रिशरणाः, भवतः कीर्तन्य-तीर्थ-यशसः कथायाः कुशलाः रसज्ञाः, ते आत्यन्तिकम् अपि ते (तव) प्रसादम् न विगणयन्ति, किं नु ते भ्रुवः उन्नयैः अर्पितभयम् अन्यत्?]

२८. अयमेव भवन्नुच्चैः प्रौढभावविशेषभाक्।
धुर्यादीनां तृतीयस्य वीरस्य पदवीं व्रजेत्॥ (४६)

[अयम् एव उच्चैः प्रौढभावविशेषभाक् भवन् धुर्यादीनां तृतीयस्य वीरस्य पदवीं व्रजेत्॥]

अथ दयावीरः—

२९. कृपार्द्रहृदयत्वेन खण्डशो देहमर्पयन्।
कृष्णायाच्छन्नरूपाय दयावीर इहोच्यते॥ (४७)

[कृपार्द्रहृदयत्वेन आच्छन्नरूपाय कृष्णाय खण्डशः (स्व-)देहम् अर्पयन् इह दयावीरः उच्यते॥]

२७. धीर जनों ने यहाँ त्याग के उत्साह-रूपा रति को स्थायीभाव कहा है। उस प्रकार की प्रौढ़ त्याग की इच्छा को त्योगोत्साह कहा जाता है। ।४३।

यथा हरिभक्तिसुधोदय में:—

१७. हे भगवन्! मैं तो स्थान की अभिलाषा से तपस्या में लगा हुआ था, इसी में मुझे आप मिल गये जो कि बड़े-बड़े श्रेष्ठ मुनियों को भी दुर्लभ हैं, हे स्वामिन्! यह तो ऐसा ही हुआ मानो काँच ढूँढ़ते हुए को दिव्य रत्न मिल गया, इसीलिये मैं कृतार्थ हूँ, अब और कोई वर नहीं माँग रहा हूँ। ।४४।

अथवा यथा तृतीय स्कन्ध में (भा० ३/१५/४८)—

१८. हे प्रिय (भगवन्)! जो आपके चरणों की शरण लिये हुए हैं, जो कीर्तनीय आपके यश की कथा के कुशल रसज्ञ (रस को समझने वाले) हैं, वे आपके चरम प्रसाद (मोक्ष) को भी कुछ नहीं गिनते (यशोगान व कथारस की तुलना में मोक्ष को भी नगण्य मानते हैं), फिर अन्य (स्वर्ग-सम्पत्ति-राज्य आदि) की तो बात ही क्या?-जो आपके भौंह के उठने-गिरने (के इशारे) पर निर्भर हैं अर्थात् सीमित कालव्यापी हैं। ।४५।

२८. यहा प्राप्त हुई दुर्लभ वस्तु का त्याग करने वाला श्रीकृष्ण के प्रति (उच्च रूप से) प्रौढ़ (दास्य रूप) भावविशेष का पात्र होता हुआ, धुर्य आदि मे तृतीय वीर की पदवी प्राप्त करता है। ।४६।

दयावीर—

२९. कृपा (दया) से आर्द्र हृदय वाला होने से जो स्वरूप छिपाये हुए (किसी अन्य ही दयनीय रूप में सम्मुख स्थित) श्रीकृष्ण को अपना शरीर भी खण्ड-खण्ड करके दे देता है, उसे यहाँ दयावीर कहा जाता है। ।४७।

३०. उद्दीपना इह प्रोक्तास्तदार्तिव्यञ्जनादयः।
निजप्राणव्ययेनापि विपन्नत्राणशीलता॥ (४८)

[तदार्तिव्यञ्जनादयः इह उद्दीपनाः प्रोक्ताः। निजप्राणव्ययेन अपि विपन्नत्राणशीलता (दयावीरस्य स्वरूपम्) ॥]

३१. आश्वासनोक्तयः स्थैर्यमित्याद्यास्तत्र विक्रियाः।
औत्सुक्यमतिहर्षाद्या ज्ञेयाः सञ्चारिणो बुधैः॥ (४९)

[आश्वासनोक्तयः स्थैर्यमित्याद्याः तत्र विक्रियाः। औत्सुक्य-मति-हर्षाद्याः बुधैः सञ्चारिणः ज्ञेयाः ॥]

३२. दयोत्साहरतिस्त्वत्र स्थायिभाव उदीर्यते।
दयोद्रेकभृदुत्साहो[13] दयोत्साह इहोदितः॥ (५०)

[दयोत्साहरतिः तु अत्र स्थायिभावः उदीर्यते। दयोद्रेकभृदुत्साहः इह दयोत्साहः उदितः ॥]

यथा—

१९. वन्दे कुड्मलिताञ्जलिर्मुहुरहं वीरं मयूरध्वजं
येनार्धं कपटद्विजाय वपुषः कंसद्विषे दित्सता॥
कष्टं गद्गदिकाकुलोऽस्मि कथनारम्भादहो धीमता
सोल्लासं क्रकचेन दारितमभूत् पत्नीसुताभ्यां शिरः॥ (५१)

[कुड्मलिताञ्जलिः अहं वीरं मयूरध्वजं मुहुः वन्दे, येन कपटद्विजाय कंसद्विषे वपुषः अर्धं धित्सता धीमता सोल्लासं क्रकथेन पत्नीसुताभ्यां शिरः दारितम् अभूत्। कष्टं कथनारम्भात् अहो! गद्गदिताकुलः अस्मि ॥],

३३. हरेश्चेत्तत्त्वविज्ञानं नैवास्य घटते दया।
तदभावे त्वसौ दानवीरेऽन्तर्भवति स्फुटम्॥ (५२)

[हरेः तत्त्वविज्ञानं चेत् अस्य दया न एव घटते, तदभावे तु असौ दानवीरे स्फुटम् अन्तर्भवति ॥]

३४. वैष्णवत्वाद् रतिः कृष्णे क्रियतेऽनेन सर्वदा।
कृतात्र द्विजरूपे च भक्तिस्तेनास्य भक्तता॥ (५३)

[वैष्णवत्वात् अनेन सर्वदा कृष्णे रतिः क्रियते। अत्र द्विजरूपे च भक्तिः कृता। तेन अस्य भक्तता ॥]

३०. उस (दयनीय रूप में स्थित भगवान्) के द्वारा आर्त्ति (करुण दशा या विपद्ग्रस्तता) व्यक्त किया जाना आदि यहाँ उद्दीपन कहे गये हैं। अपने प्राण भी खर्च करके विपद्ग्रस्त की रक्षा करने का शील होना (दयावीर का स्वरूप है।) ।४८।

३१. आश्वासन के वचन, स्थिरता इत्यादि इसमें विक्रियायें हैं। औत्सुक्य, मति, हर्ष आदि को सुज्ञ व्यक्तियों ने यहाँ सञ्चारी कहा है। ।४९।

३२. दया-उत्साह-रति यहाँ स्थायिभाव कहा जाता है, दया के उद्रेक से युक्त उत्साह ही दयोत्साह है। ।५०।

यथा—

१९. *अञ्जलि बाँधे हुए मैं वीर मयूरध्वज को बारम्बार वन्दन करता हूँ, जिस सुधीरबुद्धिशाली ने कपटवेष में ब्राह्मण बने हुए कंसशत्रु श्रीकृष्ण को अपने शरीर का आधा भाग देने की इच्छा से उल्लासपूर्वक आरे से पत्नी एवं पुत्र के द्वारा मस्तक चिरवा दिया था। अरे! यह कहना आरम्भ करते ही मैं कण्ठ गद्गद हो आने से आकुल हो उठा हूँ।* ।५१।

३३. यदि भक्त में श्रीहरि का तत्त्वविज्ञान हो (पहचान हो कि ये स्वयं भगवान् हैं) तो फिर दया नहीं हो सकती। दया न हो तो फिर वह दानवीर ही होगा यह स्पष्ट है। ।५२।

३४. वैष्णव होने के नाते भक्त की रति श्रीकृष्ण में सर्वदा होती है। यहाँ (मयूरध्वज के प्रसङ्ग) में ब्राह्मणरूप में भक्ति प्रकट हुई है, (वह भी श्रीहरि का ही रूप है) इसलिये वह भी भक्त ही है। ।५३।

३५. अन्तर्भावं वदन्तोऽस्य दानवीरे दयात्मनः।
वोपदेवादयो धीरा वीरमाचक्षते त्रिधा॥ (५४)

[दयात्मनः दानवीरे अन्तर्भावं वदन्तः बोपदेवादयः धीराः वीरं त्रिधा आचक्षते॥]

अथ धर्मवीरः—

३६. कृष्णैकतोषणे धर्मे यः सदा परिनिष्ठितः।
प्रायेण धीरशान्तस्तु धर्मवीरः स उच्यते॥ (५५)

[यः सदा कृष्णैकतोषणे परिनिष्ठितः, सः धीरः शान्तः तु धर्मवीरः उच्यते॥]

३७. उद्दीपना इह प्रोक्ताः सच्छास्त्रश्रवणादयः।
अनुभावा नयास्तिक्य-सहिष्णुत्व-यमादयः।
मति-स्मृति-प्रभृतयो विज्ञेया व्यभिचारिणः॥ (५६)

[सच्छास्त्रश्रवणादयः इह उद्दीपनाः प्रोक्ताः। नय-आस्तिक्य-सहिष्णुत्व-यमादयः अनुभावाः। मति-स्मृतिप्रभृतयः व्यभिचारिणः विज्ञेयाः॥]

३८. धर्मोत्साहरतिर्धीरैः स्थायी भाव इहोच्यते।
धर्मैकाभिनिवेशस्तु धर्मोत्साहो मतः सताम्॥ (५७)

[इह धीरैः धर्मोत्साहरतिः स्थायी भावः उच्यते। धर्मैकाभिनिवेशः तु सतां धर्मोत्साहः मतः॥]

यथा—

२०. भवदभि-रतिहेतून् कुर्वता सप्ततन्तून्
पुरमभि पुरुहूते नित्यमेवोपहूते।
दनुजदमन! तस्याः पाण्डुपुत्रेण गण्डः
सुचिरमरचि शच्याः सव्यहस्ताङ्कशायी॥ (५८)

[दनुजदमन! भवदभिरतिहेतून् सप्ततन्तून् कुर्वता पाण्डुपुत्रेण नित्यम् एव पुरम् अभि उपहूते पुरुहूते तस्याः शच्याः गण्डः सुचिरम् सव्यहस्ताङ्कशायी अरचि॥]

३९. यज्ञः पूजा-विशेषोऽस्य भुजाद्यङ्गानि वैष्णवैः।
ध्यात्वेन्द्राद्याश्रयत्वेन यदेष्वाहुतिरर्प्यते॥ (५९)

[यज्ञः अस्य पूजाविशेषः भुजादि-अङ्गानि इन्द्राद्याश्रयत्वेन ध्यात्वा यत् एषु वैष्णवैः आहुतिः अर्प्यते॥]

३५. दयात्मक वीर का दानवीर में अन्तर्भाव कहने वाले बोपदेव आदि धीर (बुद्धिशाली) वीर को तीन प्रकार का बताते हैं। ।५४।

धर्मवीर—

३६. जो सदा एकमात्र श्रीकृष्ण को ही सन्तोष देने में परिनिष्ठित रहता है वह धीरशान्त धर्मवीर कहलाता है। ।५५।

३७. यहा सत्-शास्त्रों का श्रवण आदि उद्दीपन कहे गये हैं; नय, आस्तिक्य, सहिष्णुता, यम आदि अनुभाव और मति, स्मृति आदि व्यभिचारी भाव जानने चाहिये। ।५६।

३८. धीर व्यक्तियों ने यहां धर्मोत्साह-रति को स्थायी भाव कहा है। एकमात्र धर्म में अभिनिवेश ही सज्जनों के मत से धर्मोत्साह है। ।५७।

यथा—

२०. हे दनुजों का दमन करने वाले प्रभो! आपके प्रति रति कराने वाले यज्ञ करता रहता हुआ पाण्डव (युधिष्ठर) नित्य ही इन्द्र को अपने पुर (इन्द्रप्रस्थ) में बुला लेता है, इससे (प्रतीक्षारत) उस शची (इन्द्राणी) का कपोल बाँये हाथ पर ही बहुत समय से ठहर गया है। ।५८।

३९. यज्ञ ही भगवान् की विशेष पूजा है क्योंकि उनके भुजा आदि अङ्ग इन्द्र आदि के आश्रय हैं ऐसा ध्यान करते हुए ही वैष्णवों द्वारा उनमें आहुति दी जाती है। ।५९।

४०. अयन्तु साक्षात्तस्यैव निदेशात् कुरुते मखान्।
युधिष्ठिरोऽम्बुधिः[१४] प्रेम्णां महाभागवतोत्तमः॥ (६०)

[अयं महाभागवतोत्तमः प्रेम्णाम् अम्बुधिः युधिष्ठिरः तु साक्षात् तस्य एव निदेशात् मखान् कुरुते॥]

४१. दानादित्रिविधं वीरं वर्णयन्तः परिस्फुटम्[१५]।
धर्मवीरं न मन्यन्ते कतिचिद्धनिकादयः॥ (६१)

[कतिचित् धनिकादयः दानादि-त्रिविधं वीरं वर्णयन्तः धर्मवीरं न मन्यन्ते॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरसनिरूपणे वीरभक्तिरस-लहरी तृतीया॥

४०. यह उत्तम महाभागवत, प्रेम-प्रवाहों का सागर युधिष्ठिर तो साक्षात् उन (श्रीकृष्ण) के ही निदेश से अनेकों यज्ञ करता रहता है। ।६०।

४१. कुछ धनिक आदि (विद्वान) दानवीर आदि तीन ही प्रकार के वीरों का वर्णन करते हुए धर्मवीर (कोटि) को नहीं मानते हैं। ।६१।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में तीसरी वीरभक्तिरस-लहरी समाप्त हुई॥

करुणभक्तिरसाख्या-चतुर्थलहरी

१. आत्मोचितैर्विभावाद्यैर्नीता पुष्टिं सतां हृदि।
भवेच्छोकरतिर्भक्तिरसो हि[१] करुणाभिधः॥ (१)

[आत्मोचितैः विभावाद्यैः सतां हृदि पुष्टिं नीता शोकरतिः हि करुणाभिधः भक्तिरसः भवेत्॥]

२. अव्युच्छिन्न[२]-महानन्दोऽप्येष प्रेमविशेषतः।
अनिष्टाप्तेः पदतया वेद्यः कृष्णोऽस्य च प्रियः।। (२)

[एषः अव्युच्छिन्न-महानन्दः अपि प्रेमविशेषतः अनिष्टाप्तेः पदतया वेद्यः कृष्णः, अस्य प्रियः च॥]

३. तथानवाप्ततद्भक्तिसौख्यश्च स्वप्रियो जनः।
इत्यस्य विषयत्वेन ज्ञेया आलम्बनास्त्रिधा॥ (३)

[तथा-अनवाप्त-तद्भक्ति-सौख्यः च स्वप्रियः जनः, इति अस्य विषयत्वेन आलम्बनाः त्रिधा ज्ञेयाः॥]

४. तत्तद्वेदी, तद्भक्तः च आश्रयत्वेन च त्रिधा।
सोऽप्यौचित्येन विज्ञेयः प्रायः शान्तादिवर्जितः।
तत्कर्मगुणरूपाद्या भवन्त्युद्दीपना इह॥ (४)

[तत्तद्वेदी, तद्भक्तः च आश्रयत्वेन च त्रिधा। सः अपि औचित्येन प्रायः शान्त्यादिवर्जितः विज्ञेयः। तत्कर्मगुणरूपाद्याः उद्दीपनाः भवन्ति॥]

५. अनुभावा मुखे शोषो विलापः स्रस्तगात्रता।
श्वासक्रोशनभूपात-घातोरस्ताडनादयः॥ (५)

[(अत्र)—मुखे शोषः, विलापः, स्रस्तगात्रता, श्वास-क्रोशन-भूपात-घात-उरस्ताडनादयः अनुभावाः॥]

६. अत्राष्टौ सात्त्विका जाड्यनिर्वेदग्लानिदीनताः।
चिन्ता विषाद औत्सुक्य-चापलोन्माद-मृत्यवः।
आलस्यापस्मृतिव्याधिमोहाद्या व्यभिचारिणः॥ (६)

[अत्र अष्टौ सात्त्विकाः, जाड्य-निर्वेद-ग्लानि-दीनताः, चिन्ता, विषादः, औत्सुक्य-चापल-उन्माद-मृत्यवः, आलस्य-अपस्मृति-व्याधि-मोहाद्याः व्यभिचारिणः।।]

चतुर्थ लहरी—करुणभक्तिरस

१. सज्जनों के चित्त में अपने अनुकूल विभाव आदि के साथ पुष्ट हुई शोकरति ही करुण-नामक भक्तिरस है। ।१।

२-३. इस करुण रस के विषय रूप से आलम्बन तीन प्रकार से बनते हैं-

१. स्वयं श्रीकृष्ण, कभी न मिटने वाला महान् आनन्द उनका स्वरूप होते हुए भी प्रेमविशेष के कारण भक्तों द्वारा उनका अनिष्ट होने की आशङ्का की जाती है अतः वे करुण रस के विषय हैं। ।२।

२. उनके प्रियजन

३. श्रीकृष्ण के भक्तों के प्रियजन (बन्धु-बान्धव) जिन्हें श्रीकृष्ण-भक्ति का सुख प्राप्त नहीं हुआ (उनके प्रति भक्तों को करुणा का अनुभव होता है।) ।३।

४. उक्त तीनों प्रकार से करुण-विषयालम्बनों को जानने के नाते श्रीकृष्णभक्त करुणरस के तीन प्रकार से आश्रय होते हैं। वह भी औचित्य के अनुसार शान्त आदि रसालम्बन को छोड़कर ही करुण रस के आश्रयालम्बन जानने चाहियें। श्रीकृष्ण के कर्म, गुण, रूप आदि यहाँ उद्दीपन होते हैं। ।४।

५. मुँह सूखना, विलाप, अङ्ग ढीले पड़ जाना, लम्बी साँसें लेना, चिल्लाना, धरती पर गिरना, धरती पर आघात करना, छाती पीटना आदि यहाँ अनुभाव होते हैं। ।५।

६. यहाँ आठों सात्त्विक भाव होते हैं। तथा जड़ हो जाना, निर्वेद, ग्लानि, दीनता, चिन्ता, विषाद, उत्सुकता, चपलता, उन्माद, मृत्यु, आलस्य, अपस्मृति, व्याधि, मोह (मूर्च्छा) आदि व्यभिचारीभाव होते हैं। ।६।

७. हृदि शोकतयांशेन³ गता परिणतिं रतिः।
उक्ता शोकरतिः सैव स्थायी भाव इहोच्यते॥ (७)

[शोकतया अंशेन हृदि परिणतिं गता रतिः शोकरतिः (इति) उक्ता; सा एव इह स्थायी भावः उच्यते॥]

तत्र कृष्णो, यथा श्रीदशमे (भा०१०/१६/१०)—

१. तं नागभोगपरिवीतमदृष्टचेष्ट-
मालोक्य तत्प्रियसखाः पशुपा भृशार्ताः।
कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामाः
दुःखाभिशोकभयमूढधियो निपेतुः॥ (८)

[नागभोगपरिवीतम् अदृष्टचेष्टं तम् आलोक्य तत्प्रियसखाः भृशार्ताः कृष्णेऽर्पितात्मसुहृद्-अर्थ-कलत्र-कामाः दुःख-अभिशोक-भय-मूढधियः पशुपाः निपेतुः॥]

यथा वा—

२. फणिह्रदमवगाढे दारुणं पिञ्छचूडे
स्खलदशिशिर⁴-बाष्पस्तोम-धौतोत्तरीया।
निखिलकरणवृत्तिस्तम्भिनीमाललम्बे
विषमगतिमवस्थां गोष्ठराजस्य राज्ञी॥ (९)

[पिच्छचूडे दारुणं फणिह्रदम् अवगाढे स्खलदशिशिर-बाष्प-स्तोम-धौतोत्तरीया गोष्ठराजस्य राज्ञी निखिलकरणवृत्तिस्तम्भिनीं विषमगतिम् अवस्थाम् आललम्बे॥]

तस्य प्रियजनो, यथा—

३. कृष्णप्रियाणामाकर्षे शङ्खचूडेन निर्मिते।
नीलाम्बरस्य वक्त्रेन्दुर्नीलिमानं मुहुर्दधे॥ (१०)

[शङ्खचूडेन कृष्णप्रियाणाम् आकर्षे निर्मिते नीलाम्बरस्य वक्त्रेन्दुः मुहुः नीलिमानम् दधे॥]

७. शोक-दशा के कारण हृदय में अंशतः परिणत हुई रति शोकरति कही गई है। वही यहाँ स्थायीभाव है। ।७।

इसके दृष्टान्तरूप श्रीकृष्ण यथा दशम में (भा० १०/१६/१०)—

१. *(श्रीकृष्ण को) कालियनाग के फणों से घिरा हुआ, नागपाश में जकड़ा होने से जिसकी चेष्टायें (हिल-डोल) दिखाई नहीं दे रहीं ऐसा देखकर उनके प्रिय सखा-गण तथा गोप आतिशय आर्त होकर (उन) श्रीकृष्ण के प्रति ही अपनी समस्य कामनायें, मित्र, स्त्री-परिवार, धन अपने आप तक को अर्पित किये हुए, दुःखी, तन-मन सब में फैले शोक एवं भय से मूढ़-बुद्धि-वाले होकर धरती पर गिर पड़े। ।८।*

अथवा—

२. *मयूरपिच्छ जिनके मस्तक पर है ऐसे श्रीकृष्ण के भीषण कालीदह में कूद पड़ने पर, व्रजेश (नन्द) की रानी (यशोदा)-जिसके उष्ण अश्रुओं की झरने जैसी धारा से आँचल धुल रहा था—समस्त इन्द्रियों की वृत्तियों को स्तम्भित करने वाली विषमगति उत्पन्न करती हुई अवस्था (मूर्च्छा) को पहुँच गई। ।९।*

उनके प्रियजन, यथा—

३. *शङ्खचूड (यक्ष) के द्वारा श्रीकृष्ण की प्रिया सखियों को बलपूर्वक खींच लिये जाने पर नीलवसनधारी (बलराम) का मुखचन्द्र बारम्बार नीला पड़ने लगा। ।१०।*

स्वप्रियो, यथा हंसदूते—

४. विराजन्ते यस्य व्रजशिशुकुलस्तेयविकल-
स्वयम्भूचूडाग्रैर्लुलितशिखराः पादनखराः।
क्षणं यानालोक्य प्रकटपरमानन्दविवशः
स देवर्षिर्मुक्तानपि मुनिगणान् शोचति भृशम्॥ (११)

[यस्य पादनखराः व्रजशिशुकुलस्तेयविकलस्वयम्भूचूडाग्रैः लुलितशिखराः विराजन्ते, यान् क्षणम् आलोक्य प्रकटपरमानन्दविवशः अपि सः देवर्षिः मुक्तान् मुनिगणान् भृशं शोचति॥]

यथा वा—

५. मातर्माद्रि! गता कुतस्त्वमधुना हा क्वासि पाण्डो पितः!
सान्द्रानन्द-सुधाब्धिरेष युवयोर्नाभूद् दृशां गोचरः।
इत्युच्चैर्नकुलानुजो विलपति प्रेक्ष्य प्रमोदाकुलो
गोविन्दस्य पदारविन्दयुगलप्रोद्दामकान्तिच्छटाम्॥ (१२)

[गोविन्दस्य पदारविन्दयुगलप्रोद्दामकान्तिच्छटां प्रेक्ष्य प्रमोदाकुलः नकुलानुजः "मातः माद्रि! त्वम् अधुना कुतः गता? हा पितः पाण्डो! क्व असि? एष सान्द्रानन्द-सुधाब्धिः युवयोः दृशां गोचरः न अभूत्।"—इति उच्चैः विलपति॥]

८. रतिं विनापि घटते हासादेरुद्गमः क्वचित्।
कदाचिदपि शोकस्य नास्य सम्भावना भवेत्॥ (१३)

[हासादेः उद्गमः क्वचित् रतिं विना अपि घटते, अस्य शोकस्य सम्भावना कदाचित् अपि न भवेत्॥]

९. रतेर्भूम्ना कृशिम्ना च शोको भूयान् कृशश्च सः।
रत्या सहाविनाभावात् काप्येतस्य विशिष्टता॥ (१४)

[सः शोकः रतेः भूम्ना कृशिम्ना च भूयान् कृशः च। रत्या सह अविनाभावात् एतस्य का अपि विशिष्टता॥]

अपि च—

१०. कृष्णैश्वर्याद्यविज्ञानं कृतं नैषामविद्यया।
किन्तु प्रेमोत्तर-रसविशेषेणैव' तत् कृतम्॥ (१५)

[एषां कृष्णैश्वर्यादि-अविज्ञानम् न अविद्यया कृतम्, किं तु प्रेमोत्तररसविशेषेण एव तत् कृतम्॥]

अपने प्रिय, यथा हंसदूत में—

४. *जिसके चरणों के नखों पर गोपाल-बालकों को चुराने (के अपराध-बोध) से विकल ब्रह्मा के मुकुट-सहित केश लोट रहे हैं, जिन्हें क्षणभर भी देखकर प्रकट हुए परमानन्द से विवश हुए भी देवर्षि (नारद) मुक्त हो चुके हुए मुनिजनों के लिये अत्यधिक शोक करते हैं (कि बेचारे वे मुनि मोक्ष पा जाने के कारण श्रीकृष्ण के चरण-दर्शन के आनन्द से वञ्चित हैं।)* ।११।

अथवा—

५. *श्रीगोविन्द के दोनों चरण-कमलों की अतिशय भास्वर कान्ति की छटा को देखकर प्रमोद से आकुल नकुल का छोटा भाई (सहदेव) यह कहता हुआ उच्चस्वर से विलाप कर रहा है कि—हे माँ माद्रि! तुम कहाँ चली गईं? हे पिता पाण्डु! आप अब कहाँ हैं? हाय, सघन आनन्द-सुधा के सागर जैसा यह भगवान् का रूप आप दोनों के नयन नहीं देख पाये! (अर्थात् आप लोग इस आनन्द से वञ्चित रह गये।)* ।१२।

८. कहीं रति के बिना भी हास आदि का उद्गम होता है, किन्तु (रति के बिना) इस शोक की कभी भी सम्भावना नहीं। ।१३।

९. वह शोक रति के आधिक्य अथवा न्यूनता के नाते भूयान् (अधिक) या कृश होता है, रति के साथ अविनाभाव होने के कारण इस (शोक) की कुछ विशिष्टता है। ।१४।

और भी—

१०. इन (शोक रति वाले भक्तों) का श्रीकृष्ण के ऐश्वर्य आदि का अज्ञान अविद्याकृत नहीं होता, अपितु श्रीकृष्ण के प्रति अतिशय प्रेम से बढ़े रसविशेष के कारण ही (ऐश्वर्य आदि भूलना) उत्पन्न होता है। ।१५।

११. अंतः प्रादुर्भवन् शोको लब्ध्वाऽप्युद्भटतां[६] मुहुः।
दुरूहामेव तनुते गतिं सौख्यस्य कामपि॥ (१६)

[ततः प्रादुर्भवन् शोकः मुहुः उद्भटतां लब्ध्वा अपि सौख्यस्य काम् अपि दुरूहाम् एव गतिं तनुते॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरसनिरूपणे करुणभक्तिरस-लहरी चतुर्थी॥

११ वह शोक बारम्बार उद्भट होता हुआ भी सुख की ही किसी दुरूह (समझ में न आने वाली) गति का विस्तार करता है। ।१६।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में चौथी करुणभक्तिरस-लहरी समाप्त हुई॥

रौद्रभक्तिरसाख्या—पञ्चमलहरी

१. नीता क्रोधरतिः पुष्टिं विभावाद्यैर्निजोचितैः।
हृदि भक्तजनस्यासौ रौद्रभक्तिरसो भवेत्॥ (१)

[असौ क्रोधरतिः निजोचितैः विभावाद्यैः भक्तजनस्य हृदि पुष्टिं नीता रौद्रभक्तिरसः भवेत्॥]

२. कृष्णो हितोऽहितश्चेति क्रोधस्य विषयस्त्रिधा।
कृष्णे सखी-जरत्याद्याः क्रोधस्याश्रयतां गताः।
भक्ताः सर्वविधा एव हिते चैवाहिते तथा॥ (२)

[कृष्णः, हितः, अहितः च इति क्रोधस्य त्रिधा विषयः। सखी-जरती-आद्याः कृष्णे क्रोधस्य आश्रयतां गताः। हिते तथा अहिते च एव भक्ताः सर्वविधाः एव॥]

तत्र, कृष्णे सख्याः क्रोधः—

३. [१]सखीक्रोधो भवेत् सख्याः कृष्णादत्याहिते सति। (३)

[कृष्णात् सख्याः अत्याहिते सति सखीक्रोधः भवेत्॥]

यथा विदग्धमाधवे—

१. अन्तःक्लेश-कलङ्किताः किल वयं यामोऽद्य याम्यां पुरं
नायं वञ्चन-सञ्चय-प्रणयिनं हासं तथाप्युज्झति।
अस्मिन् सम्पुटिते गभीरकपटैराभीरपल्लीविटैः
हा मेधाविनि! राधिके! तव कथं प्रेमा गरीयानभूत्? (४)

[अन्तःक्लेशकलङ्किताः वयम् अद्य याम्यां पुरं यामः। तथा अपि अयं वञ्चनसञ्चय-प्रणयिनं हासं न मुञ्चति। गभीरकपटैः आभीरपल्लीविटैः सम्पुटिते अस्मिन्, हा मेधाविनि राधिके! तव कथं गरीयान् प्रेमा अभूत्॥]

तत्र जरत्याः क्रोधः—

४. क्रोधो जरंत्या वध्वादिसम्बन्धे प्रेक्षिते हरौ। (५)

[वध्वादिसम्बन्धे प्रेक्षिते हरौ जरत्याः क्रोधः॥]

पञ्चम लहरी—रौद्रभक्तिरस

१. यह क्रोध-रति भक्तजनों के हृदय में अपने लिये उचित विभाव आदि के द्वारा पुष्टि को प्राप्त होकर रौद्र-भक्तिरस बनती है। ।१।

२. श्रीकृष्ण, हितकारी एवं अहितकारी इस प्रकार से क्रोध का विषय तीन प्रकार का होता है। श्रीकृष्ण के प्रति सखी, जरती (वृद्धा गोपी) आदि क्रोध के आश्रय होते है। हितकारी एवं अहितकारी के प्रति सभी प्रकार के भक्त क्रोध के आश्रयालम्बन होते हैं। ।२।

इनमें से श्रीकृष्ण के प्रति सखी का क्रोध—

३. श्रीकृष्ण से सखी का अतिक्रमण या सखी के प्रति उद्दण्डता होने पर सखी-क्रोध होता है। ।३।

यथा विदग्धमाधव में—

१. अन्तःक्लेश (क्षोभ, क्रोध) से दूषित हुई हम तो आज यम की पुरी को जा रही हैं (क्रोध-कष्ट से मानो मर रही है) फिर भी यह दूसरों को ठगने की ही पूँजी बटोरने वाली अपनी हँसी (सब को मोहित करने वाला हास्य) नहीं छोड़ रहा है। अहीरग्राम (गोकुल-वृन्दावन) के गहरे कपटी धूर्त मित्रों से घिरे हुए इस (गोकुलकृष्ण) के प्रति हे मेधाविनि (बुद्धिमती) राधिके! तुम्हें कैसे गुरुतर (अत्यधिक) प्रेम हो गया? ।४।

इसी में-जरती (वृद्धागोपी) का क्रोध—

४. अपनी पुत्रवधू के सम्बन्ध में श्रीकृष्ण को देख लेने पर जरती का क्रोध प्रकट होता है। ।५।

यथा—

२. अरे युवतितस्कर! प्रकटमेव वध्वाः पट-
स्तवोरसि निरीक्ष्यते बत न नेति किं जल्पसि?
अहो व्रजनिवासिनः! शृणुत किं न विक्रोशनं
व्रजेश्वरसुतेन मे सुतगृहेऽग्निरुत्थापितः ॥ (६)

[अरे युवतितस्कर! वध्वाः पटः प्रकटम् एव तव उरसि निरीक्ष्यते। बत न न इति किं जल्पसि? अहो व्रजनिवासिनः विक्रोशनं किं न शृणुत! व्रजेश्वरसुतेन मे सुतस्य गृहे अग्निः उत्थापितः ॥]

५. गोवर्धनं महामल्लं विनान्येषां व्रजौकसाम्।
सर्वेषामेव गोविन्दे रतिः प्रौढा विराजते॥ (७)

[गोवर्धनं महामल्लं विना अन्येषां सर्वेषाम् एव व्रजौकसां (हृदि) गोविन्दे प्रौढा रतिः विराजते॥]

अथ हितः—

६. हितस्त्रिधानवहितः साहसी चेर्ष्युरित्यपि। (८)

[हितः त्रिधा-अनवहितः, साहसी, अपि च ईर्ष्युः इति॥]

तत्र अनवहितः—

७. कृष्णपालनकर्तापि तत्कर्माभिनिवेशतः।
क्वचित्तत्र प्रमत्तो यः प्रोक्तोऽनवहितोऽत्र सः॥ (९)

[कृष्णपालनकर्त्ता अपि तत्कर्माभिनिवेषतः क्वचित् (अनवहितः) तत्र यः प्रमत्तः सः अत्र अनवहितः प्रोक्तः॥]

यथा—

३. उत्तिष्ठ मूढे! कुरु मा विलम्बं
वृथैव धिक् पण्डितमानिनी त्वम्।
त्रुट्यत्-पलाशि-द्वयमन्तरा ते
बद्धः सुतोऽसौ सखि! बम्भ्रमीति॥ (१०)

[मूढे! उत्तिष्ठ, विलम्बं मा कुरु। धिक्! त्वं वृथा एव पण्डितमानिनी। सखि! असौ ते बद्धः सुतः त्रुट्यत्पलाशिद्वयम् अन्तरा बम्भ्रमीति॥]

यथा-

२. *अरे युवतियों के चोर! (मेरी) बहू का वस्त्र सामने ही तेरे वक्षःस्थल पर दिखाई दे रहा है, फिर 'नहीं-नहीं' क्या बक रहे हो? अरे व्रजवासियो! मेरी चिल्लाहट क्या नहीं सुन रहे हो? व्रजेश्वर (नन्द) के बेटे ने मेरे बेटे के घर में आग लगा दी है!* ।६।

५. गोवर्धन नामक महामल्ल के सिवा अन्य सभी व्रजवासियों की गोविन्द के प्रति प्रौढा रति है। ।७।

हितकारी- (क्रोधविषय)—

६. हितकारी तीन प्रकार का होता है—अनवहित (अवधान न रखने वाला), साहसी (दुस्साहस के लिये प्रेरित करने वाला) तथा (अन्य भक्त का सेवा सौभाग्य-सुख देखकर-ईर्ष्यालु)। ।८।

उनमें अनवहित यथा—

७. श्रीकृष्ण का पालनकर्त्ता भी उन्हीं के लिये किये जाते हुए कर्म के अभिनिवेश के कारण कभी श्रीकृष्ण के प्रति प्रमाद कर बैठे, तब उसे अनवहित कहा गया है। ।९।

यथा—

३. *अरी मूढ़ (यशोदे!) उठो-उठो! विलम्ब न करो! (झटपट चलो), तुम व्यर्थ ही अपने आप को पण्डिता (समझ-बूझ वाली) माने बैठी हो; टूटकर गिरते हुए दो विशाल वृक्षों के बीच में से होता हुआ तुम्हारा (ऊखल से) बँधा हुआ बेटा घूम रहा है।* ।१०।

अथ साहसी—

८. यः प्रेरको भयस्थाने साहसी स निगद्यते। (११)

[भयस्थाने यः प्रेरकः, सः साहसी निगद्यते॥]

यथा—

४. गोविन्दः प्रियसुहृदां गिरैव यात-
स्तालानां विपिनमिति स्फुटं निशम्य।
भ्रूभेदस्थपुटितदृष्टिरास्यमेषां
डिम्भानां व्रजपतिगेहिनी ददर्श। (१२)

[गोविन्दः प्रियसुहृदां गिरा एव तालानां विपिनं यातः इति स्फुटं निशम्य व्रजपतिगेहिनी एषां डिम्भानाम् आस्यं भ्रूभेदस्थपुटितदृष्टिः ददर्श॥]

अथ ईर्ष्युः—

९. ईर्ष्युर्मानधना प्रोक्ता प्रौढेर्ष्याक्रान्तमानसा। (१३)

[मानधना प्रौढेर्ष्याक्रान्तमानसा ईर्ष्युः प्रोक्ता॥]

यथा—

५. दुर्मानमन्थमथिते! कथयामि किं ते
दूरं प्रयाहि सविधे तव जाज्वलीमि।
हा धिक् प्रियेण चिकुराञ्चितपिञ्छकोट्या
निर्मञ्छिताग्रचरणाप्युरुणाननासि[2]॥ (१४)

[दुर्मानमथिते! किं ते कथयामि, दूरं प्रयाहि तव सविधे (खलु) जाज्वलीमि। हा धिक्! प्रियेण चिकुराञ्चितपिच्छकोट्या निर्मञ्छिताग्रचरणा अपि अरुणानना असि॥]

अथ अहितः—

१०. अहितः स्याद् द्विधा स्वस्य हरेश्चेति प्रभेदतः। (१५)

[स्वस्य हरेः च प्रभेदतः अहितः द्विधा स्यात्॥]

साहसी—

८. जो भय-स्थान में जाने के लिये श्रीकृष्ण को प्रेरित करता हो वह साहसी कहा जाता है। ।११।

यथा—

४. *प्रियसखाओं की बात सुनकर (उनकी प्रेरणा से) ही गोविन्द तालवन की ओर (अकेला) चला गया है—ऐसा ग्वाल बालकों से स्पष्ट सुनकर (क्रोधसे) तनकर चढ़ी हुई भौंहों वाली विषम दृष्टि से नन्दरानी यशोदा ने उन बालकों का मुख देखा। ।१२।*

ईर्ष्यालु—

९. अत्यधिक बढ़ी हुई ईर्ष्या से आक्रान्त चित्त वाली मानिनी नायिका ईर्ष्यालु (क्रोध-विषय) कही गई है। ।१३।

यथा—

५. *दूषित मान रूपी मथनी से मथे हुए चित्त वाली तुम को भला मैं क्या कहूँ? जा दूर हट जा! तुम से तो मैं बहुत ही जल रही हूँ (यह सोचकर एवं देखकर कि) प्रियतम के घुँघराले अलकों सहित मयूर पिञ्छ (वाले मुकुट के अग्रभाग) से तेरे चरणों का अग्रभाग पोंछा जाने पर भी तुम्हारा (मान से तमतमाया) मुख अरुण बना हुआ है। ।१४।*

अहितकारी (क्रोध-विषय)—

१०. अहित करने वाला दो प्रकार का होता है-१. अपना अहितकर, २. हरि का अहितकर। ।१५।

तत्र स्वस्याहितः—

११. अहितः स्वस्य स स्याद्यः कृष्णसम्बन्धबाधकः। (१६)

[यः कृष्णसम्बन्धबाधकः सः स्वस्य अहितः स्यात्॥]

यथोद्धवसन्देशे—

६. कृष्णं मुष्णन्नकरुण बलाद्गोष्ठतो निष्ठुरस्त्वं
मा मर्यादां यदुकुलभुवां भिन्धि रे गान्दिनेय!
पश्याभ्यर्णे त्वयि रथमधिष्ठाय यात्रां विधित्सौ
स्त्रीणां प्राणैरपि नियुतशो हन्त यात्रा व्यधायि॥ (१७)

[रे अकरुण गान्दिनेय! बलात् गोष्ठतः कृष्णं मुष्णन् निष्ठुरः त्वं यदुकुलभुवां मर्यादां मा भिन्धि। पश्य अभ्यर्णे रथम् अधिष्ठाय यात्रां विधित्सौ त्वयि नियुतशः स्त्रीणां प्राणैः अपि यात्रा व्यधायि॥]

अथ हरेरहितः—

१२. अहितस्तु हरेस्तस्य वैरिपक्षो निगद्यते। (१८)

[हरेः अहितः तु तस्य वैरिपक्षः निगद्यते॥]

यथा—

७. हरौ श्रुतिशिरःशिखा-मणिमरीचिनीराजित-
स्फुरच्चरणपङ्कजेऽप्यवमतिं व्यनक्त्यत्र यः।
अयं क्षिपति पाण्डवः शमनदण्डघोरं हठात्[3]।
त्रिरस्य मुकुटोपरि स्फुटमुदीर्य सव्यं पदम्॥ (१९)

[श्रुतिशिरः शिखामणिमरीचिनीराजितस्फुरच्चरणपङ्कजे हरौ अपि अत्र यः अवमतिं व्यनक्ति, अस्य मुकुटोपरि सव्यं पदं स्फुटम् उदीर्य अयं पाण्डवः घोरं शमनदण्डं हठात् त्रिः क्षिपति॥]

१३. सोल्लुण्ठहास-वक्रोक्ति-कटाक्षानादरादयः।
कृष्णाहित-हितस्थाः स्युरमी उद्दीपना इह॥ (२०)

[कृष्णाहित-हितस्थाः अमी सोल्लुण्ठ-हास-वक्रोक्ति-कटाक्ष-अनादर-आदयः इह-उद्दीपनाः प्रोक्ता॥]

अपना अहितकर—

११. जो श्रीकृष्ण से सम्बन्ध में बाधा डाले वह अपना अहितकारी होता है। ।१६।

यथा उद्धवसन्देश में—

६. *अरे करुणाहीन निष्ठुर गान्दिनीपुत्र (अक्रूर) इस व्रज (गोष्ठ) से बलपूर्वक श्रीकृष्ण को चुराते हुए तुमने यदुवंशियों की मर्यादा तोड़ी है। देखो प्रातःकाल रथ पर चढ़कर तुम यात्रा करना चाहते थे तभी सहस्रों स्त्रियों के प्राणों ने भी प्रयाण कर डाला। ।१७।*

श्रीहरि का अहितकर—

१२. हरि का अहितकर तो उनका वैरी-पक्ष ही कहा जाता है। ।१८।

यथा—

७. *जिन के चरण-कमल वेदों के मस्तकों (उपनिषदों) पर विराजमान मुकुटमणियों की किरणों द्वारा आरती उतारने से स्फुरित हैं (वेद-उपनिषद् भी जिन्हें नमन एवं पूजन करते हैं) ऐसे हरि के प्रति भी यहाँ जो अवमति (अपमान) व्यक्त कर रहा है उस (शिशुपाल) के मुकुट पर अपना घोर शमन दण्ड जैसा बाँया पैर रखकर यह पाण्डव (भीम) तीन बार स्पष्ट बोलकर हठ-पूर्वक लानत देता है, आक्षेप प्रकट करता है। ।१९।*

१३. श्रीकृष्ण में ही जिनका हित निहित है ऐसे ये व्यङ्ग्यवचन, हास, वक्रोक्ति, कटाक्ष, अनादर आदि यहाँ उद्दीपन होंगे। ।२०।

१४. हस्तनिष्पेषणं दन्तघट्टनं रक्तनेत्रता।
दष्टौष्ठतातिभ्रुकुटी भुजास्फालनताडनाः॥ (२१)

[हस्तनिष्पेषणं दन्तघट्टनम्, रक्तनेत्रता, दष्टौष्ठता, अतिभ्रुकुटी, भुजास्फालनताडनाः॥]

१५. तूष्णीकता नतास्यत्वं निःश्वासो भुग्नदृष्टिता।
भर्त्सनं मूर्धविधूतिर्दृगन्ते पाटलच्छविः॥ (२२)

[तूष्णीकता, नतास्यत्वम्, निःश्वासः, भुग्नदृष्टिता, भर्त्सनम्, मूर्धविधूतिः, दृगन्ते पाटलच्छविः॥]

१६. भ्रूभेदाधर-कम्पाद्या अनुभावा इहोदिताः।
अत्र स्तम्भादयः सर्वे प्राकट्यं यान्ति सात्त्विकाः॥ (२३)

[भ्रूभेद-अधरकम्प-आद्याः इह अनुभावाः उदिताः। अत्र स्तम्भाद्याः सर्वे सात्त्विकाः प्राकट्यं यान्ति॥]

१७. आवेगो जडता गर्वो निर्वेदो मोहचापले।
असूयौग्रयं तथामर्ष-श्रमाद्या व्यभिचारिणः॥ (२४)

[आवेगः, जडता, गर्वः, निर्वेदः, मोहचापले, असूया, औग्रयम्, अमर्षः तथा श्रम-आद्याः (अत्र) व्यभिचारिणः॥]

१८. अत्र क्रोधरतिः स्थायी स तु क्रोधस्त्रिधा मतः।
कोपो मन्युस्तथा रोषस्तत्र कोपस्तु शत्रुगः॥ (२५)

[क्रोधरतिः अत्र स्थायी; सः क्रोधः तु त्रिधा मतः-कोपः, मन्यु तथा रोषः। तत्र कोपः तु शत्रुगः॥]

१९. मन्युर्बन्धुषु ते पूज्य-सम-न्यूनास्त्रिधोदिताः।
रोषस्तु दयिते स्त्रीणामतो व्यभिचरत्यसौ॥ (२६)

[मन्युः बन्धुषु। ते पूज्य-सम-न्यूनाः (इति) त्रिधा उदिताः। रोषः तु स्त्रीणां दयिते; अतः असौ व्यभिचरति॥]

२०. हस्तपेषादयः कोपे मन्यौ तूष्णीकतादयः।
दृगन्तपाटलत्वाद्या रोषे तु कथिताः क्रियाः॥ (२७)

[कोपे हस्तपेषादयः, मन्यौ तूष्णीकता-आदयः, रोषे तु दृगन्तपाटलत्वाद्या क्रियाः कथिताः॥]

१४. हाथ मलना, दाँत पीसना, आँखें लाल होना, अपना ओठ काटना, अतीव टेढ़ी भौंहें, गर्वपूर्वक भुजायें चलाना, भुजदण्डों पर ताल ठोकना या हाथ मारना। ।२१।

१५-१६. चुप हो रहना, मस्तक झुका लेना, झुकी या टेढ़ी दृष्टि होना, भर्त्सना करना, सिर झटकना, आँखों की कोर गुलाबी होना, भ्रुकुटी चढ़ना, ओठ काँपना—इत्यादि यहाँ अनुभाव कहे गये हैं। स्तम्भ आदि सब सात्त्विक भाव भी यहाँ प्रकट होते हैं। ।२२-२३।

१७. आवेग जड़ता, गर्व, निर्वेद, मोह, चपलता, असूया (ईर्ष्या) उग्रता, अमर्ष (असहिष्णुता) तथा श्रम आदि यहाँ व्यभिचारीभाव हैं। ।२४।

१८. क्रोधरति यहाँ स्थायीभाव है। वह क्रोध तीन प्रकार का माना गया है—कोप, मन्यु तथा रोष। इनमें से कोप शत्रु पर होता है। ।२५।

१९. मन्यु बन्धु-बान्धवों पर होता है; वे तीन प्रकार के कहे गये हैं—पूज्य, समान और छोटे। स्त्रियों का अपने प्रिय पर होता है। इसलिये वह (शृङ्गार रस में) व्यभिचारी बन जाता है। ।२६।

२०. कोप में हाथ मलना आदि, मन्यु में चुप हो रहना आदि, रोष में आँखों की कोरों में गुलाबीपन आदि क्रियायें कही गयी हैं। ।२७।

तत्र वैरिणि, यथा—

८. निरुध्य पुरमुन्मदे हरिमगाधसत्त्वाश्रयं
मृधे मगधभूपतौ किमपि वक्रमाक्रोशति।
दृशं कवलित-द्विषद्विसर-जाङ्गले-लाङ्गले॥
नुनोद दहदिङ्गल-प्रबलपिङ्गलां लाङ्गली॥ (२८)

[पुरम् निरुध्य उन्मदे मगधभूपतौ मृधे अगाधसत्त्वाश्रयं हरिं किम् अपि वक्रम् आक्रोशति कवलितद्विषद्विसरजाङ्गले लाङ्गले लाङ्गली दहदिङ्गल-पिङ्गलां दृशं नुनोद॥]

पूज्ये, यथा विदग्धमाधवे—

९. क्रोशन्त्यां करपल्लवेन बलवान् सद्यः पिधत्ते मुखं
धावन्त्यां भयभाजि विस्तृतभुजो रुन्धे पुरः पद्धतिम्।
पादान्ते विलुठत्यसौ मयि मुहुर्दष्टाधरायां रुषा
मातश्चण्डि! मया शिखण्डमुकुटादात्माभिरक्ष्यः कथम्?
(२९)

[मयि क्रोशन्त्यां (सः) बलवान् करपल्लवेन सद्यः मुखं पिधत्ते, भयभाजि धावन्त्यां विस्तृतभुजः पुरः पद्धतिं रुन्धे, रुषा मुहुः दष्टाधरायाम् असौ पादान्ते विलुठति। मातः चण्डि! शिखण्डमुकुटात् मया आत्मा कथम् अभिरक्ष्यः?]

समे, यथा—

१०. ज्वलति दुर्मुखि! मर्मणि मुर्मुर-
स्तव गिरा जटिले! निटिले च मे।
गिरिधरः स्पृशति स्म कदा मदाद्-
दुहितरं दुहितुर्मम पामरि! (३०)

[दुर्मुखि जटिले! तव गिरा मे मर्मणि निटिले च मुर्मुरः ज्वलति। पामरि! गिरिधरः कदा मदात् मम दुहितुः दुहितरं स्पृशति स्म?]

न्यूने, यथा—

११. हन्त स्वकीय-कुचमूर्ध्नि मनोहरोऽयं
हारश्चकास्ति हरिकण्ठतटी-चरिष्णुः।
भोः! पश्यत स्वकुल-कज्जलमञ्जरीयं
कूटेन मां तदपि वञ्चयते वधूटी॥ (३१)

[हन्त! हरिकण्ठतटीचरिष्णुः अयं मनोहरः हारः स्वकीयकुचमूर्ध्नि चकास्ति, तद्अपि भोः इयं स्वकुलकज्जलमञ्जरी वधूटी मां कूटेन वञ्चयते॥]

वैरी के प्रति कोप, यथा—

८. *युद्ध के समय पूरे पुर (मथुरा) को (चारों ओर से) घेरकर उन्मत्त हुए मगधराज ज़रासन्ध के वक्रभङ्गिमा से कुछ चिल्लाने पर (तिरछी बात व्यङ्ग्य कहने पर) हलधर बलराम ने शत्रुओं के समूह रूपी 'जाङ्गल' (बर्बर असभ्यों) को निगल जाने वाले अपने हल पर दहकते अङ्गारें जैसी पिङ्गल (भूरी-सुनहली) दृष्टि डाली। ।२८।*

पूज्य के प्रति, यथा विदग्धमाधव में—

९. *क्रोध के कारण चण्डी बनी हुई हे माता! मैं चिल्लाती हूँ तो वह बलवान् अपने करपल्लव से तुरन्त मुँह ढक देता है, भयभीत होकर दौड़ती हूँ तो विशाल भुजा फैलाकर सामने का मार्ग रोक लेता है—पाँव बढ़ाने नहीं देता, रोष से मैं ओठ काटती हूँ तो वह पैरों में लिपट कर लोट जाता है, ऐसे उस मयूरमुकुटधारी से मैं अपने आप की कैसे रक्षा करूँ? ।२९।*

समवयस्क के प्रति, यथा—

१०. *अरी दुर्मुखी जटिले! तेरी बात से मेरे मर्म में और मस्तक में तुषाग्नि-सी जल रही है। अरी पामर! गिरिधारी भला भला कब मदपूर्वक मेरी बेटी को स्पर्श कर रहा था? ।३०।*

न्यूनवयस्क के प्रति, यथा—

११. *हाय! हरि के कण्ठ में झूलने वाला यह मनोहर हार अपने वक्षःस्थल पर (धारण किये हुए) चमका रही है; फिर भी देखो तो! यह अपने कुल-काजल की मञ्जरी-जैसी यह बहू छलभरी (श्लेषयुक्त) बातों से मुझे ठगती है। ।३१।*

२१. अस्मिन्न तादृशो मन्यौ वर्तते रत्यनुग्रहः।
उदाहरणमात्राय तथाप्येष निदर्शितः॥ (३२)

[अस्मिन् मन्यौ तादृशः रत्यनुग्रहः न वर्तते। तथा अपि एषः उदाहरणमात्राय निदर्शितः॥]

२२. क्रोधाश्रयाणां शत्रूणां चैद्यादीनां स्वभावतः।
क्रोधो रतिविनाभावान्न भक्तिरसतां व्रजेत्॥ (३३)

[चैद्यादीनां क्रोधाश्रयाणां शत्रूणां क्रोधः स्वभावतः रतिविनाभावात् भक्तिरसतां न व्रजेत्॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरस-निरूपणे
रौद्रभक्तिरस-लहरी पञ्चमी॥

२१. इस मन्यु में वैसा रति का अनुग्रह नहीं है। फिर भी उदाहरण-भर के लिये यहाँ दिखा दिया गया। । ३२।

२२. क्रोध के आश्रयालम्बन शिशुपाल आदि शत्रुओं का स्वभावगत क्रोध रति से रहित होने के कारण भक्तिरस नहीं बनता। । ३३।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में पाँचवीं रौद्रभक्तिरस-लहरी समाप्त हुई॥

भयानकभक्तिरसाख्या—षष्ठलहरी

१. वक्ष्यमाणैर्विभावाद्यैः पुष्टिं भयरतिर्गता।
भयानकाभिधो भक्तिरसो धीरैरुदीर्यते॥ (१)

[वक्ष्यमाणैः विभावाद्यैः पुष्टिं गता भयरतिः धीरैः भयानकाभिधः भक्तिरसः उदीर्यते॥]

२. कृष्णश्च दारुणाश्चेति तस्मिन्नालम्बना द्विधा।
अनुकम्प्येषु सागस्सु कृष्णस्तस्य च बन्धुषु॥ (२)

[तस्मिन् आलम्बनाः द्विधा—कृष्णः च, दारुणाः च इति। सागःसु अनुकम्प्येषु तस्य बन्धुषु च कृष्णः॥]

३. दारुणाः स्नेहतः शश्वत्तदनिष्टाप्तिदर्शिषु।
दर्शनाच्छ्रवणाच्चेति स्मरणाच्च प्रकीर्तिताः॥ (३)

[स्नेहतः शश्वत् तदनिष्टाप्तिदर्शिषु दर्शनात्, श्रवणात् च स्मरणात् च इति दारुणाः प्रकीर्तिताः॥]

तत्र अनुकम्प्येषु कृष्णो, यथा—

१. किं शुष्यद्वदनोऽसि मुञ्च खचितं चित्ते पृथुं वेपथुं
विश्वस्य[1] प्रकृतिं भजस्व न मनागप्यस्ति मन्तुस्तव।
उष्मम्रक्षितमृक्षराज! रभसाद्विस्तीर्य वीर्यं त्वया
पृथ्वी प्रत्युत युद्धकौतुकमयी सेवैव मे निर्मिता॥ (४)

[ऋक्षराज! किं शुष्यद्वदनः असि? चित्ते खचितं पृथुं वेपथुं मुञ्च। विश्वस्य प्रकृतिं भजस्व तव मनाक् अपि मन्तुः न अस्ति। प्रति उत त्वया रभसात् वीर्यं विस्तार्य उष्मं रक्षितम्; युद्धकौतुकमयी पृथ्वी सेवा एव मे निर्मिता॥]

यथा वा—

२. मुरमथन! पुरस्ते को भुजङ्गस्तपस्वी
लघुरहमिति कार्षीर्मा स्म दीनाय मन्युम्।
गुरुरयमपराधस्तथ्यमज्ञानतोऽभू-
दशरणमतिमूढं रक्ष रक्ष प्रसीद॥ (५)

[मुरमथन! तपस्वी भुजङ्गः ते पुरः कः? 'अहं लघुः' इति दीनाय मन्युं मा स्म कार्षीः। तथ्यम् अज्ञानतः अयं गुरुः अपराधः अभूत्। प्रसीद! अतिमूढम् अशरणं रक्ष रक्ष!!]

छठी लहरी—भयानकभक्तिरस

१. आगे कहे जाने वाले विभाव आदि के द्वारा पुष्ट हुई भयरति को धीर (बुद्धिमान्)-जन भयानक नाम का भक्तिरस कहते हैं। ।१।

२. इसमें आलम्बन दो प्रकार का होता है-श्रीकृष्ण, तथा दारुण (भयङ्कर या दुःखद)। अपराध किये हुए अनुकम्पा के पात्रों तथा उनके बन्धुओं के प्रति श्रीकृष्ण आलम्बन हैं। ।२।

३. स्नेह के कारण सर्वदा (श्रीकृष्ण) पर अनिष्ट आने की आशङ्का करने वालों में, दर्शन, श्रवण तथा स्मरण से (आलम्बन होने वाले) दारुण कहे गये हैं। ।३।

इनमें, अनुकम्पा-पात्रों में श्रीकृष्ण, यथा—

१. क्यों मुँह सूखा हुआ है तुम्हारा? चित्त में समाये अतिशय कम्प को छोड़ दो। मुझ पर विश्वास करके स्वस्थ हो जाओ। तुम्हारा जरा भी दोष-अपराध नहीं है। हे रीछराज (जाम्बवान्)! तुमने हठपूर्वक वीर्य (वीरोचित पराक्रम) का विस्तार करके ऊष्मा (क्रोध के सन्ताप) की रक्षा की है, इतना ही नहीं बल्कि युद्धकौतुकमयी प्रभूत (बहुत बड़ी) सेवा ही मुझे अर्पित की है। ।४।

अथवा यथा—

२. हे मुरारि! तुम्हारे सामने यह नाग बेचारा क्या है? मैं तो बहुत छोटा हूँ-इसलिये मुझ दीन पर क्रोध-रोष न करो, यह बड़ा अपराध सच ही अज्ञान से हो गया; असहाय और अत्यन्त मूढ़ (मेरी) की रक्षा कीजिये। ।५।

बन्धुषु दारुण-दर्शनाद् यथा—

३. हा किं करोमि तरलं भवनान्तराले
गोपेन्द्र! गोपय बलादुपरुध्य बालम्।
क्ष्मामण्डलेन सह चञ्चलयन्मनो मे
शृङ्गाणि लङ्घयति पश्य तुरङ्गदैत्यः॥ (६)

[हा! किं करोमि, गोपेन्द्र! तरलं बालं भवनान्तराले बलात् उपरुध्य गोपय! पश्य! क्ष्मामण्डलेन सह मे मनः चञ्चलयन् तुरङ्गदैत्यः शृङ्गाणि लङ्घयति॥]

श्रवणाद् यथा—

४. शृण्वती तुरगदानवं रुषा
गोकुलं किल विशन्तमुद्धुरम्।
द्रागभूत्तनयरक्षणाकुला
शुष्यदास्यजलजा व्रजेश्वरी॥ (७)

[उद्धुरं तुरङ्गदानवं किल रुषा गोकुलं विशन्तं शृण्वती व्रजेश्वरी द्राक् तनयरक्षणाकुला अभूत्॥]

स्मरणाद् यथा—

५. विरम विरम मातः! पूतनायाः प्रसङ्गा-
त्तनुमियमधुनापि स्मर्यमाणा धुनोति।
कवलयितुमिवाङ्गीकृत्य बालं धुरन्ती
वपुरतिपरुषं या घोरमाविश्चकार॥ (८)

["मातः" पूतनायाः प्रसङ्गात् विरम विरम! इयम् अधुना अपि स्मर्यमाणा तनुं धुनोति, या (पूतना) बालम् अङ्गीकृत्य कवलयितुम् इव घुरन्ती घोरम् अतिपरुषं वपुः आविश्चकार॥]

४. विभावस्य[2] भ्रुकुट्याद्यास्तस्मिन्नुद्दीपना मताः।
मुखशोषणमुच्छ्वासः परावृत्य विलोकनम्॥ (९)

[तस्मिन् विभावस्य भ्रुकुट्याद्याः उद्दीपनाः मताः। मुखशोषणम् उच्छ्वासः परावृत्य विलोकनम्॥]

५. स्वसङ्गोपनमुद्घूर्णा शरणान्वेषणं तथा।
क्रोशनाद्याः क्रियाश्चात्र सात्त्विकाश्चाश्रुवर्जिताः॥ (१०)

[स्वसङ्गोपनम्, उद्घूर्णा, शरणान्वेषणं तथा क्रोशनाद्याः क्रियाः च अत्र, अश्रुवर्जिताः सात्त्विकाः च॥]

बन्धुओं के प्रति दारुण के दर्शन से, यथा—

३ *हाय! मैं क्या करूँ? हे गोपेन्द्र (नन्द)! अपने अतिचञ्चल बेटे को किसी तरह बलपूर्वक घर के भीतर ही रोककर छुपाये रखो। देखो! पूरे पृथ्वीमण्डल के साथ-साथ मेरे मन को चञ्चल करता (डुलाता) हुआ यह अश्वाकार दैत्य (केशी) शिखरों को भी लाँघता हुआ (शिखरों से भी बड़े आकार वाला) चला आ रहा है।* ।६।

श्रवण से, यथा—

४. *अश्वाकार दैत्य (केशी) बड़े क्रोध से विशृंखल होकर उछलता हुआ गोकुल में घुसा आ रहा है—यह सुनती हुई व्रजेश्वरी (यशोदा) तत्काल अपने बेटे की रक्षा के लिये चिन्तातुर होकर सूखते मुख वाली कमलिनी जैसी हो गयी।* ।७।

स्मरण से, यथा—

५. *अरी माई! पूतना का प्रसङ्ग कहना बस करो, बस करो! उसका तो स्मरण करते ही वह अभी भी मेरे शरीर को कँपा दे रही है, जिसने कि मेरे शिशु को गोद में लेकर मानो उसे निगल डालने के लिए ही चक्कर खाती हुई ने, अत्यन्त घोर भयङ्कर कठोर विशाल शरीर प्रकट किया था।* ।८।

४-५. इसमें विभाव के भ्रुकुटी आदि उद्दीपन माने गये हैं। मुँह सूखना, उच्छ्वास, घूमकर देखना—अपने को छिपाना, चक्कर खाना, कोई शरण खोजना, चिल्लाना आदि यहाँ क्रियायें हैं, और अश्रु को छोड़कर अन्य सात्त्विकभाव होते हैं। ।९-१०।

६. इह सन्त्रास-मरण-चापलावेगदीनताः ।
विषाद-मोहापस्मार-शङ्काद्या व्यभिचारिणः ॥ (११)

[सन्त्रास-मरण-चापलावेग-दीनताः, विषाद-मोहापस्मारशङ्काद्याः इह व्यभिचारिणः ॥]

७. अस्मिन् भयरतिः स्थायी भावः[३] स्यादपराधतः ।
भीषणेभ्यश्च तत्र स्याद् बहुधैवापराधिता ॥ (१२)

[अस्मिन् अपराधतः, भीषणेभ्यः च भयरतिः स्थायी भावः स्यात्। तत्र बहुधा एव अपराधिता स्यात् ॥]

८. तज्जा भीर्नापरत्र स्यादनुग्राह्यजनान् विना[४] ।
आकृत्या[५] ये प्रकृत्या ये ये प्रभावेण भीषणः ॥ (१३)

[तज्जा भीः अनुग्राह्यजनान् विना अपरत्र न स्यात्। ये आकृत्या, ये प्रकृत्या, ये (च) प्रभावेण भीषणाः ॥]

९. एतदालम्बना भीतिः केवल-प्रेमशालिषु ।
नारी-बालादिषु तथा प्रायेणात्रोपजायते ॥ (१४)

[एतदालम्बना भीतिः केवलं प्रेमशालिषु तथा नारी-बालादिषु प्रायेण अत्र उपजायते ॥]

१०. आकृत्या पूतनाद्याः स्युः प्रकृत्या दुष्टभूभुजः ।
भीषणास्तु प्रभावेण सुरेन्द्र[६]-गिरिशादयः ॥ (१५)

[पूतनाद्याः आकृत्या, प्रकृत्या दुष्टभूभुजः, प्रभावेण सुरेन्द्र-गिरिशादयः स्युः ॥]

११. सदा भगवतो भीतिं गता आत्यन्तिकीमपि ।
कंसाद्या रतिशून्यत्वादत्र नालम्बना मताः ॥ (१६)

[भगवता सदा आत्यन्तिकीं भीतिं गताः अपि कंसाद्याः रतिशून्यत्वात् अत्र आलम्बनाः न मताः ॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरस-निरूपणे
भयानकभक्तिरस-लहरी षष्ठी ॥

६. सन्त्रास, मरण, चपलता, आवेग, दीनता, विषाद, मोह, अपस्मार, शङ्का आदि यहाँ व्यभिचारीभाव हैं। ।११।

७. इसमें अपराध के कारण तथा भीषण (भयङ्कर) प्राणियों से उत्पन्न भयरति स्थायीभाव होता है। उसमें अधिकतर अपराधिता रहती है। ।१२।

८-९. उस अपराध से उत्पन्न भय अनुग्राह्यजनों के सिवा दूसरों में नहीं होता है। जो आकृति से, प्रकृति से और प्रभाव से भयङ्कर हैं, उन पर आलम्बित भय केवल प्रेमयुक्त व्यक्तियों में तथा नारी-बालक आदि में प्रायः उत्पन्न होता है। ।१३-१४।

१०. पूतना आदि आकृति से, दुष्ट राजा-गण (शिशुपाल आदि) प्रकृति से और देवेन्द्र, महादेव आदि प्रभाव से भय के आलम्बन होते हैं। ।१५।

११. भगवान् के द्वारा सदा अत्यन्त भय को प्राप्त होते हुए भी कंस आदि रतिशून्य होने के कारण यहां भयानक रस के आलम्बन नहीं माने गये हैं। ।१६।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में छठी भयानकभक्तिरस-लहरी समाप्त हुई॥

बीभत्सभक्तिरसाख्या—सप्तमलहरी

१. पुष्टि निजविभावाद्यैर्जुगुप्सारतिरागता।
असौ भक्तिरसो धीरैर्बीभत्साख्य इतीर्यते॥ (१)

[निजविभावाद्यैः पुष्टिम् आगता असौ जुगुप्सा रतिः धीरैः बीभत्साख्यः भक्तिरसः इति ईर्यते॥]

२. अस्मिन्नाश्रितशान्ताद्या धीरैरालम्बना मताः। (२)

[आश्रितशान्ताद्याः अस्मिन् आलम्बनाः मता॥]

यथा—

१. पाण्डित्यं रतिहिण्डकाध्वनिगतो यः कामदीक्षाव्रती
कुर्वन् पूर्वमशेषषिड्गनगरी-साम्राज्यचर्यामभूत्।
चित्रं सोऽयमुदीरयन् हरिगुणानुद्बाष्पदृष्टिर्जनो
दृष्टे स्त्रीवदने विकूणितमुखो विष्टभ्य निष्ठीवति॥ (३)

[यः कामदीक्षाव्रती रतिहिण्डकाध्वनिगतः पूर्वम् अशेषषिड्गनगरीसाम्राज्यचर्यां कुर्वन् अभूत्, चित्रम्, सः अयं जनः हरिगुणान् उदीरयन् उद्बाष्पदृष्टिः स्त्रीवदने दृष्टे विकूणितमुखः विष्टभ्य निष्ठीवति॥]

३. अत्र निष्ठीवनं वक्त्रकूणनं घ्राणसंवृतिः।
धावनं कम्प-पुलक-प्रस्वेदाद्याश्च विक्रियाः॥ (४)

[अत्र निष्ठीवनम्, वक्त्रकूणनम्, घ्राणसंवृतिः धावनम्, कम्प-पुलक-प्रस्वेदाद्याः च विक्रियाः॥]

४. इह ग्लानिश्रमोन्माद-मोह-निर्वेद-दीनताः।
विषाद-चापलावेग-जाड्याद्या व्यभिचारिणः॥ (५)

[इह ग्लानि-भ्रम-उन्माद-मोह-निर्वेद-दीनताः, विषाद-चापल-आवेग-जाड्याद्याः व्यभिचारिणः॥]

५. जुगुप्सारतिरत्र स्यात् स्थायी सा च विवेकजा।
प्रायिकी चेति कथिता जुगुप्सा द्विविधा बुधैः॥ (६)

[अत्र जुगुप्सारतिः स्थायी स्यात्, सा च जुगुप्सा-विवेकजा, प्रायिकी च इति बुधैः द्विविधा कथिता॥]

सप्तम लहरी—बीभत्सभक्तिरस

१. अपने विभाव आदि के साथ पुष्टि पर पहुँची हुई यह जुगुप्सा रति ही धीमान् (बुद्धिशाली) व्यक्तियों के द्वारा बीभत्स नामक भक्तिरस रूप से कही जाती है। ।१।

२. आश्रित, शान्त आदि इसमें आलम्बन माने गये हैं। ।२।

यथा—

१. *अरे! वह जो पहले रति-चोरी के मार्ग में पाण्डित्य पा चुका था और समस्त स्त्रीलम्पटों की नगरी के सम्राट् जैसा चलता (आचरण करता) था, आश्चर्य है कि वही यह व्यक्ति श्रीहरि के गुणों को अश्रुभीनी दृष्टि से सुनता हुआ आज स्त्रीमुख दिखाई दे जाने पर स्तब्ध गतिहीन होकर अपना मुँह तिरछा सिकोड़ करके थूक देता है।* ।३।

३. यहाँ थूकना, मुँह सिकोड़ना, नाक बन्द करके श्वास रोक रखना, दूर भागना, काँपना, रोंए खड़े होना, अधिक पसीना निकल आना आदि विकारयुक्त क्रिया होती हैं। ।४।

४. ग्लानि, भ्रम, उन्माद, मोह (मूर्च्छा), घृणा या विरक्ति, दीनता, विषाद, चपलता, वेग, जड़ता आदि व्यभिचारीभाव हैं। ।५।

५. यहाँ जुगुप्सारति स्थायीभाव है। ज्ञानिजनों द्वारा वह जुगुप्सा विवेक से उत्पन्न और सामान्य—इस प्रकार दो प्रकार की कही गई हैं। ।६।

तत्र विवेकजा—

६. जातकृष्णरतेर्भक्तविशेषस्य तु कस्यचित्।
विवेकोत्था तु देहादौ जुगुप्सा स्याद्विवेकजा॥ (७)

[कस्यचित् जातकृष्णरतेः भक्तविशेषस्य देहादौ विवेकोत्था जुगुप्सा, (सा) तु विवेकजा स्यात्॥]

यथा—

२. घनरुधिरमये त्वचा पिनद्धे
पिशितविमिश्रितविस्रगन्धभाजि।
कथमिह रमतां बुधः शरीरे
भगवति हन्त रतेर्लवेऽप्युदीर्णे? (८)

[हन्त! भगवति रतेः लवे अपि उदीर्णे इह त्वचा पिनद्धे, घनरुधिरमये, पिशितविमिश्रितविस्रगन्धभाजि शरीरे बुधः कथं रमताम्॥]

अथ प्रायिकी—

७. अमेध्यपूत्यनुभवात् सर्वेषामेव सर्वतः।
या प्रायो[1] जायते सेयं जुगुप्सा प्रायिकी मता॥ (९)

[सर्वेषाम् एव सर्वतः अमेध्य-पूत्यनुभवात् या प्रायः जायते सा इयं प्रायिकी जुगुप्सा मता॥]

यथा—

३. असृङ्मूत्राकीर्णे घनशमलपङ्कव्यतिकरे
वसन्नेष क्लिन्नो जडतनुरहं मातुरुदरे।
लभे चेतःक्षोभं तव भजनकर्माक्षमतया
तदस्मिन् कंसारे! कुरु मयि कृपासागर! कृपाम्॥ (१०)

[असृङ्मूत्राकीर्णे घनशमलपङ्कव्यतिकरे क्लिन्ने मातुः उदरे वसन् एषः अहं तव भजनकर्माक्षमतया चेतःक्षोभं लभे, तत् कंसारे! कृपासागर! अस्मिन् (जन्मनि) मयि कृपां कुरु॥]

विवेकजा—

६. किसी ऐसे विशेष भक्त में, जिसमें श्रीकृष्ण-रति उत्पन्न हो चुकी है, देह आदि के प्रति विवेक से उठी हुई जुगुप्सा विवेकजा कहलाती है। ।७।

यथा—

२. *त्वचा द्वारा मढ़े या बंधे हुए गाढ़े रुधिर से भरे, कच्चे मांस में मिली हुई गन्दी घिनौनी गन्ध से बसाये इस शरीर में भला कोई बुद्धिशाली व्यक्ति कैसे रम सकता है यदि भगवान् के प्रति रति का लेशमात्र भी उदित हुआ हो!!* ।८।

प्रायिकी—

७. सभी को ही सब ओर अमेध्य-सड़ाँद का अनुभव होने से प्रायः जो उत्पन्न होती है, उसे प्रायिकी जुगुप्सा माना गया है। ।९।

यथा—

३. *रुधिर, मूत्र से घिरे, गाढ़े मल (पापों) के कीचड़ से सने, गीले माँ के पेट में (गर्भ-दशा में) रहता हुआ यह मैं आप का भजन करने में अक्षम होने के कारण अन्तःकरण का क्षोभ ही पा रहा हूँ। इसलिये हे कंस के शत्रु! कृपा के सागर! (इस दशा में पड़े हुए) संकटग्रस्त मुझ पर इस जन्म में कृपा कीजिये!* ।१०

यथा वा—

४. घ्राणोद्घूर्णक-पूतिगन्धि-विकटे कीटाकुले देहली-
स्रस्त-व्याधितयूथगूथघटना[2]-निर्धूतनेत्रायुषि।
कारानामनि हन्त मागधयमेनामी वयं नारके
क्षिप्तास्ते स्मृतिमाकलय्य नरकध्वंसिन्निह प्राणिमः॥ (११)

[नरकध्वंसिन्! घ्राणोद्घूर्णकपूतिगन्धिविकटे कीटाकुले देहली-स्रस्त-व्याधित-यूथ-गूथघटनानिर्धूतनेत्रायुषि कारानामनि नारके मागध-यमेन क्षिप्ताः, अमी वयं, ते स्मृतिम् आकलय्य इह प्राणिमः॥]

८. लब्धकृष्णरतेरेव सुष्ठु पूतं मनः सदा।
क्षुभ्यत्यहृद्यलेशेऽपि ततोऽस्यां रत्यनुग्रहः॥ (१२)

[लब्धकृष्णरतेः एव सदा सुष्ठु पूतं मनः अहृद्यलेशे अपि क्षुभ्यति, ततः अस्यां रत्यनुग्रहः॥]

९. हास्यादीनां रसत्वं यद् गौणत्वेनापि कीर्तितम्[3]।
प्राचां मतानुसारेण तद्विज्ञेयं मनीषिभिः॥ (१३)

[गौणत्वे अपि हास्यादीनां रसत्वं यत् मनीषिभिः कीर्त्तितं तत् प्राचां मतानुसारेण विज्ञेयम्॥]

१०. अमी पञ्चैव शान्ताद्या हरेर्भक्तिरसा मताः।
एषु हास्यादयः[4] प्रायो बिभ्रति व्यभिचारिताम्॥ (१४)

[अमी पञ्च शान्ताद्याः एव हरेः भक्तिरसाः मताः। एषु हास्यादयः प्रायः व्यभिचारितां बिभ्रति॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरस-निरूपणे
बीभत्सभक्तिरस-लहरी सप्तमी॥

यथा—

> ४. *हे नरकासुर का ध्वंस करने वाले! घ्राणेन्द्रिय को चक्कर खिलाने वाली गन्दी गन्ध से विकट हुए, कुलबुलाते कीड़ों से आकुल, देहली पर ही गिरी हुई रोगग्रस्त मनुष्यों की विष्ठा से अतिशय दुर्गन्ध एवं गन्दे दृश्य से आँखों की आयु (ज्योति, दर्शनशक्ति) को हर लेने वाले इस कारागार नामक नरकसमूह में जरासन्धरूपी यम द्वारा फेंके गये हम आप के चरण-कमल की स्मृति का ही आश्रय लिये जी रहे हैं, उसी के सहारे प्राण-धारण किये हुए हैं।* ।११।

८. जिसे श्रीकृष्ण-रति का लाभ हो चुका है उसीका सर्वदा शोभन भली-भाँति पवित्र मन ही लेशमात्र भी असुन्दर अरमणीय कुछ सामने आने पर क्षुब्ध हो जाता है। इससे इस जुगुप्सा में (भी) रति का अनुग्रह है। ।१२।

९. गौण होने पर भी इन हास्य आदि में जो मनीषियों ने रसत्व कहा है, वह प्राचीनों के मत के अनुसार ही जानना चाहिये। ।१३।

१०. ये पाँच शान्त आदि रस ही श्रीहरि के भक्तिरस माने गये हैं। इनमें से हास्य आदि प्रायः व्यभिचारी (अन्यत्र भी होने वाले) होते हैं। ।१४।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में गौणभक्तिरस-निरूपण में सातवीं बीभत्सभक्तिरस-लहरी समाप्त हुई॥

रसानां मैत्री-वैर-स्थिति-नाम्नी अष्टमलहरी

१. अथामीषां क्रमेणैव शान्तादीनां परस्परम्।
मित्रत्वं शात्रवत्वञ्च रसानामभिधीयते॥ (१)

[अथ अमीषां शान्तादीनां रसानां क्रमेण एव परस्परं मित्रता शात्रवं च अभिधीयते॥]

२. शान्तस्य प्रीत-बीभत्स-धर्मवीराः सुहृद्वराः।
अद्भुतश्चैष विज्ञेयः प्रीतादिषु चतुर्ष्वपि॥ (२)

[प्रीत-बीभत्स-धर्मवीराः शान्तस्य सुहृद्वराः। एषः अद्भुतः च प्रीतादिषु चतुर्षु अपि विज्ञेयः॥]

३. द्विषन्नस्य शुचिर्युद्धवीरो रौद्रो भयानकः॥ (३)

[शुचिः, युद्धवीरः, रौद्रः, भयानकः अस्य द्विषन्॥]

४. सुहृत्प्रीतस्य बीभत्सः शान्तो वीरद्वयं तथा।
वैरी शुचिर्युद्धवीरो रौद्रश्चैकविभावकः॥ (४)

[प्रीतस्य बीभत्सः, शान्तः तथा वीरद्वयं सुहृत्। शुचिः युद्धवीरः रौद्रः एकविभावकः च वैरी॥]

५. प्रेयसस्तु शुचिर्हास्यो[1] युद्धवीरः सुहृद्वराः।
द्विषो वत्सल-बीभत्स-रौद्रा[2] भीष्मश्च पूर्ववत्॥ (५)

[शुचिः, हास्यः, युद्धवीरः तु प्रेयसः सुहृद्वराः। वत्सल-बीभत्स-रौद्राः भीष्मः च पूर्ववत् द्विषः॥]

६. वत्सलस्य सुहृद् हास्यः करुणो भीष्मभित्तथा।
शत्रुः शुचिर्युद्धवीरः प्रीतो रौद्रश्च पूर्ववत्॥ (६)

[हास्यः, करुणः तथा भीष्मभित् वत्सलस्य सुहृत्। शुचिः युद्धवीरः प्रीतः रौद्रः च पूर्ववत् शत्रुः॥]

७. शुचेर्हास्यस्तया प्रेयान् सुहृदस्य[3] प्रकीर्तितः।
द्विषो वत्सल-बीभत्स-शान्त-रौद्र-भयानकाः
प्राहुरेकेऽस्य सुहृदं वीरयुग्मं परे रिपुम्॥ (७)

[शुचेः प्रेयान् तथा हास्यः सुहृत् प्रकीर्तितः। वत्सल-बीभत्स-शान्त-रौद्र-भयानकाः अस्य द्विषः। वीरयुग्मम् एके अस्य सुहृदं प्राहुः, परे रिपुम्॥]

आठवीं लहरी—रसों में मैत्री और वैर की स्थिति

१. अब इन शान्त आदि रसों की इन्हीं के क्रम से परस्पर मित्रता एवं शत्रुता कही जाती है। ।१।

२. प्रीत, बीभत्स एवं धर्मवीर रस शान्त के अच्छे मित्र हैं। यह शान्त एवं अद्‌भुत भी उक्त प्रीत आदि चारों में निहित मानना चाहिये। ।२।

३. शृङ्गार, युद्धवीर, रौद्र, भयानक इस (शान्त) के वैरी हैं। ।३।

४. प्रीतभक्तिरस के सुहृत् (मित्र) हैं—बीभत्स, शान्त तथा दोनों वीर (धर्मवीर एवं दानवीर) शुचि (शृङ्गार) युद्धवीर तथा रौद्र जब श्रीकृष्ण ही उनके विभावक हों तब—ये प्रीत के वैरी हैं। ।४।

५. शृङ्गार, हास्य, युद्धवीर प्रेयोभक्तिरस के मित्र हैं। वत्सल-बीभत्स-रौद्र और भयानक ये पहले की भाँति वैरी हैं। ।५।

६. हास्य, करुण तथा भयानक का एक भेद (विरोधी-हेतुक)—ये वत्सलरस के मित्र हैं। ।६।

७. प्रेयोभक्तिरस तथा हास्य-ये शृङ्गार रस के मित्र कहे गये हैं। वत्सल, बीभत्स, शान्त, रौद्र, भयानक इस (शृङ्गार) के द्वेषी (वैरी) हैं। दो प्रकार के वीर को कुछ लोगों ने सुहृत् कहा है और दूसरों ने शत्रु कहा है। ।७।

८. मित्रं हास्यस्य बीभत्सः शुचिः प्रेयान् सवत्सलः।
प्रतिपक्षस्तु करुणस्तथा प्रोक्तो भयानकः॥ (८)

[बीभत्सः, शुचिः, सवत्सलः प्रेयान् हास्यस्य मित्रम्। करुणः तथा भयानकः तु प्रतिपक्षः प्रोक्तः॥]

९. अद्भुतस्य सुहृद्वीरः पञ्च शान्तादयस्तथा।
प्रतिपक्षो भवेदस्य रौद्रो बीभत्स एव च॥ (९)

[वीरः तथा पञ्च शान्तादयः अद्भुतस्य सुहृत्। रौद्रः बीभत्सः एव च अस्य प्रतिपक्षः भवेत्॥]

१०. वीरस्य त्वद्भुतो हास्यः प्रेयान् प्रीतस्तथा सुहृत्।
भयानको विपक्षोऽस्य कस्यचिच्छान्त एव च॥ (१०)

[अद्भुतः, हास्यः, प्रेयान् तथा प्रीतः वीरस्य सुहृत्। भयानकः अस्य विपक्षः, कस्यचित् (मते) शान्तः एव च॥]

११. करुणस्य सुहृद्-रौद्रो वत्सलश्च विलोक्यते।
वैरी हास्योऽस्य सम्भोगशृङ्गारश्चाद्भुतस्तथा॥ (११)

[रौद्रः, वत्सलः च करुणस्य सुहृद् विलोक्यते। अस्य वैरी हास्यः सम्भोगशृङ्गारः तथा अद्भुतः च॥]

१२. रौद्रस्य करुणः प्रोक्तो वीरश्चापि सुहृद्वरः।
प्रतिपक्षस्तु हासोऽस्य शृङ्गारो भीषणोऽपि च॥ (१२)

[करुणः वीरः च अपि रौद्रस्य सुहृद्वरः प्रोक्तः। अस्य प्रतिपक्षः तु हासः, शृङ्गारः अपि च भीषणः॥]

१३. भयानकस्य बीभत्सः करुणश्च सुहृद्वरः।
द्विषस्तु वीर-शृङ्गार-हास्य-रौद्राः प्रकीर्तिताः॥ (१३)

[बीभत्सः करुणः च भयानकस्य सुहृद्वरः। वीर-शृङ्गार-हास्य-रौद्राः तु द्विषः प्रकीर्तिताः॥]

१४. बीभत्सस्य भवेच्छान्तो हास्यः प्रीतस्तथा सुहृत्।
शत्रुः शुचिस्तथा प्रेयान् ज्ञेया युक्त्या परे च ते॥ (१४)

[शान्तः हास्यः तथा प्रीतः बीभत्सस्य सुहृद् भवेत्, शुचिः तथा प्रेयान् शत्रुः। परे च ते युक्त्या ज्ञेयाः॥]

८. बीभत्स, शृङ्गार, वत्सल, प्रेयान् ये हास्य के मित्र हैं। करुण तथा भयानक इसके विरोधी या विपरीत पक्ष के हैं। ।८।

९. वीर तथा शान्त आदि पाँच अद्भुत के मित्र हैं। रौद्र तथा बीभत्स इसके प्रतिपक्ष (वैरी) होंगे। ।९।

१०. अद्भुत, हास्य, प्रेयान् तथा प्रीत—ये वीर रस के मित्र हैं। भयानक इसका विपक्ष है, कभी शान्त भी विपक्ष ही होता है। ।१०।

११. रौद्र एवं वत्सल करुण के मित्र माने जाते हैं। इसके वैरी हैं—हास्य, सम्भोग शृङ्गार तथा अद्भुत भी। ।११।

१२. करुण और वीर भी रौद्र के मित्र कहे गये हैं; इसका प्रतिपक्ष है हास, शृङ्गार और भयानक भी। ।१२।

१३. बीभत्स और करुण भयानक के मित्र हैं; वीर, शृङ्गार, हास्य एवं रौद्र इसके द्वेषी कहे गये हैं। ।१३।

१४. शान्त, हास्य तथा प्रीत—ये बीभत्स के मित्र होंगे, शृङ्गार एवं प्रेयान् उसके शत्रु हैं। ।१४।

१५. कथितेभ्यः परे ये स्युस्ते तटस्थाः सतां मताः। (१५)

[ये कथितेभ्यः परे स्युः ते सतां तटस्थाः मताः॥]

तत्र सुहृत्कृत्यम्—

१६. सुहृदा मिश्रणं सम्यगास्वाद्यं कुरुते रसम्॥ (१६)

[सुहृदा मिश्रणं रसं सम्यक् आस्वाद्यं कुरुते॥]

१७. द्वयोस्तु मिश्रणे साम्यं दुःशकं स्यात् तुलाधृतम्।
तस्मादङ्गाङ्गिभावेन मेलनं विदुषां मतम्॥ (१७)

[द्वयोः मिश्रणे तुलाधृतं साम्यं दुःशकं स्यात्। तस्मात् अङ्गाङ्गिभावेन मेलनं विदुषां मतम्॥]

१८. भवेन्मुख्योऽथ वा गौणो रसोऽङ्गी किल यत्र यः।
कर्तव्यं तत्र तस्याङ्गं सुहृदेव रसो बुधैः॥ (१८)

[यत्र यः किल अङ्गी रसः मुख्यः अथ गौणः वा भवेत् तस्य सुहृद् एव रसः बुधैः तत्र तस्य अङ्गं कर्तव्यम्॥]

१९. अथाङ्गित्वं प्रथमतो मुख्यानामिह लिख्यते।
अङ्गतां यत्र सुहृदो मुख्या गौणाश्च बिभ्रति॥ (१९)

[अथ प्रथमतः मुख्यानाम् इह अङ्गित्वं लिख्यते, यत्र मुख्याः गौणाः च सुहृदः अङ्गतां बिभ्रति॥]

तत्र शान्तेऽङ्गिनि प्रीतस्याङ्गता, यथा—

१. जीवस्फुलिङ्गवह्ने-
र्महसो घनचित्स्वरूपस्य।
तस्य पदाम्बुजयुगलं
किंवा संवाहयिष्यामि॥ (२०)

[जीवस्फुलिङ्गवह्नेर्महसः घनचिद्रूपस्य तस्य पदाम्बुजयुगलं किंवा संवाहयिष्यामि॥]

—अत्र मुख्येऽङ्गिनि मुख्यस्याङ्गता।

१५. जितने कहे गये इनसे जो अन्य (बचे) रहे, उन्हें सज्जनों ने तटस्थ माना है। ।१५।

सुहृद् का कृत्य—

१६. मित्र-रस से मिश्रण मुख्य रस को भलीभाँति आस्वादनीय बना देता है। ।१६।

१७. दो का मिश्रण होने में सर्वथा तराजू से तौले हुए जैसी समानता कठिन या असम्भव-सी होती है, इसलिये विद्वज्जनों ने विभिन्न रसों का अङ्ग-अङ्गी-भाव से मिलन माना है। ।१७।

१८. जहाँ पर जो मुख्य अथवा गौण रस अङ्गी हो वहाँ उसके मित्र-रस को ही साथ स्वीकार करना चाहिये, वैरी को नहीं, उदासीन या तटस्थ को नहीं। ।१८।

१९. इन पहले मुख्य रसों का ही अङ्गी होना लिखा जा रहा है, जहाँ मुख्य और गौण सुहृद् (मित्र) रस अङ्ग बनते हैं। ।१९।

इनमें से—शान्त अङ्गी, प्रीत अङ्ग,-यथा—

१. जीव रूपी स्फुलिङ्ग-अग्नि का जो (मूल) महान् अनल है उस घनचित्स्वरूप (श्रीकृष्ण) के चरण-कमलों का संवाहन (हाथों से दबाने-सहलाने की सेवा) क्या मैं कर पाऊँगा? ।२०।

—यहाँ मुख्य ही अङ्गी में मुख्य की ही अङ्गता है।

तत्रैव बीभत्सस्य यथा—

२. अहमिह कफशुक्रशोणितानां
पृथुकुतुपे कुतुकी रतः शरीरे।
शिव शिव परमात्मनो दुरात्मा
सुखवपुषः स्मरणेऽपि मन्थरोऽस्मि॥ (२१)

[कफ-शुक्र-शोणितानां पृथुकुतपे शरीरे अहं कुतुकी रतः, शिव! शिव! परमात्मनः सुखवपुषः स्मरणे अपि दुरात्मा मन्थरः अस्मि॥]

—अत्र मुख्य एव गौणस्यअङ्गता।

तत्रैव प्रीतस्याद्भुत-बीभत्सयोश्च, यथा—

३. हित्वास्मिन् पिशितोपनद्धरुधिरक्लिन्ने मुदं विग्रहे
प्रीत्युत्सिक्तमनाः कदाहमसकृद्दुस्तर्कचर्यास्पदम्।
आसीनं पुरटासनोपरि परं ब्रह्माम्बुदश्यामलं
सेविष्ये चलचारुचामर-मरुत्सञ्चार-चातुर्यतः॥ (२२)

[अस्मिन् पिशितोपनद्धक्लिन्ने विग्रहे मुदं हित्वा कदा अहं प्रीत्युत्सिक्तमनाः असकृद् दुस्तर्कचर्यास्पदं पुरटासनोपरि आसीनम् अम्बुदश्यामलं परं ब्रह्म चलचारुचामर-मरुत्सञ्चार-चातुर्यतः सेविष्ये॥]

—अत्र मुख्य एव मुख्यस्य गौणयोश्च।

अथ प्रीते शान्तस्य, यथा—

४. निरविघ्नतया सपद्यहं
निरवद्यः प्रतिपद्य-माधुरीम्।
अरविन्दविलोचनं कदा
प्रभुमिन्दीवरसुन्दरं भजे? (२३)

[निरविघ्नतया सपदि कदा अहं निरवद्यः प्रतिपद्य-माधुरीम् अरविन्दविलोचनम् इन्दीवरसुन्दरं प्रभुं भजे॥]

—अत्र मुख्ये मुख्यस्य।

शान्त अङ्गी, बीभत्स अङ्ग, यथा—

२. *कफ, शुक्र, रुधिर आदि के कुप्पे (थोड़े या पतले चमड़े से मढ़ा पात्र) जैसे शरीर में मैं कौतुक से रत (आसक्त) हूँ। अरे! अरे! सुखस्वरूप परमात्मा के स्मरण में भी मैं दुष्ट मन्थर (धीमी गति से चलने वाला आलसी) हूँ। ।२१।*

—यहाँ मुख्य रस में गौण रस अङ्ग है।

उसी (शान्त अङ्गी) में प्रीत तथा शान्त एवं अद्भुत अङ्ग, यथा—

३. *इस मढ़े व सने (गीले) मांस की गठरी या लौंदे जैसे शरीर में ही मोद मानना छोड़कर कब मैं प्रीति से सिँचे मन वाला होकर, बारम्बार, उन मेघश्यामल छवि वाले, सुवर्णसिंहासन पर बैठे हुए, तर्क के आचरण से अतीत (जहाँ तर्क की गति सम्भव नहीं) धाम वाले परम ब्रह्म भगवान् की सेवा सुन्दर चँवर निरन्तर डुलाते हुए, मरुत्सञ्चारचातुरी से (पंखा झलते हुए) करूँगा। ।२२।*

अब प्रीतभक्ति (अङ्गी) में शान्त (अङ्ग), यथा—

४. *अविद्यारहित होने से निर्दोष होकर मैं कब शीघ्र ही कमलनयन, नीलकमल-सी सुन्दर कान्ति वाले, शरण्य माधुरी वाले प्रभु को भजूँगा? ।२३।*

—यहाँ मुख्य में मुख्य ही अङ्ग है।

तत्रैव बीभत्सस्य, यथा—

५. स्मरन्प्रभुपदाम्भोजं नटन्नटति वैष्णवः।
यस्तु दृष्ट्या पद्मिनीनामपि सुष्ठु हृणीयते[४]॥ (२४)

[वैष्णवः प्रभुपदाम्भोजं स्मरन् नटन् अटति, यः तु पद्मिनीनाम् अपि दृष्ट्या सुष्ठु हृणीयते॥]

—अत्र मुख्ये गौणस्य।

तत्रैव बीभत्स-शान्त-वीराणां, यथा—

६. तनोति[५] मुखविक्रियां युवतिसङ्गरङ्गोदये
न तृप्यति न सर्वतः सुखमये समाधावपि।
न सिद्धिषु च लालसां वहति लभ्यमानास्वपि[६]
प्रभो! तव पदार्चने परमुपैति तृष्णां मनः॥ (२५)

[युवतिसङ्गरङ्गोदये मुखविक्रियां तनोति, सर्वतः सुखमये समाधौ अपि च न तृप्यति, लभ्यमानासु अपि सिद्धिषु लालसां न वहति। परं प्रभो! तव पदार्चने मनः तृष्णाम् उपैति॥]

—अत्र मुख्ये मुख्यस्य गौणयोश्च।

अथ प्रेयसि शुचेर्यथा—

७. धन्यानां किल मूर्धन्याः सुबलामूर्व्रजाबलाः।
अधरं पिञ्छचूडस्य चलाश्चुलुकयन्ति याः॥ (२६)

[सुबल! अमूः व्रजाबलाः किल धन्यानां मूर्धन्याः, याः चलाः पिच्छचूडस्य अधरं चुलूकयन्ति।]

—अत्र मुख्ये मुख्यस्य।

तत्रैव हास्यस्य, यथा—

८. दृशोस्तरलितैरलं व्रज निवृत्य मुग्धे! व्रजं
वितर्कयसि मां यथा न हि तथास्मि किं भूरिणा।
इतीरयति माधवे नवविलासिनीं छद्मना
ददर्श सुबलो वलद्विकचदृष्टिरस्याननम्॥ (२७)

[मुग्धे! दृशोः तरलितैः अलम्, निवृत्य व्रजं व्रज। यथा मां वितर्कयसि न हि तथा अस्मि; किं भूरिणा! —इति छद्मना नवविलासिनीम् ईरयति माधवे सुबलः वलद्विकचदृष्टिः अस्य आननं ददर्श॥]

—अत्र मुख्ये गौणस्य।

प्रीत में बीभत्स (अङ्ग), यथा—

५. *वैष्णव प्रभुचरणकमलों का स्मरण करता हुआ आनन्द से नाचता हुआ-सा चलता है, जो कि पद्मिनी नायिकाओं (श्रेष्ठ सुन्दरियों) के दर्शन से भी घृणा का अनुभव करता है।* ।२४।

—यहाँ मुख्य में गौण अङ्ग है।

उसी (प्रीत) में बीभत्स, शान्त तथा वीर (अङ्ग), यथा—

६. *युवतियों के सङ्ग का उत्सव अवसर आने पर जो मुँह बिचकाता है, सब ओर से सुखमय समाधि में भी तृप्त नहीं होता, प्राप्त होती हुई भी सिद्धियों की लालसा नहीं रखता, किन्तु हे प्रभो आपके चरणों के पूजन की तृष्णा उस मन में बनी ही रहती है।* ।२५।

—यहाँ मुख्य में मुख्य एवं गौण अङ्ग है।

अब प्रेयोभक्ति (अङ्गी) में शृंङ्गार (अङ्ग), यथा—

७. *हे सुबल! ये व्रज की चञ्चल सुन्दरियाँ तो धन्यों में भी मूर्धन्य (श्रेष्ठ) हैं, जो मयूरपिच्छ-युक्त मुकुट धारण किये हुए श्यामसुन्दर के अधरों का (अञ्जलि भर-भर) पान किया करती हैं।* ।२६।

—यहाँ मुख्य में मुख्य ही अङ्ग है।

वहीं (शृङ्गार अङ्गी में) हास्य (अङ्ग), यथा—

८. *"अरी मुग्धे! चञ्चल नयन चलाना छोड़कर व्रज लौट जा! तू मुझे जैसा समझ रही है, वैसा मैं नहीं हूँ, अधिक क्या कहूँ?"-नयी विलासिनी (गोपसुन्दरी) को छद्म से ऐसा कहते हुए माधव की ओर सुबल (सखा) ने घूम कर खिली हुई (मुस्का[illegible]ी) दृष्टि से देखा।* ।२७।

—यहाँ मुख्य में गौण अङ्ग है।

तत्रैव शुचिहास्ययोर्यथा—

९. मिहिरदुहितुरुद्यद्वञ्जुलं मञ्जुतीरं
प्रविशति सुबलोऽयं राधिकावेषगूढः।
सरभसमभिपश्यन् कृष्णमभ्युत्थितं यः
स्मितविकशितगण्डं स्वीयमास्यं वृणोति॥ (२८)

[राधिकावेषगूढः अयं सुबलः, उद्यद्वञ्जुलं मञ्जुतीरं प्रविशति। यः अभ्युत्थितं कृष्णं सरभसम् अभिपश्यन् स्मितविकशितगण्डं स्वीयम् आस्यं वृणोति॥]

—अत्र मुख्ये मुख्यगौणयोः।

अथ वत्सले करुणस्य—

१०. निरातपत्रः कान्तारे सन्ततं मुक्तपादुकः।
वत्सानवति वत्सो मे हन्त सन्तप्यते मनः॥ (२९)

[कान्तारे निरातपत्रः सन्ततं मुक्तपादुकः मे वत्सः वत्सान् अवति। हन्त! मनः सन्तप्यते॥]

—अत्र मुख्ये गौणस्य।

—

तत्रैव हास्यस्य, यथा—

११. पुत्रस्ते नवनीतपिण्डमतनुं मुष्णन्ममान्तर्गृहाद्-
विन्यस्यापससार तस्य कणिकां निद्राणडिम्भानने।
इत्युक्ता कुलवृद्धया सुतमुखे दृष्टिं विभुग्नभ्रुणि
स्मेरां निक्षिपती सदा भवतु वः क्षेमाय गोष्ठेश्वरी॥ (३०)

[''ते पुत्रः अतनुं नवनीतपिण्डं मुष्णन् निद्राणडिम्भानने तस्य कणिकां विन्यस्य मम अन्तर्गृहात् अपससार''—इति कुलवृद्धया उक्ता गोष्ठेश्वरी निर्भुग्नभ्रुवि सुतानने स्मेरां दृष्टिं निक्षिपती सदा वः क्षेमाय भवतु॥]

—अत्रापि मुख्ये गौणस्य।

वहीं (अङ्गी में) शृङ्गार और हास्य (अङ्ग)-यथा—

९. *श्रीराधिका-वेष में छिपा हुआ यह सुबल सूर्यपुत्री यमुना के सुन्दर तट पर उगे बेंत के झुण्ड अथवा वञ्जुल पुष्पलताओं के कुञ्ज में प्रवेश कर रहा है। जो कि (उसे देखते ही) हर्ष-संभ्रम से उठे हुए श्रीकृष्ण को देखता हुआ मुस्कान से खिले-कपोलों वाले अपने मुख को (आँचल से) ढक रहा है।* *।२८।*

—यहाँ मुख्य में मुख्य एवं गौण अङ्ग हैं।

अब वत्सल (अङ्गी) में करुण अङ्ग, यथा—

१०. *वन में छत्र के बिना, पादुका भी न पहने हुए मेरा बेटा निरन्तर बछड़ों को सँभाल रहा है; हाय, (उसके कष्ट को सोचकर) मेरा मन सन्तप्त है।* *।२९।*

—यहाँ मुख्य में गौण अङ्ग है।

वहीं (वत्सल में) हास्य (अङ्ग), यथा—

११. *"तेरा बेटा मेरे भीतरी घर से बड़ा-सा मक्खन का गोला चुराता हुआ, घर में सोये बालक के मुँह पर कण-भर माखन रखकर बाहर भाग गया"-कुल की वृद्धा गोपी द्वारा ऐसा कहे जाने पर टेढ़ी भौं करते हुए अपने बेटे के मुख पर मुस्कानभरी दृष्टि डालती हुई व्रजेश्वरी (यशोदा) सदा आपका कल्याण करे।* *।३०।*

—यहाँ भी मुख्य में गौण अङ्ग है।

तत्रैव भयानकाद्भुत-हास्य-करुणानां, यथा—

१२. कम्प्रा स्वेदिनि चूर्णकुन्तलतटे स्फारेक्षणा तुङ्गिते
सव्ये दोष्णि विकाशिगण्डफलका लीलास्यभङ्गीशते।
बिभ्राणस्य हरेर्गिरीन्द्रमुदयद्वाष्पा चिरोर्ध्वस्थितौ
पातु प्रस्नवसिच्यमानसिचया विश्वं व्रजाधीश्वरी॥ (३१)

[गिरीन्द्रं बिभ्राणस्य हरेः स्वेदिनि चूर्णकुन्तलस्थितौ कम्प्रा, सव्ये दोष्णि तुङ्गिते स्फारेक्षणा, लीलास्यभङ्गिशते विकाशिगण्डफलका, चिरोर्ध्वस्थितौ उदयद्बाष्पा, प्रस्नवसिच्यमानसिचया व्रजाधीश्वरी विश्वं पातु॥]

—अत्र मुख्ये चतुर्णां गौणानाम्।

२०. केवले वत्सले नास्ति मुख्यस्य खलु सौहृदम्।
अतोऽत्र वत्सले तस्य नतरां लिखिताङ्गता॥ (३२)

[केवले वत्सले मुख्यस्य खलु सौहृदं न अस्ति। अतः अत्र वत्सले तस्य अङ्गता नतरां लिखिता॥]

अथ उज्ज्वले प्रेयसो, यथा—

१३. मद्वेषशीलितततनोः[७] सुबलस्य पश्य
विन्यस्य मञ्जुभुजमूर्ध्नि भुजं मुकुन्दः।
रोमाञ्च-कञ्चुकजुषः स्फुटमस्य कर्णे
सन्देशमर्पयति तन्वि! मदर्थमेव॥ (३३)

[तन्वि! पश्य, मद्वेषशीलितततनोः सुबलस्य रोमाञ्चकञ्चुकजुषः मञ्जुभुजमूर्ध्नि भुजं विन्यस्य मुकुन्दः अस्य कर्णे स्फुटं मदर्थम् एव सन्देशम् अर्पयति॥]

—अत्र मुख्ये मुख्यस्य।

उसी (वत्सल) में भयानक, अद्‌भुत, हास्य, करुण (अङ्ग), यथा—

१२. *बाँये हाथ पर गिरिराज (गोवर्धन) उठाये हुए श्रीहरि के घुँघराले अलकों के कोने में स्वेदबिन्दु झलकने पर (बेटे के श्रम-कष्ट के अनुमान से एवं पर्वत गिरने के भय से) काँपती हुई, श्रीहरि द्वारा उसी बाँयी भुजा को और ऊँचा करने पर (अनायास इतना भार फूल की तरह उछालने की क्षमता सात वर्ष के बालक में देखकर चकित हो) आँखें फैलाती हुई, इस स्थिति में भी सहचर बालकों के साथ खेल-खेलने की सी मुद्रा में हास-परिहास करते हुए बेटे के मुख पर हँसी की सैंकड़ों मुद्रायें (मुँह चिढ़ाना, तरह-तरह का मुँह बनाना) देखकर हँसी से खिलते-फैलते कपोलों वाली, सात दिन-रात जितने लम्बे समय तक बेटे की बाँयी भुजा ऊँची और पर्वतभार उठायी हुई देखकर उसके श्रमकष्ट के दुःख से सतत बहते आँसुओं से वस्त्र भिगोती हुई यशोदा विश्व की रक्षा करें। ।३१।*

—यहाँ मुख्य (वत्सल) में चार गौण रस अङ्ग हैं।

२०. केवल (शुद्ध) वत्सल में अन्य किसी मुख्य रस की मैत्री नहीं है। इसलिये यहाँ किसी मुख्य का अङ्ग होना नहीं दिखाया गया है। ।३२।

अब उज्ज्वल (शृङ्गार) में प्रेयस् अङ्ग, यथा—

१३. *सखि! देखो! मेरा वेश धारण किये हुए शरीर वाले सुबल के सुन्दर कन्धे पर अपनी भुजा रखकर मुकुन्द (इस स्पर्श से) रोमाञ्च का चोगा-सा पहने उस (सुबल) के कान में देखो मेरे लिये ही सन्देश (मुझे कहने की बात) कह रहे हैं। ।३३।*

—यहाँ मुख्य में मुख्य अङ्ग।

तत्रैव हास्यस्य, यथा—

१४. स्वसास्मि तव निर्दये! परिचिनोषि न त्वं कुतः
कुरु प्रणयनिर्भरं मम कृशाङ्गि![८] कण्ठग्रहम्।
इति ब्रुवति पेशलं युवतिवेषगूढे हरौ
कृतं स्मितमभिज्ञया गुरुपुरस्तदा राधया॥ (३४)

[''निर्दये! तव स्वसा अस्मि, त्वं कुतः न परिचिनोषि? कृशाङ्गि! प्रणयनिर्भरं मम कण्ठग्रहं कुरु'' युवतिवेषगूढे हरौ इति ब्रुवति तदा अभिज्ञया राधया गुरुपुरः पेशलं स्मितं कृतम्॥]

—अत्र मुख्ये गौणस्य।

तत्रैव प्रेयोवीरयोर्यथा—

१५. मुकुन्दोऽयं चन्द्रावलिवदनचन्द्रे चटुलभे
स्मरस्मेरामाराद्दृशमसकलामर्पयति च।
भुजामंसे सख्युः पुलकिनि दधानः फणिनिभा-
मिभारिक्ष्वेडाभिर्वृषदनुजमुद्योजयति[१] च॥ (३५)

[अयं मुकुन्दः चन्द्रावलिवदने चटुलभे, स्मरस्मेराम् असकलां दृशम् आरात् अर्पयति, सख्युः पुलकिनि अंसे फणिनिभां भुजां दधानः इभारिक्ष्वेडाभिः वृषदनुजम् उद्योजयति॥]

—अत्र मुख्ये मुख्यगौणयोः।

अथ गौणानामङ्गिता—

२१. हास्यादीनान्तु गौणानां यदुदाहरणं कृतम्।
तेनैषामङ्गिता व्यक्ता मुख्यानाञ्च तथाङ्गता।
तथाप्यल्पविशेषाय किञ्चिदेव विलिख्यते॥ (३६)

[हासादीनां गौणानां तु यत् उदाहरणं कृतम्, तेन एव एषाम् अङ्गिता तथा मुख्यानां च अङ्गता व्यक्ता। तथा अपि अल्पविशेषाय किञ्चित् विलिख्यते॥]

उसी (शृङ्गार) में हास्य अङ्ग, यथा—

१४. *"अरी निर्दये! तेरी बहन ही तो हूँ, क्यों तू पहचान नहीं रही है? हे कृशतनुवाली सखी प्रेम से भर कर मेरे गले लग जा।"-युवती के वेश में छिपे हरि के ऐसा कहने पर, वास्तव में उन्हें पहचानती हुई राधा गुरुजनों के सामने मधुर मुस्कुरा ही गयीं।* ।३४।

—यहाँ मुख्य में गौण अङ्ग है।

उसी (शृङ्गार) में प्रेयान् तथा वीर अङ्ग, यथा—

१५. *यह मुकुन्द समीप ही स्थित चन्द्रावली के चटुल कान्ति वाले मुख पर मुंस्कान से खिले हुए कटाक्ष डाल रहा है। सखा के पुलकित कन्धे पर अपनी नाग जैसी (सुडौल गोल, चमकती चिकनी, श्याम) भुजा रखे हुए हाथी के शत्रु (सिंह) की दहाड़ जेसी ध्वनि से साँड़ बनकर आये दानव (अरिष्टासुर) को ललकार रहा है।* ।३५।

—यहाँ मुख्य में मुख्य तथा गौण अङ्ग हैं।

अब गौणों का अङ्गी होना कहेंगे—

२१. हास्य आदि गौण रसों का जो उदाहरण (रसों में गिनना) किया गया, उसी से इनका अङ्गी होना व्यक्त है, तब मुख्य रस इनके अङ्ग होंगे यह भी व्यक्त है। फिर भी अल्पत्व-विशेषत्व स्पष्ट करने के लिये कुछ लिखा जाता है।

।३६।

अथ हास्येऽङ्गिनि शुचेरङ्गता, यथा—

१६. मदनान्धतया त्रिवक्रया
प्रसभं पीतपटाञ्चले धृते।
अदधाद्विनतं जनाग्रतो
हरिरुत्फुल्लकपोलमाननम्॥ (३७)

[मदनान्धतया त्रिवक्रया (कुब्जया) पीतपटाञ्चले प्रसभं धृते हरिः जनाग्रतः उत्फुल्लकपोलम् विनतम् आननम् अदधात्॥]

—अत्र गौणेऽङ्गिनि मुख्यस्याङ्गता।

वीरे प्रेयसो, यथा—

१७. सेनान्यं विजितमवेक्ष्य भद्रसेनं
मां योद्धुं मिलसि पुरः कथं विशाल?
रामाणां शतमपि नोद्भटोरुधामा[१०]
श्रीदामा गणयति रे! त्वमत्र कोऽसि? (३८)

[विशाल! सेनान्यं भद्रसेनं विजितम् अवेक्ष्य मां योद्धुं कथं पुरः मिलसि? उद्भटोरुधामा श्रीदामा रामाणां शतम् अपि न गणयति, त्वम् अत्र कः असि रे!]

—अत्रापि गौणेऽङ्गिनि मुख्यस्य।

रौद्रे प्रेयोवीरयोर्यथा—

१८. यदुनन्दन! निन्दनोद्धतं
शिशुपालं समरे जिघांसुभिः।
अतिलोहितलोचनोत्पलै-
र्जगृहे पाण्डुसुतैर्वरायुधम्॥ (३९)

[यदुनन्दन! निन्दनोद्धतं शिशुपालं समरे जिघांसुभिः अतिलोहितलोचनोत्पलैः पाण्डुसुतैः वरायुधं जगृहे॥]

—अत्र गौणे मुख्यगौणयोः।

हास्य अङ्गी में शृङ्गार अङ्ग, यथा—

१६. *तीन अङ्गों में टेढ़ी कुब्जा ने कामान्ध होने के कारण जब हठपूर्वक लोगों के सामने ही पीताम्बर का छोर पकड़ लिया तब श्रीहरि ने उत्फुल्ल कपोलों वाला अपना मुख झुका लिया।* ।३७।

—यहाँ गौण अङ्गी में मुख्य अङ्ग है।

वीर अङ्गी में प्रेयान् अङ्ग, यथा—

१७. *हे विशाल! मेरे सेनानी भद्रसेन को पराजित देखकर अब मुझ से युद्ध करने क्या आगे बढ़े आ रहे हो? उद्भट तेज वाला यह (मैं) श्रीदामा तो सौ रामों को भी नहीं गिनता। अरे! तुम यहाँ कौन (किस गिनती में) हो!* ।३८।

—यहाँ भी गौण अङ्गी में मुख्य अङ्ग है।

रौद्र में प्रेयान् तथा वीर अङ्ग,—

१८. *हे यदुनन्दन! (आपकी) निन्दा में उद्धत शिशुपाल को युद्ध में मार डालना चाहने वाले, (क्रोध से) अत्यन्त लाल नयन-कमलों वाले पाण्डवों ने अपना-अपना श्रेष्ठ आयुध उठा लिया है।* ।३९।

—यहाँ गौण में मुख्य एवं गौण अङ्ग है।

अद्भुते प्रेयो-वीर-हास्यानां, यथा—

१९. मित्रानीकवृतं गदायुधि गुरुम्मन्यं प्रलम्बद्विषं
यष्ट्या दुर्बलया विजित्य पुरतः सोल्लुण्ठमुद्गायतः।
श्रीदाम्नः किल वीक्ष्य केलि-समराटोपोत्सवे[११] पाटवं
कृष्णः फुल्लकपोलकः पुलकवान् विस्फारदृष्टिर्बभौ॥
(४०)

[मित्रानीकवृतं गदायुधि गुरुम्मन्यं प्रलम्बद्विषं दुर्बलया यष्ट्या विजित्य पुरतः सोल्लुण्ठम् उद्गायतः श्रीदाम्नः केलिसमराटोपोत्सवे पाटवं वीक्ष्य किल कृष्णः फुल्लकपोलकः पुलकवान् विस्फारदृष्टिः बभौ॥]

—अत्र गौणे मुख्यस्य गौणयोश्च।

२२. एवमन्यस्य गौणस्य ज्ञेया कविभिरङ्गिता।
तथात्र मुख्यगौणानां रसानामङ्गतापि च॥ (४१)

[एवं कविभिः अन्यस्य गौणस्य अङ्गिता ज्ञेया, तथा अत्र मुख्यगौणानां रसानाम् अङ्गता अपि च (ज्ञेया)]।

२३. सोऽङ्गी सर्वातिगो यः स्यान्मुख्यो गौणोऽथ वा रसः।
स एवाङ्गं भवेदङ्गिपोषी सञ्चारितां व्रजन्॥ (४२)

[यः मुख्यः, अथवा गौणः रसः सर्वातिगः स्यात् सः अङ्गी; सः एव अङ्गिपोषी सञ्चारितां व्रजन् अङ्गम् भवेत्॥]

तथा च नाट्याचार्याः पठन्ति—

२०. "एक एव भवेत् स्थायी रसो मुख्यतमो हि यः।
रसास्तदनुयमित्वादन्ये स्युर्व्यभिचारिणः॥ (४३)

[यः मुख्यतमः रसः (सः) एकः एव स्थायी भवेत्। अन्ये रसाः तदनुगामित्वात् व्यभिचारिणः स्युः॥]

श्री विष्णुधर्मोत्तरे च—

२१. रसानां समवेतानां यस्य रूपं भवेद्बहु।
स मन्तव्यो रसः स्थायी शेषाः सञ्चारिणो मताः॥ (४४)

[समवेतानां रसानां यस्य रूपं बहु भवेत् सः स्थायी रसः मन्तव्यः शेषाः सञ्चारिणः मताः॥]

अद्भुत में प्रेयान्, वीर और हास्य अङ्ग, यथा—

> १९. *मित्रों की सेना से घिरे हुए, गदा-युद्ध में स्वयं को बड़ा मानने वाले, प्रलम्बासुर के शत्रु (बलराम) को पतली-सी डण्डी या लाठी से जीतकर, सामने लोट-पोट होते हुए तथा ऊँचे स्वर से गाते हुए श्रीदामा की खेल के युद्ध-उत्सव में पटुता देखकर श्रीकृष्ण के कपोल (हर्ष से) उत्फुल्ल हो उठे, शरीर-भर में पुलक हो आयी, नयन फैलाकर देखने लगे—ऐसे श्रीकृष्ण सुशोभित हुए।* ।४०।

—यहाँ गौण (अङ्गी) में मुख्य तथा दो गौण अङ्ग हैं।

२२. इसी प्रकार व्युत्पन्न प्रबुद्ध जनों को अन्य गौण रसों का भी अङ्गी होना, तथा मुख्य व गौणों का अङ्ग होना समझ लेना चाहिये। ।४१।

२३. जो भी मुख्य अथवा गौण रस सबका अतिक्रमण करने वाला (आस्वाद्यता की दृष्टि से सबसे अधिक प्रभावशाली) हो वही अङ्गी होता है। वही जब अङ्गी का पोषण करता हुआ सञ्चारी हो तब अङ्ग हो जाता है। ।४२।

ऐसा ही नाट्याचार्यों का कहना है—

> २०. *एक ही स्थायी रस रहता है जो मुख्यतम हो, उसके अनुयायी होने के नाते अन्य रस व्यभिचारी होते हैं।* ।४३।

श्रीविष्णुधर्मोत्तर में भी कहा है—

> २१. *समवेत रसों में जिसका रूप बहुत हो, उसे स्थायी मानना चाहिये, शेष सब सञ्चारी माने गये हैं।* ।४४।

२४. स्तोकाद्विभावनाज्जातः सम्प्राप्य व्यभिचारिताम्।
पुष्णन्निजप्रभुं मुख्यं गौणस्तत्रैव लीयते॥ (४५)

[स्तोकात् विभावनात् जातः व्यभिचारितां सम्प्राप्य निजप्रभुं मुख्यं पुष्णन् गौणः तत्र एव लीयते॥]

२५. प्रोद्यन् विभावनोत्कर्षात् पुष्टिं मुख्येन लम्भितः।
कुञ्चता निजनाथेन गौणोऽप्यङ्गित्वमश्नुते॥ (४६)

[विभावनोत्कर्षात् प्रोद्यन् गौणः अपि मुख्येन निजनाथेन कुञ्चता पुष्टिं लम्भितः अङ्गित्वम् अश्नुते॥]

२६. मुख्यस्त्वङ्गत्वमासाद्य पुष्णन्निन्द्रमुपेन्द्रवत्।
गौणमेवाङ्गिनं कृत्वा निगूढनिजवैभवः॥ (४७)

[निगूढनिजवैभवः मुख्यः तु अङ्गत्वम् आसाद्य गौणम् एव अङ्गिनं कृत्वा इन्द्रम् उपेन्द्रवत् पुष्णन्—]

२७. अनादिवासनोद्भास-वासिते भक्तचेतसि।
भात्येव न तु लीनः स्यादेष सञ्चारिगौणवत्॥ (४८)

[अनादिवासनोद्भासवासिते भक्तचेतसि भाति एव, न तु सञ्चारिगौणवत् एषः लीनः स्यात्॥]

२८. अङ्गी मुख्यः स्वमत्राङ्गै[१२]-र्भावैस्तैरभिवर्धयन्।
स्वजातीयैर्विजातीयैः स्वतन्त्रः सन् विराजते॥ (४९)

[मुख्यः अङ्गी अत्र स्वजातीयैः, विजातीयैः तैः भावैः अङ्गैः स्वम् अभिवर्धयन् स्वतन्त्रः सन् विराजते॥]

२९. यस्य मुख्यस्य यो भक्तो भवेन्नित्यनिजाश्रयः।
अङ्गी स एव तत्र स्यान्मुख्योऽप्यन्योऽङ्गतां व्रजेत्॥ (५०)

[यः भक्तः यस्य मुख्यस्य नित्यनिजाश्रयः भवेत्, सः एव तत्र अङ्गी स्यात्, अन्यः मुख्यः अपि अङ्गतां व्रजेत्॥]

किञ्च—

३०. आस्वादोद्रेकहेतुत्वमङ्गस्याङ्गत्वमङ्गिनि[१३]।
तद्विना तस्य सम्पातो वैफल्यायैव कल्पते॥ (५१)

[अङ्गिनि आस्वादोद्रेकहेतुत्वम् अङ्गस्य अङ्गत्वम्। तद्विना तस्य सम्पातः वैफल्याय एव कल्पते॥]

२४. अनेक रसों के मिलने से जो थोड़े से ही विभावन से उत्पन्न हो, वही गौण रस होते हुए व्यभिचारी होकर, मुख्य रस को पुष्ट करता हुआ उसी (मुख्य) में ही लीन हो जाता है; अर्थात् प्रपानक रस (शरबत) में कालीमिर्च नमक आदि की तरह लीन होकर ही आस्वाद्य बनता है। ।४५।

२५. गौण रस भी विभावना के उत्कर्ष के कारण प्रकर्ष से उदित होता हुआ सङ्कुचित हुए अपने स्वामी मुख्य रस से पुष्टि को प्राप्त कराया जाकर अङ्गी बन जाता है। ।४६।

२६. मुख्य रस अङ्ग बनकर, उपेन्द्र (वामन-रूप विष्णु) जैसे इन्द्र को पुष्ट करते हैं, वैसे गौण को ही अङ्गी बनाकर अपने वैभव (मुख्यत्व) को छिपाये रहता है। ।४७।

२७. अनादि (पूर्वसिद्ध) वासना (संस्कार) के उद्भास (उठ आने) से वासित भक्त के चित्त में यह (अङ्गी रस) स्पष्ट भासित होता ही है, सञ्चारी गौण रस की भाँति लीन नहीं हो जाता। ।४८।

२८. यहाँ मुख्य अङ्गी अपने स्वजातीय एवं विजातीय भाव रूप अङ्गों द्वारा अपने आपको बढ़ाता हुआ स्वतन्त्र रहता हुआ विराजमान है। ।४९।

२९. जो भक्त जिस मुख्य, (रस, भाव) का नित्य ही निजाश्रय हो वही वहाँ अङ्गी होता है, दूसरा (स्वरूप से) मुख्य होते हुए भी अङ्ग बन जाता है। ।५०।

और भी—

३०. अङ्गी में आस्वाद के उद्रेक का हेतु होना ही अङ्ग का अङ्गत्व है, उसके बिना इसका रहना विफल ही होगा। ।५१।

३१. यथा मृष्टरसालायां यवसादेः कथञ्चन।
तच्चर्वणे भवेदेव सतृणाभ्यवहारिता॥ (५२)

[यथा मृष्टरसालायां कथञ्चन यवसादेः तच्चर्वणे सतृणाभ्यवहारिता भवेत् एव॥]

अथ वैरिकृत्यम्—

३२. जनयत्येव वैरस्यं रसानां वैरिणा युतिः।
सुमृष्ट-पानकादीनां क्षारतिक्तादिना यथा॥ (५३)

[रसानां वैरिणा युतिः वैरस्यम् जनयति एव, यथा सुमृष्टपानकादीनाम् क्षारतिक्तादिना॥]

तथा हि—

२२. ब्रह्मिष्ठाया[१४] निष्फलं मे व्यतीतः
कालो भूयान् हा[१५] समाधिव्रतेन।
सान्द्रानन्दं तन्मया ब्रह्म मूर्तं
कोणेनाक्ष्णः साचिसव्यस्य नैक्षि॥ (५४)

[हा! ब्रह्मिष्ठायाः मे समाधिव्रतेन निष्फलं भूयान् कालः व्यतीतः। तत् सान्द्रानन्दं मूर्तं ब्रह्म मया साचिसव्यस्य अक्ष्णः कोणेन न ऐक्षि॥]

—अत्र शान्तस्योज्ज्वलेन वैरस्यम्।

२३. क्षणमपि पितृकोटिवत्सलं तं
सुरमुनिवन्दित-पादमिन्दिरेशम्।
अभिलषति वराङ्गनानखाङ्कैः
स्फुरिततनुं प्रभुमीक्षितुं मनो मे॥ (५५)

[पितृकोटिवत्सलं तं सुरमुनिवन्दितपादम् इन्दिरेशम्, वराङ्गनानखाङ्कैः स्फुरिततनुं प्रभुं क्षणम् अपि ईक्षितुं मे मनः अभिलषति॥]

—अत्र प्रीतस्योज्ज्वलेनैव।

२४. दोर्भ्यामर्गलदीर्घाभ्यां सखे! परिरभस्व माम्।
शिरः कृष्ण! तवाघ्राय विहरिष्ये ततस्त्वया॥ (५६)

[सखे! अर्गलदीर्घाभ्यां दोर्भ्यां मां परिरम्भस्व। कृष्ण! तव शिरः आघ्राय ततः त्वया (सह) विहरिष्ये॥]

—अत्र प्रेयसो वत्सलेन।

३१. जैसे शरबत के मसालों (मरिच, इलायची, शक्कर आदि) से युक्त मीठी लस्सी में यदि किसी तरह तिनका पड़ जाय तो लस्सी पीते समय उस तिनके को चबाने में तिनके से युक्त मीठा दही खाना हो जाता है। ।५२।

वैरी (विपरीत) रस का कार्य

३२. (इसी प्रकार) रसों में वैरी (विपरीत रस) का युक्त होना वैरस्य उत्पन्न करता ही है; जैसे कि मीठे सुस्वादु मधुर पेय में खारा, तीखा, कड़वा रस पड़ जाने से स्वाद बिगड़ जाता है। ।५३।

जैसे कि—

२२. *हाय! मुझ ब्रह्मिष्ठा का बहुत-सा समय समाधिव्रत के द्वारा व्यर्थ ही बीत गया; (क्योंकि) उस सान्द्र-आनन्दस्वरूप मूर्तिमान् ब्रह्म (श्रीकृष्ण) को मैंने बाँयी आँख के कोने से (कटाक्ष-दृष्टि से) नहीं देखा।* ।५४।

—यहाँ शान्त का शृङ्गार द्वारा वैरस्य है।

२३. *कोटि-कोटि पिताओं के समान वत्सल, देवों-मुनियों द्वारा जिनकी चनणवन्दना की जाती है ऐसे, लक्ष्मीपति, सुन्दरियों के (सुरतक्रीडा में किये गये) नख-चिह्नों से स्फुरित तनु वाले उन प्रभु को क्षणभर भी देख पाने को मेरा मन अभिलाषी है।* ।५५।

—यहाँ प्रीतभक्तिरस का शृङ्गार से वैरस्य है।

२४. *हे सखे! अर्गला (द्वार बन्द करने के लिये उनके पीछे लगाया जाने वाला बड़ा डण्डा) जैसी लम्बी व दृढ़ भुजाओं में भरकर मुझे भेंटो (आलिङ्गन करो) हे कृष्ण तुम्हारा सिर सूँघ लूँ, फिर तुम्हारे साथ विहार करूँगी।* ।५६।

—यहाँ प्रेयोभक्ति का वत्सलभक्ति से वैरस्य है।

२५. यं समस्तनिगमाः परमेशं
सात्वतास्तु भगवन्तमुशन्ति।
तं सुतेति बत साहसिकी त्वां
व्याजिहीर्षतु कथं मम जिह्वा? (५७)

[यं समस्तनिगमाः परमेशम्, (अथ) सात्वताः तु भगवन्तम् उशन्ति। तं त्वां बत 'सुत' इति कथं मम साहसिकी जिह्वा व्याजिहीर्षतु॥]

—अत्र वत्सलस्य प्रीतेन।

२६. तडिद्विलास-तरला नवयौवनसम्पदः।
अद्यैव दूति! तेन त्वं मया रमय माधवम्॥ (५८)

[नवयौवनसम्पदः तडिद्विलासतरलाः, तेन दूति! अद्य एव त्वं मया माधवं रमय॥]

—अत्रोज्ज्वलस्य शान्तेन।

२७. चिरं जीवेति संयुज्य काचिदाशीर्भिरच्युतम्।
कैलासस्था विलासेन कामुकी परिषष्वजे॥— (५९)

["चिरं जीव" इति आशीर्भिः अच्युतं संयुज्य काचित् कैलासस्था कामुकी (तं) विलासेन परिषस्वजे॥]

—अत्र शुचेर्वत्सलेन।

३३. शुचेः सम्बन्धगन्धोऽपि कथञ्चिद् यदि वत्सले।
क्वचिद्भवेत्ततः सुष्ठु वैरस्यायैव कल्पते॥ (६०)

[वत्सले कथञ्चित् अपि शुचेः सम्बन्ध-गन्धः (अपि) यदि भवेत्, तत् वैरस्याय एव सुष्ठु कल्पते॥]

२८. पिशितासृङ्मयी[१६] नाहं सत्यमस्मि तवोचिता।
स्वापाङ्गांविद्धां श्यामाङ्ग! कृपयाङ्गीकुरुष्व माम्॥— (६१)

[पिशित-असृङ्मयी अहं सत्यम् एव तव उचिता न अस्मि। (किन्तु) श्यामाङ्ग! स्वापाङ्गविद्धां मां कृपया अङ्गीकुरुष्व॥]

—अत्र शुचेर्बीभत्सेन।

२५. *जिन परमेश्वर को समस्त वेद एवं वेदार्थ जानने वाले तथा पाञ्चरात्रिक भक्त-जन भगवान् (वासुदेव) मानते हैं, ऐसे तुमको मेरी साहसिकी जिह्वा 'पुत्र' कह कर कैसे पुकारे?।५७।*

—यहाँ वत्सल का प्रीत से वैरस्य है।

२६. *यह नवयौवन-सम्पत्ति बिजली की कौंध या चमक जैसी क्षणभङ्गुर या चञ्चल है। इसलिए, हे दूती! तू आज ही मेरे साथ माधव का रमण करा दे। ।५८।*

—यहाँ शृङ्गार का शान्त से वैरस्य है।

२७. *किसी कैलासवासिनी कामपरायण कामिनी ने पहले अच्युत को 'चिरकाल तक जीओ'—ऐसा आशीष दिया, फिर विलास-पूर्वक उनका आलिङ्गन किया। ।५९।*

—यहाँ शृङ्गार का वत्सल से वैरस्य है।

३३. वत्सलभक्ति में किसी प्रकार भी यदि शृङ्गार के सम्बन्ध का गन्ध भी आ जाये तो वह वैरस्य ही उत्पन्न करता है। ।६०।

२८. *मांस-रुधिर-मयी मैं सच ही किसी प्रकार तुम्हारे योग्य नहीं हूँ। फिर भी हे श्याम-काय! तुम्हारे कटाक्ष से बिंधी हुई मुझ को अपनी कृपा द्वारा अङ्गीकार करो। ।६१।*

—यहाँ शृङ्गार का बीभत्स से वैरस्य है।

३४. एवमन्यापि विज्ञेया प्राज्ञै रसविरोधिता।
प्रायेणेयं रसाभास-कक्षायां पर्यवस्यति॥ (६२)

[एवं प्राज्ञैः अन्या अपि रसविरोधिता विज्ञेया। प्रायेण इयं रसाभासकक्षायां पर्यवस्यति॥]

किञ्च—

३५. द्वयोरेकतरस्येह बाध्यत्वेनोपवर्णने।
स्मर्यमाण-तयाप्युक्तौ साम्येन वचनेऽपि च॥ (६३)

[इह द्वयोः एकतरस्य बाध्यत्वेन उपवर्णने स्मर्यमाणतया उक्तौ अपि साम्येन वचने अपि च]

३६. रसान्तरेण व्यवधौ तटस्थेन प्रियेण वा।
विषयाश्रय-भेदे च[१७] गौणेन द्विषता सह।
इत्यादिषु न वैरस्यं वैरिणो जनयेद् युतिः॥ (६४)

[तटस्थेन प्रियेण वा रसान्तरेण व्यवधौ विषयाश्रयभेदे च द्विषता सह गौणेन— इत्यादिषु वैरिणः युतिः वैरस्यं न जनयेत्॥]

तत्र एकतरस्य बाध्यत्वेन वर्णने, यथा विदग्धमाधवे—

२९. प्रत्याहृत्य मुनिः क्षणं विषयतो यास्मिन्मनो धित्सते
बालासौ विषयेषु धित्सति ततः प्रत्याहरन्ती मनः।
यस्य स्फूर्तिलवाय हन्त हृदये योगी समुत्कण्ठते
मुग्धेयं किल तस्य पश्य हृदयान्निष्क्रान्तिमाकाङ्क्षति॥(६५)

[मुनिः विषयतः प्रत्याहृत्य यस्मिन् क्षणं मनः धित्सते, असौ बाला ततः मनः प्रत्याहरन्ती विषयेषु धित्सति। हन्त! हृदये यस्य स्फूर्तिलवाय योगी समुत्कण्ठते, पश्य, इयं मुग्धा किल हृदयात् तस्य निष्क्रान्तिम् आकाङ्क्षति॥]

३७. बाध्यत्वमत्र शान्तस्य शुचेरुत्कर्षवर्णनात्॥ (६६)

[अत्र शुचेः उत्कर्षवर्णनात् शान्तस्य बाध्यत्वम्॥]

३४. इसी प्रकार प्रबुद्ध जनों को अन्य भी रसों का विरोधी होना जान लेना चाहिये। यह विरोधिता ही प्राय: रसाभास-स्त्र में पर्यवसित होती है। ।६२।

और भी—

३५-३६. दो रसों के बीच में से किसी एक का बाध्य रूप से वर्णन हो तो परस्पर वैरीं रसों का मिलना वैरस्य नहीं उत्पन्न करेगा, ऐसे ही विरोधी रस का स्मरण किये जाने के रूप में वर्णन करना भी दोषरूप नहीं। ऐसे दोनों के साम्य रूप से वर्णन में भी वैरस्य-दोष नहीं होता। तटस्थ या प्रिय से अन्य रस द्वारा व्यवधान आने पर भी वैरस्य नहीं होता। दो वैरी रसों का एक विषय और एक ही आश्रय होने पर भी वैरस्य नहीं होता। विषय व आश्रय का भेद हो तो भी गौण वैरी रस के साथ मुख्य के वर्णन में वैरस्य नहीं होता। यह सब आगे व्यक्त हो जायेगा। ।६३-६४।

इनमें, किसी एक का बाध्य रूप से वर्णन हो तब, यथा

विदग्धमाधव में—

२९. *मुनि विषयों से खींचकर मन को क्षणभर जहाँ लगाना चाहता है, वहाँ से मन को खींचकर यह बाला (युवती) किसी प्रकार विषयों (गृहकार्य आदि) में लगाना चाहती है। अहो! योगी हृदय में जिसके स्फुरण के लेशमात्र के लिये अतीव उत्कण्ठित रहते हैं, देखो तो! यह मुग्धा उसी के हृदय से निकल जाना चाहती है (कि किसी तरह से वह हृदय से निकल जाय)। ।६५।*

३७. यहाँ शृङ्गार के उत्कर्षवर्णन के कारण शान्त का बाध्य होना दिखाया गया है। ।६६।

स्मर्यमाणत्वे, यथा—

३०. स एष वैहासिकताविनोदै—
र्व्रजस्य हासोद्गमसंविधाता।
फणीश्वरेणाद्य विकृष्यमाणः
करोति हा नः परिदेवनानि॥ (६७)

[एष सः वैहासिकताविनोदैः व्रजस्य हासोद्‌गमसंविधाता, हा! अद्य फणीश्वरेण विकृष्यमाणः नः परिदेवनानि करोति॥]

साम्येन वचने, यथा—

३१. विश्रान्तषोडशकला निर्विकल्पा निरावृतिः।
सुखात्मा भवती राधे! ब्रह्मविद्येव[१८] राजते॥ (६८)

[राधे! भवती विश्रान्तषोडशकला, निर्विकल्पा, निरावृतिः ब्रह्मविद्या इव राजते॥]

यथा वा—

३२. राधा शान्तिरिवोन्निद्रं[१९] निर्निमेषेक्षणञ्च माम्।
कुर्वती ध्यानलग्नञ्च वासयत्यद्रिकन्दरे॥ (६९)

[राधा शान्तिः इव माम् उन्निद्रं निर्निमेषेक्षणं ध्यानलग्नं च कुर्वती अद्रिकन्दरे वासयति॥]

रसान्तरेण व्यवधौ, यथा—

३३. त्वं काऽसि शान्ता किमिहान्तरीक्षे
द्रष्टुं परं ब्रह्म कुतस्तताक्षी।
अस्यातिरूपात्[२०] किमिवाकुलात्मा
रम्भे! समारम्भि भिदा स्मरेण॥ (७०)

["त्वं का असि?" "शान्ता"। "इह अन्तः किम् ईक्षे?" "परं ब्रह्म द्रष्टुम्।" "तताक्षी कुतः?" "रम्भे! अस्य अतिरूपात् किम् इव आकुलात्मा (अहं) स्मरेण भिदा समारम्भि॥"]

—अत्राद्भुतेन व्यवधिः।

स्मरण किया जाता हो तब, यथा—

३०. *यही जो विदूषक-जैसे अतिशय हास्यजनक विनोदों द्वारा पूरे व्रज (व्रजवासियों) में हास्य ही उपजाता रहता था, हाय! वही आज नागराज (कालिय) द्वारा खींचा जाता हुआ हमें रुला रहा है।* ।६७।

साम्य द्वारा कथन में, यथा—

३१. *हे राधिके! सोलह कलायें जिसमें विश्रान्त हो चुकी हैं, जो निर्विकल्प-स्वरूपा हो, आवृति या व्यवधान से रहित हो—ऐसी तुम ब्रह्मविद्या की भाँति सुशोभित हो रही हो।* ।६८।

अथवा यथा—

३२. *श्री राधा, शान्ति के सदृश, मुझे निद्रा से रहित, निर्निमेषदृष्टि वाला एवं ध्यान में लगा हुआ बनाती हुई पर्वत की कन्दरा में वास करवा रही है।* ।६९।

अन्य रस के द्वारा व्यवधान होने पर, यथा—

३३. *'तुम कौन हो?' 'शान्ता (शान्तरतिमयी तपस्विनी) हूँ।' 'यहाँ अन्तरिक्ष में क्यों (देख रही हो)?' 'परम ब्रह्म (श्रीकृष्ण) को देखने के लिये।' 'आँखें क्यों फैला (तान) रखी है?' अरी रम्भे! इसके अतिशय रूप से न जाने मैं कैसी आकुलात्मा हो गयी हूँ। स्मर (कामदेव) ने भेद आरम्भ कर दिया। (मैं-आत्मा और परम ब्रह्म में कुछ कहा न जा सकने जैसा भेद-सा ला दिया है, जिससे भीतर देखने वाली मेरी आँखें बाहर खुलकर विस्फारित हो रही हैं और भीतर आकुलता उमड़ रही है।)* ।७०।

—यहाँ अद्भुत रस के द्वारा व्यवधान है।

विषयभिन्नत्वे, यथा श्रीदशमे (भा० १०/६०/४५)—

३४. त्वक्-श्मश्रु-रोम-नख-केश-पिनद्धमन्त—
मांसास्थि-रक्त-कृमि-विट्-कफ-पित्त-वातम्।
जीवच्छवं भजति कान्तमतिर्विमूढा
या ते पदाब्ज-मकरन्दमजिघ्रती स्त्री॥ (७१)

[त्वक्-श्मश्रु-रोम-नख-केश-पिनद्धम्, अन्तः मांस-अस्थि-रक्त-कृमि-विट्-कफ-पित्त-वातम्, जीवच्छवं कान्तमतिः विमूढा स्त्री भजति या ते पदाब्जमकरन्दम् अजिघ्रती॥]

यथा वा विदग्धमाधवे—

३५. तस्याः कान्तद्युतिनि वदने मञ्जुले चाक्षियुग्मे
तत्रास्माकं यदवधि सखे! दृष्टिरेषा निविष्टा।
सत्यं ब्रूमस्तदवधि भवेदिन्दुमिन्दीवरञ्च
स्मारं स्मारं मुखकुटिलता-कारिणीयं हृणीया[२१]॥ (७२)

[सखे! तस्याः कान्तद्युतिनि वदने, मञ्जुले च अक्षियुग्मे अस्माकम् एषा दृष्टिः यदवधि निविष्टा, तदवधि इन्दुम् इन्दीवरं च स्मारं स्मारं तत्र मुख-कुटिलताकारिणी हृणीया भवेत्॥]

—उभयत्र शुचिबीभत्सयोः।

आश्रयभिन्नत्वे, यथा—

३६. विजयिनमजितं विलोक्य रङ्ग—
स्थलभुवि सम्भृत-साँयुगीनलीलम्।
पशुपसवयसां वपूँषि भेजुः
पुलककुलं द्विषतां तु कालिमानम्॥ (७३)

[रङ्गस्थलभुवि विजयिनम् अजितम् सम्भृत-साँयुगीनलीलम् विलोक्य, पशुपसवयसां वपूँषि पुलककुलम्, द्विषतां तु कालिमानम् भेजुः॥]

—अत्र वीरभयानकयोः।

विषय भिन्न होने पर, यथा श्रीदशम में (भा०१०/६०/४५)—

३४. *(हे नाथ!) जो स्त्री आपके चरणकमलों का मकरन्द नहीं सूघँ पाती वही विमूढ़ा त्वचा-मूँछ-दाढ़ी-रोम-नख-केश आदि से बाहर मढ़े हुए, भीतर मांस-अस्थि-रक्त-कृमि-विष्ठा-मल-मूत्र-तथा कफ-पित्त-वात आदि के बने जीवित शव को ही कान्त मानती हुई भजती है। उसी को समर्पित रहती है।* ।७१।

अथवा यथा विदग्धमाधव में—

३५. *हे सखे! उस (श्रीराधा) के ममनीय द्युति वाले मुख पर एवं मञ्जुल नयनयुगल पर जबसे हमारी यह दृष्टि पड़ी एवं वहीं रह गयी है, तब से सच कहते हैं कि चन्द्रमा और नीलकमल का स्मरण आते ही घृणा से मुँह बिचक जाता है।* ।७२।

—दोनों ही स्थानों पर शृङ्गार और बीभत्स का योग है।

आश्रय भिन्न होने पर, यथा—

३६. *भलीभाँति युद्धलीला करते हुए विजयी अपने सखा श्रीकृष्ण को देखकर गोपाल-बालकों के शरीर पुलकावली से सुशोभित हुए और द्वेषियों के शरीर काले पड़ गये।* ।७३।

—यहाँ वीर और भयानक का योग है।

३८. विषयाश्रयभेदेऽपि मुख्येन द्विषता सह।
सङ्गतिः किल मुख्यस्य वैरस्यायैव जायते॥ (७४)

[विषयाश्रयभेदे अपि मुख्येन द्विषता सह सङ्गतिः किल मुख्यस्य वैरस्याय एव जायते॥]

तत्र विषयभेदे, यथा—

३७. विमोचयार्गलाबन्धं विलम्बं तात! मा चर।
यामि काश्यगृहं यूना मनः श्यामेन मे हृतम्॥ (७५)

[तात! अर्गलाबन्धं विमोचय, विलम्बं मा आचर। काश्यगृहं यामि। यूना श्यामेन मे मनः हृतम्॥]

—अत्र शुचेः प्रीतेन।

आश्रयभेदे, यथा—

३८. रुक्मिणीकुचकाश्मीरपङ्किलोरःस्थलं कदा।
सदानन्दं परं ब्रह्म दृष्ट्या सेविष्यते मया?[22] (७६)

[रुक्मिणी-कुच-काश्मीर-पङ्किलोरःस्थलं सदानन्दं परं ब्रह्म कदा मया दृष्ट्या सेविष्यते?]

—अत्र शान्तस्य शुचिना।

३९. अनुरक्तधियो भक्ताः केचन ज्ञानवर्त्मनि।
शान्तस्याश्रयभिन्नत्वे वैरस्यं नानुमन्वते॥ (७७)

[केचन अनुरक्तधियः भक्ताः ज्ञानवर्त्मनि शान्तस्य आश्रयभिन्नत्वे वैरस्यं न अनुमन्वते॥]

किञ्च—

४०. भृत्ययोर्नायकस्येव निसर्गद्वेषिणोरपि।
अङ्गयोरङ्गिनः पुष्ट्यै[23] भवेदेकत्र सङ्गतिः॥ (७८)

[निसर्गद्वेषिणोः अपि भृत्ययोः नायकस्य इव, अङ्गयोः अङ्गिनः एकत्र सङ्गतिः पुष्ट्यै भवेत्॥]

३८. विषय एवं आश्रय भिन्न होने पर भी मुख्य रस की विरोधी रस के साथ सङ्गति मुख्य के लिये वैरस्य ही उत्पन्न करती है। ।७४।

विषयभेद होने पर, यथा—

३७. हे पिताजी! द्वार की साँकल खोल दीजिये, विलम्ब न कीजिये। युवक श्यामसुन्दर ने मेरा मन हर लिया है, अतः गुरु सान्दीपनि मुनि के घर (घनश्याम को देखने) जाऊँगी। ।७५।

—यहाँ शृङ्गार का प्रीतभक्ति से योग विरस है।

आश्रयभेद होने पर, यथा—

३८. रुक्मिणी के वक्षःस्थल के केसर-कुङ्कुम से सने हुए वक्षःस्थल वाले सदानन्दस्वरूप परमब्रह्म को कब मैं आँखों से देखूँगी। ।७६।

—यहाँ शान्त का शृङ्गार से योग है।

३९. अनुरागभरी बुद्धि वाले कुछ भक्त लोग ज्ञान मार्ग में शान्त का आश्रय भिन्न होने पर उनमें वैरस्य नहीं मानते। ।७७।

और भी—

४०. स्वभाव से द्वेषी भी सेवकों की नायक से सङ्गति, अङ्गों द्वारा अङ्गी की पुष्टि के समान पोषक ही होती है। ।७८।

यथा—

३९. कुमारस्ते मल्लीकुसुम-सुकुमारः प्रियतमे
गरिष्ठोऽयं केशी गिरिवदिति मे वेल्लति मनः।
शिवं भूयात् पश्योन्नमितभुजमेधिर्मुहुरमुं
खलं क्षुन्दन् कुर्यां व्रजमतितरां शालिनमहम्॥ (७९)

[प्रियतमे! ते कुमारः मल्लीकुसुमसुकुमारः, अयं केशी गिरिवत् गरिष्ठः, इति वेल्लति मे मनः। पश्य! उन्नमितभुजर्मेधिः अहंम् अमुं खलं मुहुः क्षुन्दन् व्रजम् अतितरां शलिनम् कुर्याम्॥]

—अत्र विद्विषौ वीरभयानकौ वत्सलं पुष्णीतः।

यथा वा—

४०. 'कम्प्रा स्वेदिनि चूर्णकुन्तलतटे' इत्यादि।
(पूर्वोद्धृतम् ४/८/३१) (८०)

—अत्र हास्यकरुणौ वत्सलमेव पुष्णीतः।

अपि च—

४१. मिथो वैरावपि द्वौ यौ भावौ धर्मसुतादिषु।
कालादिभेदात् प्राकट्यं तौ विन्दन्तौ न दुष्यतः॥ (८१)

[मिथः वैरौ अपि यौ द्वौ भावौ धर्मसुतादिषु कालादिभेदात् प्राकट्यं विन्दन्तौ तौ न दुष्यतः॥]

४२. अधिरूढे महाभावे विरुद्धैर्विरसा युतिः।
न स्यादित्युज्ज्वले राधाकृष्णयोर्दर्शितं पुरा॥ (८२)

[अधिरूढे महाभावे विरुद्धैः युतिः विरसा न स्यात् इति राधाकृष्णयोः उज्ज्वले पुरा दर्शितम्॥]

४३. क्वाप्यचिन्त्यमहाशक्तौ महापुरुषशेखरे।
रसावलिसमावेशः स्वादायैवोपजायते॥ (८३)

[क्व अपि अचिन्त्यमहाशक्तौ महापुरुष-शेखरे रसावलिसमावेशः स्वादाय एव जायते॥]

यथा—

३९. *हे प्रियतमे (यशोदे)! तुम्हारा लाल तो मल्लिका-कुसुम जैसा सुकुमार है, और यह केशी (अश्वाकृति दानव) पहाड़ जैसा कठोर, बड़ा भारी है,—इससे मेरा मन काँप रहा है। कल्याण हो (अपने बेटे का)। देखो, मैं अभी धान-पुआल को अलग करने वाले बैलों के खम्भे की तरह अपनी भुजा घुमाता हुआ उस दुष्ट (केशी) को बारम्बार रौंदता हुआ व्रज को अतीव श्लाघा-परायण बना दूँगा। ।७९।*

—यहाँ परस्पर विराधी वीर और भयानक वात्सल्य को पुष्ट कर रहे हैं।

अथवा यथा—

४०. *(पूर्वोक्त ३१ वें श्लोक में) 'श्रमबिन्दुओं से भरे घुँघराले केशों वाले कन्हैया के मस्तक को देखकर काँपती हुई.....' इत्यादि।*

—यहाँ हास्य और करुण वत्सल को ही पुष्ट करते हैं।

।८०।

और भी—

४१. परस्पर वैरी भी जो दो भाव (प्रीति तथा वत्सल) धर्मपुत्र (युधिष्ठिर) आदि में हैं, वे भी काल-भेद से प्रकट होते हैं, तब दोष युक्त (वैरस्य लाने वाले) नहीं रहते। ।८१।

४२. श्रीराधा-कृष्ण में महाभाव के अधिरूढ़ होने पर परस्पर विरोधी रसों से शृङ्गार का योग होना वैरस्य नहीं लाता, यह पहले (पश्चिम ५/ २३ में) दिखाया जा चुका है। ।८२।

४३. कहीं (देश-काल-पात्र-विशेष में) अचिन्त्य महाशक्तिशाली महापुरुषशिरोमणि में अनेकों रसों की माला का भी समावेश हो तो वह स्वाद बढ़ाने वाला ही होता है। ।८३।

तत्र रसानां विषयत्वे, यथा ललितमाधवे—

४१. दैत्याचार्यास्तदास्ये विकृतिमरुणतां मल्लवर्याः सखायो
गण्डौन्नत्यं खलेशाः प्रलयमृषिगणा ध्यानमुष्णास्रमम्बाः।
रोमाञ्चं सांयुगीनाः कमपि नवचमत्कारमन्तः सुरेशा
लास्यं दासाः कटाक्षं ययुरसितदृशः प्रेक्ष्य रङ्गे मुकुन्दम्॥ (८४)

[तदा रङ्गे मुकुन्दं प्रेक्ष्य दैत्याचार्याः आस्ये विकृतिम्, मल्लवर्याः अरुणताम्, सखायः गण्डौन्नत्यम्, खलेशाः प्रलयम्, ऋषिगणाः ध्यानम्, अम्बाः उष्णास्रम्, सांयुगीनाः रोमाञ्चम्, सुरेशाः अन्तः कम् अपि नवचमत्कारम्, दासाः लास्यम्, असितदृशः कटाक्षम् ययुः॥]

आश्रयत्वे, यथा—

४२. स्वस्मिन् धुर्येऽप्यमानी शिशुषु गिरिधृतावुद्यतेषु स्मितास्य-
स्थूत्कारी दध्नि विस्रे प्रणयिषु विवृत-प्रौढिरिन्द्रेऽरुणाक्षः।
गोष्ठे साश्रुर्विदूने गुरुषु हरिमखं प्रास्य कम्प्रः स पाया—
दासारे स्फारदृष्टिर्युवतिषु पुलकी बिभ्रदद्रिं विभुर्वः॥ (८५)

[अद्रिं बिभ्रत् सः विभुः— धुर्ये अपि स्वस्मिन् अमानी, गिरिधृतौ उद्यतेषु शिशुषु स्मितास्यः, विस्रे दध्नि थूत्कारी, प्रणयिषु विवृतप्रौढिः, इन्द्रे अरुणाक्षः, विदूने गोष्ठे साश्रुः, हरिमखं प्रास्य गुरुषु कम्प्रः, आसारे स्फारदृष्टिः, युवतिषु पुलकी—वः पायात्॥]

॥ इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे
रसानां मैत्री-वैर-स्थिति-नाम्नी लहरी अष्टमी॥

इनमें, अनेकों रसों का विषय होने पर, यथा ललितमाधव में—

४१. *मल्लयुद्धस्थली में मुकुन्द को देखकर—दैत्य कंस के पुरोहितों के मुख पर विकृति आ गई, (व्रज से आये) सखाओं के गाल फूल उठे, मल्लों के मुख रौद्र से लाल हो गये, (हँसी तथा हर्ष से विकसित हो उठे), कंस आदि दुष्ट राजागण निष्क्रिय, मूर्च्छित से हो गये, ऋषिगण ध्यानमग्न हो रहे, देवकी आदि मातायें उष्ण अश्रु बहाने लगीं, प्रतियुद्ध करने वाले मल्लों को रोमाञ्च हो आया, इन्द्र आदि देवाधिपतियों को भीतर कुछ नये चमत्कार का-सा अनुभव हुआ, दास-जन नाचने ही लगे, और मृगनयनी युवतियाँ कटाक्ष से देखने लगीं। ।८४।*

विविध रसों का आश्रय होने पर, यथा—

४२. *गोवर्धन धारण किये हुए वे विभु श्रीकृष्ण आप सब की रक्षा करें जो स्वयं सर्वश्रेष्ठ एवं सबका आधार होने पर भी अमानी (मानरहित) हैं, गोवर्धन को उठाने में (साथ देने के लिये अपनी-अपनी लाठी द्वारा जोर लगाने को) उद्यत गोपबालकों पर मुस्कुरा रहे हैं, खट्टा होकर सड़ते हुए दही-दूध के दुर्गन्ध से थूक रहे हैं, प्रेमी सखाओं के प्रति अपनी बलवत्ता (गोवर्धन धारण द्वारा) प्रकट कर रहे हैं, इन्द्र के प्रति क्रोध से नेत्र अरुण किये हुए हैं, अतिवृष्टि और झञ्झावात से दु:खित हो कष्ट पा रहे व्रज, गायों-ग्वालों की दशा देखकर जिनके नयनों में अश्रु हैं, ''मेरे कहने पर इन्द्रयज्ञ का खण्डन करने से यह विपत्ति आयी''-यह सोचकर गुरुजनों से भय मानकर काँप रहे हैं, निरन्तर मूसलाधार वृष्टि को देखकर विस्मय से जिनके नेत्र विस्फारित हैं इस स्थिति में भी प्रेमभरी गोपयुवतियों का भाव देखकर जो पुलकित हैं, (ऐसे गिरिधारी श्रीकृष्ण आपकी रक्षा करें।) ।८५।*

॥ श्रीभक्तिरसामृतसिन्धु के उत्तरविभाग में रसों की मैत्री-वैर-स्थिति नाम की आठवीं लहरी समाप्त हुई॥

रसाभासाख्या—नवम लहरी

१. पूर्वमेवानुशिष्टेन विकला रसलक्ष्मणा।
रसा एव रसाभासा रसज्ञैरनुकीर्तिताः॥ (१)

[पूर्वम् एव अनुशिष्टेन रसलक्ष्मणा विकलाः, रसाः इव रसाभासाः रसज्ञैः अनुकीर्त्तिताः॥]

२. स्युस्त्रिधोपरसाश्चानुरसाश्चापरसाश्च ते।
उत्तमा मध्यमाः प्रोक्ताः कनिष्ठाश्चेत्यमी क्रमात्[1]॥ (२)

[ते उपरसाः, अनुरसाः, अपरसाः च त्रिधा स्युः। अमी क्रमात् उत्तमाः, मध्यमाः कनिष्ठाः च इति प्रोक्ताः॥]

तत्र उपरसाः—

३. प्राप्तैः स्थायि-विभावानुभावाद्यैस्तु विरूपताम्।
शान्तादयो रसा एव द्वादशोपरसा मताः॥ (३)

[विरूपतां प्राप्तैः स्थायि-विभावानुभावाद्यैः तु शान्तादयः रसाः एव द्वादश उपरसाः मताः॥]

तत्र शान्तोपरसः—

४. ब्रह्मभावात् परब्रह्मण्यद्वैताधिक्ययोगतः।
तथा बीभत्सभूमादेः शान्तो ह्युपरसो भवेत्॥ (४)

[ब्रह्मभावात् परब्रह्मणि अद्वैताधिक्य-योगतः तथा बीभत्सभूमादेः (योगतः) शान्तः हि उपरसः भवेत्॥]

तत्र आद्यं, यथा—

१. विज्ञानसुषमाधौते समाधौ सदुदञ्चति।
सुखं दृष्टे तदेवाद्य पुराणपुरुषे त्वयि॥ (५)

[विज्ञानसुषमाधौते समाधौ यत् सुखम् उदञ्चति, तत् एव अद्य त्वयि पुराणपुरुषे दृष्टे॥]

नवम लहरी—रसाभास-निरूपिका

१. पहले ही बताये हुए रस लक्षण से रहित होने पर भी रस की भाँति प्रतीत होने वाले (भाव) रसज्ञों द्वारा रसाभास कहे गये हैं। ।१।

२. वे (रसाभास) उपरस, अनुरस और अपरास—ऐसे तीन प्रकार के हो सकते हैं। ये क्रम से उत्तम, मध्यम, कनिष्ठ भी कहलाते हैं। ।२।

उपरस—

३. जिनके स्थायीभाव-विभाव-अनुभाव निरूप हो गये हों ऐसे शान्त आदि रस ही बारह उपरस माने गये हैं। ।३।

शान्त उपरस—

४. ब्रह्मभाव से परब्रह्म में अद्वैत के आधिक्य-योग से तथा बीभत्स भूमा-रूप दिखाने से भी शान्त उपरस होता है। ।४।

इनमें से पहला, यथा—

१. *विज्ञान ही सुषमा से धुली समाधि-स्थिति में जो सुख उत्कर्ष से प्रकट होता है, वही आज हे पुराणपुरुष! (पुराणों में व्याख्यात अथवा पुरातन सनातन पुरुष) आपके दर्शन से हो रहा है। ।५।*

द्वितीयं, यथा—

२. यत्र यत्र विषये मम दृष्टि-
स्तं तमेव कलयामि भवन्तम्।
यन्निरञ्जन! [२]परावर-बीजं
त्वां विना किमपि नापरमस्ति॥ (६)

[यत्र यत्र विषये मम दृष्टिः तं तम् एव भवन्तं कलयामि, निरञ्जन! यत् परावरबीजं त्वं विना किम् अपि अपरं न अस्ति॥]

अथ प्रीतोपरसः—

५. कृष्णस्याग्रेऽतिधाष्टर्येन तद्भक्तेष्ववहेलया।
स्वाभीष्टदेवतान्यत्र[३] परमोत्कर्षवीक्षया।
मर्यादातिक्रमाद्यैश्च प्रीतोपरसता मता॥ (७)

[कृष्णस्य अग्रे अतिधाष्टर्येन तद्भक्तेषु अवहेलया स्वाभीष्टदेवता-अन्यत्र परमोत्कर्षवीक्षया मर्यादातिक्रमाद्यैः च प्रीतोपरसता मता॥]

तत्र आद्यं, यथा—

३. प्रथयन्[४] वपुविवशतां सतां कुलै-
रवधीर्यमाण-नटनोऽप्यनर्गलः।
विकिर प्रभो! दृशमिहेत्यकुण्ठवाक्
चटुलो बटुर्व्यवृणुतात्मनो रतिम्॥ (८)

[वपुविवशतां प्रथयन् सतां कुलैः अवधीर्यमाणनटनः अपि अनर्गलः अकुण्ठवाक् चटुलः बटुः आत्मनः रतिं व्यावृणुत—प्रभो! इह दृशं विकिर॥]

अथ प्रेय उपरसः—

६. एकस्मिन्नेव सख्येन हरिमित्राद्यवज्ञया।
युद्धभूमादिना चापि प्रेयानुपरसो भवेत्॥ (९)

[एकस्मिन् एव सख्येन, हरिमित्रादि-अवज्ञया, अपि च युद्धभूमादिना प्रेयान् उपरसः भवेत्॥]

दूसरा, यथा—

२. *जहाँ-जहाँ भी जिस विषय पर मेरी दृष्टि जाती है, उस विषय को मैं आप ही समझता हूँ (विषय आप ही हैं ऐसा देखता हूँ) क्योंकि हे निरञ्जन, पर-अवर (महान् और छोटा, श्रेष्ठ-कनिष्ठ, उच्च-नीच) कुछ भी दूसरा तुम्हारे बिना (तुम से रहित) नहीं है।* ।६।

प्रीत-उपरस—

५. श्रीकृष्ण के सम्मुख अतिशय धृष्टता से, उनके भक्तों की अवहेलना से, अपने अभीष्ट देव से अन्य स्थान पर परम उत्कर्ष देखने से ओर मर्यादा का अतिक्रम आदि करने से प्रीत उपरस हो जाता है, ऐसा माना गया है। ।७।

इनमें सवे पहला, यथा—

३. *(थोड़ी-सी भी) विवशता को बढ़ाकर दिखाता हुआ, सज्जनों द्वारा तिरस्कृत नटन (नाटकीय आचरण) करता हुआ, उस पर भी अनर्गल (निर्लज्ज) व्यावहार करने वाला चपल ब्राह्मण श्रीकृष्णप्रतिमा को सम्बोधन करता हुआ अपनी रति प्रकट कर रहा है कि- "हे प्रभो! इधर भी दृष्टि डालो!"* ।८।

प्रेय उपरस—

६. एक के चित्त में ही सख्य हो (परस्पर न हो), श्रीहरि के मित्रों एवं भक्तों आदि की अवज्ञा हो, युद्ध ही अधिक हो तो इन (व्यवहारों) से प्रेयान् उपरस हो जाता है। ।९।

तत्र आद्यं, यथा—

४. सुहृदित्युदितो भिया चकम्पे
छलितो नर्म-गिरा स्तुतिञ्चकार।
स नृपः परिरिप्सितो भुजाभ्यां
हरिणा दण्डवदग्रतः पपात॥ (१०)

[सुहृत् इति उदितः भिया चकम्पे, नर्मगिरा छलितः स्तुतिं चकार, हरिणा भुजाभ्यां परिरिप्सितः सः नृपः अग्रतः दण्डवत् पपात॥]

अथ वत्सलोपरसः—

७. सामर्थ्याधिक्यविज्ञानाल्लालनाद्यप्रयत्नतः।
करुणस्यातिरेकादेस्तुर्यश्चोपरसो भवेत्॥ (११)

[सामर्थ्याधिक्य-विज्ञानात् लालनाद्यप्रयत्नतः करुणस्य अतिरेकादेः तुर्यः च उपरसः भवेत्॥]

तत्र आद्यं, यथा—

५. मल्लानां यदवधि पर्वतोद्भटाना-
मुन्माथं सपदि तवात्मजादपश्यम्।
नोद्वेगं तदवधि यामि जामि! तस्मिन्
द्राघिष्ठामपि समितिं प्रपद्यमाने॥ (१२)

[पर्वतोद्भटानां मल्लानां तव आत्मजात् सपदि उन्माथं यदवधि अपश्यम् तदवधि जामि! तस्मिन् द्राघिष्ठाम् अपि समितिं प्रपद्यमाने उद्वेगं न यामि॥]

अथ शृङ्गारोपरसः; तत्र स्थायिवैरस्यम्—

८. द्वयोरेकतरस्यैव रतिर्या खलु दृश्यते।
यानेकत्र तथैकस्य स्थायिनः सा विरूपता।
विभावस्यैव वैरूप्यं स्थायिन्यत्रोपचर्यते॥ (१३)

[द्वयोरेकतरस्य एव या खलु रतिः दृश्यते, तथा एकस्य या अनेकत्र, सा स्थायिनः विरूपता। विभावस्य एव वैरूप्यम् अत्र स्थायिनि उपचर्यते॥]

इनमें पहला, यथा—

४. *श्रीकृष्ण ने 'हे मित्र!' कहकर बुलाया तो वह राजा भय से काँप गया, उपहासमयी कुछ बात कही तो स्तुति करने लगा, हरि ने दोनों भुजाओं में भरना चाहा तो वह सामने दण्डवत् (प्रणाम करता-सा) गिर गया। ।१०।*

वत्सल उपरस—

७. (श्रीहरि-रूप बालक के) अधिक सामर्थ्य के ज्ञान से, लालन आदि का प्रयत्न न होने से, करुण के अतिरेक से-इत्यादि कारणों से चौथा (वत्सल) भी उपरस हो जाता है। ।११।

इनमें से पहला, यथा—

५. *अरी बहन! तेरे बेटे द्वारा पहाड़ जैसे उद्भट (प्रचण्ड) मल्लों को मानो मथकर परास्त किया जाना जब से देखा है, तबसे वह बड़े से बड़े संग्राम में पड़ता है तो भी मुझे उद्वेग नहीं होता। ।१२।*

शृङ्गार उपरस; इसमें स्थायी का वैरूप्य—

८. दोनों की अथवा किसी एक की जो रति दिखाई देती है, वैसे ही एक की अनेक स्थानों पर जो रति है, वही स्थायी की विरूपता है। विभाव का वैरूप्य ही यहाँ स्थायी में उपचरित होता है। ।१३।

तत्र एकत्र रतिर्यथा ललितमाधवे—

६. मन्दस्मितं प्रकृतिसिद्धमपि व्युदस्तं
संगोपितश्च सहजोऽपि दृशोस्तरङ्गः।
धूमायिते द्विजवधूमदनार्तिवह्ना—
वह्नाय कापि गतिरङ्कुरितामयासीत्॥ (१४)

[प्रकृतिसिद्धम् अपि मन्दस्मितं व्युदस्तम्, सहजः अपि दृशोः तरङ्गः संगोपितः, द्विजवधू-मदनार्तिवह्नौ धूमायिते अह्नाय का अपि गतिः अङ्कुरिताम् अयासीत्॥]

९. अत्यन्ताभाव एवात्र रतेः खलु विवक्षितः।
एतस्याः प्रागभावे तु शुचिर्नोपरसो भवेत्॥ (१५)

[अत्र रतेः अत्यन्ताभावः एव खलु विवक्षितः एतस्याः प्रागभावे तु शुचिः उपरसः न भवेत्॥]

अनेकत्र रतिर्यथा—

७. गान्धर्वि! कुर्वाणमवेक्ष्य लीला-
मग्रे धरण्यां सखि! कामपालम्।
आकर्णयन्ती च मुकुन्दवेणुं
भिन्नाद्य साध्वि! स्मरतो द्विधासि॥ (१६)

[सखि गान्धर्वि! लीलां कुर्वाणम् कामपालम् अग्रे अवेक्ष्य, मुकुन्दवेणुं च आकर्णयन्ती साध्वि! अद्य स्मरतः द्विधा भिन्ना असि॥]

१०. केचित्तु नायकस्यापि सर्वथा तुल्यरागतः।
नायिकास्वप्यनेकासु वदन्त्युपरसं शुचिम्॥ (१७)

[केचित् तु नायकस्य अपि, अनेकासु नायिकासु अपि सर्वथा तुल्यरागतः शुचिम् उपरसं वदन्ति॥]

विभाववैरूप्यम्—

११. वैदग्ध्यौज्ज्वल्यविरहो विभावस्य विरूपता।
लता-पशु-पुलिन्दीषु वृद्धास्वपि स वर्तते॥ (१८)

[वैदग्ध्य-औज्ज्वल्यविरहः विभावस्य विरूपता लता-पशु-पुलिन्दीषु वृद्धासु अपि सः वर्तते॥]

यथा ललितमाधव में (एकत्ररति)—

६. *स्वाभाविक भी मन्दस्मित हट गयी, नयनों का सहज डोलना भी छिप गया, यज्ञ करते हुए ब्राह्मणों की पत्नियों में (श्रीकृष्ण के प्रति) (अनुचित) मदन का अग्नि जल उठा तब शीघ्र ही कोई गति (वहाँ से चल देना) अङ्कुरित हो गयी।* *।१४।*

९. यहाँ रति का अत्यन्ताभाव (भूत-भविष्य-वर्तमान में अभाव) ही विवक्षित है। उसका प्रागभाव हो तो शृङ्गार उपरस नहीं बनता। ।१५।

अनेकत्र रति, यथा—

७. *सखि! गान्धर्वि! धरती पर कामपाल बलदेव को लीला करते हुए देखकर, मुकुन्द द्वारा बजाया जाता हुआ वेणु सुनती हुई तू बेचारी साध्वी आज कामवेग से विँधकर दो खण्डो में बँट गयी है। (श्रीमुकुन्द के वेणु से एवं बलराम के रूप से दोनों ओर मोहित है।)* *।१६।*

१०. कोई कहते हैं कि नायक में भी तथा अनेकों नायिकाओं में भी (नायक का अनेक नायिकाओं के प्रति, या अनेक नायिकाओं में नायक के प्रति) सर्वथा समान राग हो तो शृङ्गार उपरस हो जाता हैं। ।१७।

विभाव की विरूपता—

११. विदग्धता एवं उज्ज्वलता न होने पर विभाव में वैरूप्य होता है। (वेणुगीत के समय) लता-पशु-पुलिन्दी आदि में तथा (अन्यत्र) वद्धा आदि में वह (थोड़ा-सा जागता हुआ शृङ्गार) उपरस होता है क्योंकि वहाँ विदग्धता एवं उज्ज्वलता का अभाव है। ।१८।

तत्र लता, यथा—

८. सखि! मधु किरती निशम्य वंशीं
मधुमथनेन कटाक्षिताथ मृद्वी।
मुकुलपुलकिता लतावलीयं
रतिमिह पल्लवितां हृदि व्यनक्ति॥ (१९)

[सखि! वंशीं निशम्य अथ मधुमथनेन कटाक्षिता मुकुल-पुलकिता इयम् मृद्वी लतावली हृदि पल्लवितां रतिम् इह व्यनक्ति॥]

पशुर्यथा—

९. पश्याद्भुतास्तुङ्गमुदः कुरङ्गीः
पतङ्गकन्यापुलिनेऽद्य धन्याः।
याः केशवाङ्गे तदपाङ्गपूताः
सानङ्गरङ्गां दृशमर्पयन्ति॥ (२०)

[अद्य पतङ्गतनयापुलिने धन्याः अद्भुताः तुङ्गमुदः कुरङ्गीः पश्य! याः तदपाङ्गपूताः केशवाङ्गे सानङ्गरङ्गां दृशम् अर्पयन्ति॥]

पुलिन्दी, यथा—

१०. कालिन्दीपुलिने पश्य पुलिन्दी [५]पुलकाचिता।
हरेर्दृक्चापलं [६]वीक्ष्य सहजं या विघूर्णते॥ (२१)

[पश्य! कालिन्दीपुलिने पुलिन्दी पुलकाचिता, या हरेः दृक्चापलं वीक्ष्य सहजं विघूर्णते॥]

वृद्धा, यथा—

११. कज्जलेन कृतकेशकालिमा
बिल्वयुग्मरचितोन्नतस्तनी।
पश्य गौरि! किरती दृगञ्चलं
स्मेरयत्यघहरं जरत्यसौ॥ (२२)

[गौरि! पश्य, कज्जलेन कृतकेश-कालिमा, बिल्वयुग्मरचितोन्नतस्तनी असौ जरती दृगञ्चलं किरती अघहरं स्मेरयति॥]

इनमें लता, यथा—

८. हे सखि! मधुमथन (मधु-कैटभ असुरों को मारने वाले मुकुन्द) द्वारा कटाक्ष से देखी गयी यह सुकोमल लताओं की पंक्ति वंशी को सुनकर कलियों के माध्यम से पुलकित होती हुई, अपने हृदय में पल्लवित (बढ़ी हुई) रति को व्यक्त कर रही है। ।१९।

पशु, यथा—

९. हे सखि! सूर्यपुत्री (यमुना) के पुलिन (तटवर्ती क्षेत्र) में इन अद्‌भुत, अतीव मुदित, धन्य हरिणियों को देखो! जो श्रीकृष्ण के द्वारा कटाक्ष से देखी जाकर पवित्र हुई हैं और उन्हीं के अङ्गों पर अनङ्गरङ्ग से भरी दृष्टि लगाये हुए हैं। ।२०।

पुलिन्दी, यथा—

१०. देखो तो! कालिन्दी के पुलिन पर यह पुलिन्दी (भीलनी) श्रीहरि के नयनों की चपलता देखकर पुलक से भरी, सहज ही चक्कर खा रही है। ।२१।

वृद्धा, यथा—

११. हे गौरि! देखो तो! काजल से केशों को काला बनाये हुए, दो बिल्वफल वक्षःस्थल पर बाँधकर उन्नत-उरोजवाली बनी हुई यह वृद्धा कटाक्ष बिखेरती हुई अघहर (अघासुर को मारने वाले श्रीकृष्ण) को मुस्कान दिला रही है (इस प्रकार की वृद्धा की चेष्टा देखकर मुकुन्द मुस्कुरा रहे हैं।)।२२।

१२. स्थायिनोऽत्र विरूपत्वमेकरागतयापि चेत्।
घटेतासौ विभावस्य विरूपत्वेऽप्युदाहृतिः॥ (२३)

[अत्र एकरागतया अपि स्थायिनः विरूपत्वं चेत् असौ विभावस्य विरूपत्वे अपि उदाहृतिः घटेत॥]

१३. शुचित्वौज्ज्वल्यवैदग्ध्यात् सुवेशत्वाच्च कथ्यते।
शृङ्गारस्य विभावत्वमन्यत्राभासता ततः॥ (२४)

[औज्ज्वल्यवैदग्ध्यात् सुवेशत्वात् च शुचिः कथ्यते, (तस्य) शृङ्गारस्य विभावत्वम्, ततः अन्यत्र आभासता भवेत्॥]

अथ अनुभाववैरूप्यम्—

१४. समयानां व्यतिक्रान्तिर्ग्राम्यत्वं धृष्टतापि च।
वैरूप्यमनुभावादेर्मनीषिभिरुदीरितम्॥ (२५)

[समयानां व्यतिक्रान्तिः, ग्राम्यत्वम्, धृष्टता अपि च अनुभवादेः वैरूप्यम् मनीषिभिः उदीरितम्॥]

तत्र समयव्यतिक्रान्तिः—

१५. समयाः खण्डितादीनां प्रिये रोषोदितादयः।
पुंसः स्मितादयश्चात्र प्रियया ताडनादिषु।
एतेषामन्यथाभावः समयानां व्यतिक्रमः॥ (२६)

[अत्र खण्डितादीनां समयाः प्रिये रोषोदितादयः प्रियया ताडनादिषु पुंसः स्मितादयः च। एतेषाम् अन्यथाभावः समयानां व्यतिक्रमः॥]

तत्र आद्यं, यथा—

१२. कान्तानखाङ्कितोऽप्यद्य परिहृत्य हरे! ह्रियम्।
कैलासवासिनीं दासीं कृपादृष्ट्या भजस्व माम्॥ (२७)

[हरे! कान्तानखाङ्कितः अपि अद्य ह्रियं परिहृत्य मां कैलासवासिनीं दासीं कृपादृष्ट्या भजस्व॥]

१२. यहाँ एक के ही चित्त में राग होने से स्थायी की विरूपता घटित हो तो वह विभाव की विरूपता में भी उदाहरण बनती है। ।२३।

१३. शुचित्व, औज्ज्वल्य, वैदग्ध्य से एवं सुवेशत्व से शृङ्गार की विभावता कही जाती है, इनसे अन्यत्र आभासता होती है। ।२४।

अनुभाव का वैरूप्य—

१४. समयों (आचारों) का अतिक्रमण, ग्राम्यता और धृष्टता को मनीषियों ने अनुभाव आदि की विरूपता बताया है। ।२५।

इनमें से समय का अतिक्रमण—

१५. खण्डिता आदि नायिकाओं का प्रिय के प्रति रोष-व्यञ्जक वचन आदि एवं प्रिया के द्वारा ताड़ना की जाने पर प्रिय द्वारा स्मित करना आदि ही रसशास्त्र के अनुसार (समय) है, इनका अन्यथा होना (इनके अनुसार न होकर भिन्न ही कुछ रोष आदि आचरण होना) ही समयों का अतिक्रमण है। ।२६।

इसमें प्रथम यथा—

१२. हे हरि! भले ही आप (अन्य) कान्ता के नखों से अङ्कित हैं, पर उसकी लज्जा छोड़कर मुझ कैलासवासिनी दासी को कृपादृष्टि-पूर्वक स्वीकार कीजिये। ।२७।

अथ ग्राम्यत्वम्—

१६. बालशब्दाद्युपन्यासो विरसोक्ति-प्रपञ्चनम्।
कटीकण्डूतिरित्याद्यं ग्राम्यत्वं कथितं बुधैः। (२८)

[बाल-शब्दाद्युपन्यासः, विरसोक्तिप्रपञ्चनं कटीकण्डूतिः इत्याद्यं ग्राम्यत्वं बुधैः कथितम्॥]

तत्र आद्यं, यथा—

१३. कि नः फणिकिशोरीणां त्वं पुष्कर-सदां सदा।
मुरलीध्वनिना नीवीं गोपबाल! विलुम्पसि? (२९)

[गोपबाल! मुरलीध्वनिना पुष्कर-सदां नः फणिकिशोरीणां त्वं सदा नीवीं किं विलुम्पसि?॥]

अथ धृष्टता—

१७. प्रकटप्रार्थनादिः स्यात् सम्भोगादेस्तु धृष्टता। (३०)

[सम्भोगादेः प्रकटप्रार्थनादिः तु धृष्टता स्यात्।]

यथा—

१४. कान्त! कैलासकुञ्जोऽयं रम्याहं नवयौवना।
त्वं विदग्धोऽसि गोविन्द! किंवा वाच्यमतः परम्? (३१)

[कान्त! अयं कैलासकुञ्जः, अहं रम्या नवयौवना, गोविन्द! त्वं विदग्धः असि, अतः मरं किं वा वाच्यम्?]

१८. एवमेव तु गौणानां हासादीनामपि स्वयम्।
विज्ञेयोपरसत्वस्य मनीषिभिरुदाहृतिः॥ (३२)

[एवम् एव तु हासादीनां गौणानाम् अपि उपरसत्वस्य उदाहृतिः मनीषिभिः स्वयं विज्ञेया॥]

अथ अनुरसाः—

१९. भक्तादिभिर्विभावाद्यैः कृष्णसम्बन्धवर्जितैः।
रसा हास्यादयः सप्त शान्तश्चानुरसा मताः॥ (३३)

[कृष्णसम्बन्धवर्जितैः भक्तादिभिः विभावाद्यैः सप्त हास्यादयः रसाः, शान्तः च. अनुरसाः मताः॥]

ग्राम्यता—

१६. 'बालक'—शब्द से प्रारम्भ करना फिर विपरीत ही (शृङ्गार) रस की उक्तियों द्वारा बात बढ़ाना, कमर में चुटकी गिलगिली आदि को बुधजनों ने ग्राम्यता (गँवारपन या भौंड़ापन) कहा है। ।२८।

इनमें पहला, यथा—

१३. हे गोपबालक! कालिय ह्रद (दह) में रहने वाली हम नागजातीय किशोरियों की नीवी को तुम क्यों नित्य ही अपनी मुरलीध्वनि से खिसका दिया करते हो? ।२९।

धृष्टता—

१७. सम्भोग आदि की प्रकट प्रार्थना धृष्टता है। ।३०।

यथा—

१४. हे कान्त! यह कैलास का कुञ्ज है, मैं नवयौवना सुन्दरी रमणी हूँ, हे गोविन्द! तुम चतुर रसिक हो, फिर अब इससे अधिक और क्या कहना होगा? ।३१।

१८. इसी प्रकार गौण हास्य आदि रसों का भी उपरस होना और उसके उदाहरण भी मनीषियों द्वारा समझ लिये जाने चाहिये। ।३२।

अब अनुरस—

१९. श्रीकृष्ण-सम्बन्ध से रहित विभाव आदि भक्तों के द्वारा हास्य आदि सात (गौण) तथा शान्त (मुख्य रसों में से एक) को अनुरस माना गया है। ।३३।

तत्र हास्यानुरसः—

१५. ताण्डवं व्यधितʻ हन्त कक्खटीʻ
मर्कटी भृकुटीभिस्तथोद्धुरम्।
येन बल्लव-कदम्बकं बभौ
हासडम्बरकरम्बिताननम्॥ (३४)

[हन्त! कक्खटी मर्कटी भृकुटीभिः उद्धुरं ताण्डवं तथा व्यधित, येन बल्लवकदम्बकं हासडम्बर-करम्बिताननं बभौ॥]

अथ अद्भुतानुरसः—

१६. भाण्डीरकक्षे बहुधा वितण्डां
वेदान्ततन्त्रे शुकमण्डलस्य।
आकर्णयन्निर्निमिषाक्षिपक्ष्मा
रोमाञ्चिताङ्गश्च सुरर्षिरासीत्॥ (३५)

[भाण्डीरकक्षे शुकमण्डलस्य वेदान्ततन्त्रे बहुधा वितण्डाम् आकर्णयन् निर्निमिष-अक्षिपक्ष्मा सुरर्षिः रोमाञ्चिताङ्गः च आसीत्॥]

२०. एवमेवात्र विज्ञेया वीरादेरप्युदाहृतिः॥ (३६)

[एवम् एव अत्र वीरादेः अपि उदाहृतिः विज्ञेया॥]

२१. अष्टावमी तटस्थेषु प्राकट्यं यदि बिभ्रति।
कृष्णादिभिर्विभावाद्यैस्तदाप्यनुरसा मताः॥ (३७)

[अमी अष्टौ यदि कृष्णादिभिः विभावाद्यैः तटस्थेषु प्राकट्यं बिभ्रति, तदा अपि अनुरसाः मताः॥]

अथ अपरसाः—

२२. कृष्ण-तत्प्रतिपक्षाश्चेद्विषयाश्रयतां गताः।
हासादीनां तदा॰ऽते॰त्र प्राज्ञैरपरसा मताः॥ (३८)

[कृष्ण-तत्प्रतिपक्षाः हासादीनां विषयाश्रयतां गताः चेत् तदा ते अत्र प्राज्ञैः अपरसाः मताः॥]

इनमें से हास्य (अनुरस)—

१५. *अरे! कक्खटी नाम की बन्दरिया ऊँची-नीची भृकुटी चलाते हुए ऐसा नृत्य करने लगी, जिसे देखने से गोपबालकों का समूह हँसी के ठहाकों से भरे मुख वाला हो गया।।३४।*

अद्भुत (अनुरस)—

१६. *भण्डीरवन में वृक्षों-लताओं पर बैठे हुए तोतों के समूह में परस्पर होते हुए वेदान्तशास्त्र-विषयक वाद-विवाद को सुनते हुए देवर्षि नारद निर्निमेष पलकों वाले एवं रोमाञ्चित अङ्गों वाले हो गये। ।३५।*

२०. इसी प्रकार वीर आदि के भी उदाहरण समझ लिये जाने चाहियें। ।३६।

२१. ये आठों रस यदि तटस्थों में भी श्रीकृष्ण आदि विभावों द्वारा प्रकट हों, तब भी अनुरस माने गये हैं। ।३७।

अब अपरस—

२२. श्रीकृष्ण और उनके प्रतिपक्ष यदि हास आदि के विषय तथा आश्रय बने हों तो उन्हें यहाँ प्राज्ञ-जनों ने अपरस माना है। ।३८।

तत्र हास्यापरसः—

१७. पलायमानमुद्वीक्ष्य चपलायतलोचनम्।
कृष्णमाराज्जरासन्धः सोल्लुण्ठमहसीन्मुहुः॥ (३९)

[चपलायतलोचनं कृष्णम् आरात् पलायमानम् उद्वीक्ष्य जरासन्धः सोल्लुण्ठं मुहुः अहसीत्॥]

२३. एवमन्येऽपि विज्ञेयास्तेऽद्भुतापरसादयः।[११]
उत्तमास्तु रसाभासाः कैश्चिद्रसतयोदिताः॥ (४०)

[एवम् अन्ये अपि ते अद्भुत-अपरसादयः विज्ञेयाः। उत्तमाः तु रसाभासाः कैश्चित् रसतया उदिताः॥]

तथा हि—

१८. भावाः सर्वे तदाभासा रसाभासाश्च केचन।
अमी प्रोक्ता रसाभिज्ञैः सर्वेऽपि रसनाद् रसाः॥ (४१)

[सर्वे भावाः, तदाभासाः, केचन रसाभासाः च अमी सर्वे अपि रसाभिज्ञैः रसनात् रसाः प्रोक्ताः॥]

२४. भारत्याद्याश्चतस्रस्तु रसावस्थानसूचिकाः।
वृत्तयो नाट्यमातृत्वादुक्ता नाटकलक्षणे॥ (४२)

[भारत्याद्याः चतस्रः वृत्तयः तु रसावस्थानसूचिकाः नाट्यमातृत्वात् नाट्यलक्षणे उक्ताः॥]

।इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे रसाभासलहरी नवमी।

॥ इति श्रीभक्तिरसामृतसिन्धौ गौणभक्तिरस-निरूपको नाम चतुर्थो विभागः॥

उनमें, हास्य (अपरस)—

१७. चपल विशाल नयनों वाले श्रीकृष्ण को (युद्ध से) भाग जाता हुआ देखकर जरासन्ध जोर से बार-बार ठठाकर हँसने लगा। ।३९।

२३. इसी प्रकार अन्य भी अद्भुत आदि अपरस जानने चाहियें। कुछ लोगों ने उत्तम रसाभासों को रस-रूप से भी कहा है। ।४०।

कहा भी गया है—

१८. सभी भाव, उनके आभास और कुछ रसाभास भी—इन सभी को रसशास्त्र के अभिज्ञानियों ने रस-दायक होने से रस ही कहा है। ।४१।

२४. रस की अवस्थिति की सूचक भारती आदि चार वृत्तियों को नाटकलक्षण (नाटकचन्द्रिका) में नाट्य की मातायें कहा गया है। ।४२।

॥ श्रीभक्तिरसामृतसिन्धु के उत्तर (चतुर्थ) विभाग में
नवीं रसाभास-लहरी समाप्त हुई॥

॥ यहीं पर श्रीभक्तिरसामृतसिन्धु का गौणभक्तिरस-निरूपक
उत्तर (चतुर्थ) विभाग भी समाप्त हुआ॥

उपसंहृतिः

ग्रन्थस्य गौरवभयादस्या भक्तिरसश्रियः।
समाहृतिः समासेन मया सेयं विनिर्मिता॥ (१)

[ग्रन्थस्य गौरवभयात् अस्याः भक्तिरसश्रियः समाहृतिः, सा इयं मया समासेन विनिर्मिता॥]

गोपाल-रूपशोभां दधदपि रघुनाथभावविस्तारी।
तुष्यतु सनातनोऽस्मिन्नुत्तरभागे रसामृताम्भोधेः॥ (२)

[गोपालरूपशोभां दधत् अपि रघुनाथभावविस्तारी सनातनः रसामृताम्भोधेः अस्मिन् उत्तरभागे तुष्यतु॥]

रामाङ्ग-शक्र-गणिते शाके* गोकुलमधिष्ठितेनायम्।
भक्तिरसामृतसिन्धुर्विटङ्कितः क्षुद्र-रूपेण॥

समाप्तोऽयं श्रीश्रीभक्तिरसामृतसिन्धुः।

उपसंहार

ग्रन्थ के गौरव (अत्यधिक बड़े हो जाने) के भय से इस भक्तिरस की श्री (समृद्धि) का मैंने यहां संक्षेप से ही समाहार किया है। ।१।

श्री गोपाल-रूप की शोभा धारण किये हुए श्री श्री रघुनाथ के भाव का विस्तार करने वाले श्री सनातन-प्रभु रसामृतसिन्धु (प्रस्तुत ग्रन्थ) के इस उत्तर भाग में सन्तुष्ट हों। ।२।

[यहाँ 'श्री गोपाल' 'श्री रघुनाथ' तथा 'श्री सनातन' शब्दों द्वारा श्लेष से श्री गोपाल भट्ट, श्री रघुनाथ दास तथा श्री रघुनाथ भट्ट एवं श्री सनातन गोस्वामी का स्मरण किया गया है।]

गोकुल-निवासी इस क्षुद्र रूप के द्वारा राम (३) अङ्ग (६) एवं शक्र (इन्द्र-१४) संख्याओं से गिने गये (विलोम क्रम से १४६३) शकसंवत् में यह भक्तिरसामृतसिन्धु-ग्रन्थ लिखा गया॥

॥ यह श्रीश्रीभक्तिरसामृतसिन्धु ग्रन्थ सम्पूर्ण हुआ॥

पाठ-विमर्श

पाठान्तरों के साङ्केतिक चिह्न

क. वराहनगर-स्थित श्रीगौराङ्गग्रन्थमन्दिरस्थ ३८७ सङ्ख्यक पाण्डुलिपि;

ख. पुरीस्थित श्रीगङ्गामातामठस्थ पाण्डुलिपि;

ग. काशी में विद्याविलास मुद्रणालय से १९२२ वैक्रमाब्द में प्रकाशित दामोदर शास्त्री द्वारा सम्पादित ग्रन्थ;

घ. ४४५ श्रीचैतन्यप्रकटातीताब्द (१९३० ई०) में श्री गौड़ीयमठ से प्रकाशित ग्रन्थ।

पु० आचार्य श्री पुरीदास संस्करण, श्री गौराब्द ४६० (१९४६ ई.) में श्री शचीनाथ राय चौधरी द्वारा प्रकाशित, श्री मदनमोहन गङ्गोपाध्याय द्वारा ढाका में, ''मंजूषा प्रिंटिंग'' में मुद्रित।

मुख्यभक्तिरस-निरूपक पश्चिम-विभाग

प्रथम लहरी-शान्तभक्तिरस

१. ख. परिकीर्तिताः
२. क. ख. ग. ०शिखामणिः
३. ख० भक्तिर्मुक्त्यैव
४. घ. अन्तर्वृत्तिविशेषस्य
५. ख. सुरापगा
६. ख. नासाग्र-न्यस्तनयनत्वं
७. ख. दासाद्यैरेषां
८. ख. अभितः
९. ख. वराम्बुदद्युतिधरं
१०. ख. यदध्वनि
११. ख. विलोचनयोरयासीत्
१२. ख. तन्नीरदद्युतिमहः
१३. क. ग. बिल्वमङ्गलस्तवे
१४. क. ग. प्रोचुरेकमनेकधा

द्वितीय लहरी—प्रीतभक्तिरस

१. ख. पीताम्बरः
२. ख. ये
३. ख. प्रसिद्धमेतेषां
४. ख. मैत्रेय-शौनकाद्यास्ते
५. ग. चिन्मात्रमात्मा
६. क. हरिहरो
७. क. ग. ०श्चेत्युदिता
८. क. ग. रक्तः
९. क. ग. इति
१०. ख. प्रतनुते
११. क. ग. लिखनान्तःपातिनी
१२. क. ग. साधका अपि कीर्तिताः
१३. ग. सस्नर्भुवि
१४. ख. प्रतिग्रहः
१५. ख. सुहृदादयः
१६. ख. ह्यानन्द०
१७. ख. धृतिः शङ्का
१८. ख. व्रीडा
१९. ख. वितर्कजड़िमावेगो
२०. ग. स्युर्धृत्याद्या
२१. क. मयासौ
२२. ग. एषां
२३. ख. त्रास०
२४. ग. ज्वरित०
२५. क. असुस्रवत्तव
२६. ख. ०कण्ठः
२७. ख. ०तृषान्धा
२८. पु० भुजषण्ड०
२९. ख. ग. दुनोतु
३०. ख. स्मारयद्दहति पारिषदान्मुनीन्द्र
३१. क. ०भक्तः
३२. क. घ. नौति
३३. ख. व्रजभुवमभितस्ते
३४. ख. ०श्यामाभिरामं
३५. ? प्रपन्नतृष्णा०
३६. ख. सङ्कलयिता, दु.सं.-पद्यं कादाचित्कमेव
३७. ख. स्यादमलं घनम्
३८. ख. वृष्णिवृन्दै०
३९. क. ०गुणाश्रयाः
४०. क. परिरेमिरे
४१. ख. प्रातश्च
४२. क. ग. स्फूर्तिरिव
४३. ख. लाल्येषु परिकीर्तिताः
४४. क. दासः
४५. ग. वार्ताव्युपरमादयः
४६. ग. मात्राद्
४७. ख. स्वयमूर्जिता
४८. पु० ख. जवदविहतेच्छस्य
४९. क. ख. मुदित*
५०. ख. रिपुरम्बराश्रितः

* क. विषमपि मुदित! सुधामिवोग्रम्, स पिबति चेत् पितुरिङ्गितं झषाङ्क!
विसृजति तदसम्मतिर्यदि स्यान्, मिषमिव हन्त सुधामपीन्दुशुद्धाम्॥

५१. ख. मल्ललीलां

५२. पु० बाष्पनिस्पन्दि

५३. क. ग. पदयो

५४. क. ग. वियोगादौ

तृतीय लहरी—प्रेयोभक्तिरस

१. क. कृष्णश्च

२. ख. कृष्णः

३. ख. ०समुदञ्चदनुग्रहेण

४. ख. पदारविन्दम्

५. ख. ०सुन्दराङ्गः

६. ख. लोहिताक्षः

७. ग. सल्लकीदल०

८. क. वंशीभृतः ख. वल्लकीमुरलीशृङ्गवाद्याङ्किताः

९. ख. भद्र०

१०. ख. लगुड़करः

११. ख. कस्तूरीविलसल्ललाटमुरसि

१२. ख. ०द्युतिहरं

१३. ख. वृषाल०

१४. ख. बिभ्रद्दण्डं

१५. ख. सव्यकरानुरुद्ध०

१६. ख. सुन्दर०

१७. ख. रुन्धेऽपरः

१८. ग. ०त्यर्जुनः

१९. ख. ग. प्रवरौ

२०. ख. कुमारी

२१. ख. दुर्गमापारवारः

२२. ख. शीलयन्त्यमुम्

२३. क. ग्रीवा

२४. ख. नः

२५. क. ख. मल्लीमाल्यञ्च फुल्लं

२६. क. बिभ्रल्लीलां ग. बिभ्रन्मालं

२७. घ. रङ्गोष्णीशः

२८. ख. श्लाघेत्यादि-विचेष्टितम्

२९. घ. रुदत्युदग्रं

३०. ख. क्रीडनं

३१. ख. युग्मत्वेनास्य पानाद्याः

३२. क. ग. हासात्

३३. क. प्रियसखिक्रियाः

३४. ब. स्वस्वपूर्वेशापक्ष०

३५. ख. विलापं स्मृतिदीनते

३६. क. ग. गताः

३७. ख. पांशुजान्

३८. ख. चन्द्रिकानर्जुनः

३९. ग. प्राणाध्वनि

४०. ग. ०रुक्षालकाः

४१. ख. विचार०

४२. ख. शिखरजा इव स्थावराः

४३. क. ख. ग. योगिभिरप्यलभ्यः

४४. ख. यद्दृग्विषये व्यवस्थितः

